THE XTH MAYUKHA

THE PRĀYASCHITTA MAYŪKHA

(A TREATISE ON PENANCES)

BY

NILKANTHA BHATTA

(Sanskrit Text with "Tattvarthadarshini" Notes)

EDITED AND COMMENTED UPON BY

SHASTREE ANANT YAGNESHWAR DHUPAKAR

VIDYALANKAR

Publishers

THE 'GUJARATI' PRINTING PRESS

Fort, BOMBAY

V. S. 1997 A. D. 1940

To be had from :—

THE 'GUJARATI' PRINTING PRESS

Sassoon Buildings, Elphinstone Circle

Fort, BOMBAY

(All rights reserved by the publishers.)

Printed and Published by Natverlal Itcharam Desai B. A. at

THE 'GUJARATI' PRINTING PRESS

Sassoon Buildings, Elphinstone Circle

FORT, BOMBAY

श्रीभट्टनीलकण्ठकृते भगवन्तभास्करे

प्रायश्चित्तमयूखः

(दशमः)

विद्यालङ्कार-भट्टानन्तयज्ञेश्वरैः संशोधितः

तत्त्वदर्शिन्या विभूषितश्च ।

विक्रेता प्रकाशकश्च

" गुजराती " प्रिन्टिंग प्रेस

कोट-मुंबई

संवदब्दः १९९७] शकाब्दः १८६२ [खिस्ताब्दः १९४०

मूल्यं रूपकद्वयम्

पुस्तकप्राप्तिस्थानम्—

गुजराती प्रिंटिंग प्रेस

सासुन बिल्डिंग, एल्फिन्स्टन् सर्कल; कोट–मुम्बई

भगवन्तभास्करस्य मयूखग्रन्थाः ।

	मयूखनामानि	संशोधकनामानि	मूल्यम्
१	संस्कार-मयूखः	वे. नरहरि शास्त्री शेंडे ,, ,,	०–१२–०
२	आचार-मयूखः	वे. महादेव शास्त्री बाक्रे ,, ,,	०– ८–०
३	समय-मयूखः	वे. बाक्रे शास्त्री वे. व्यंकटेश शास्त्री लेले	१– ४–०
४	श्राद्ध-मयूखः	,, ,, ,, ,, ,,	१– ४–०
५	नीति-मयूखः	,, ,, ,, ,, ,,	१– ४–०
६	व्यवहार-मयूखः	,, ,, ,, ,, ,,	१–१२–०
७	दान-मयूखः	वे. व्यंकटेश शास्त्री लेले ,, ,, ,,	२– ०–०
८	उत्सर्ग-मयूखः	,, ,, ,, ,, ,,	०– ४–०
९	प्रतिष्ठा-मयूखः	,, ,, ,, ,, ,,	०– ८–०
१०	प्रायश्चित्त-मयूखः	वे. अनंत शास्त्री धूपकर ,, ,,	२– ०–०
११	शुद्धि-मयूखः	,, ,, ,, ,, ,,	१– ०–०
१२	शान्ति-मयूखः	,, ,, ,, ,, ,,	२– ०–०

एते सर्वेऽपि मयूखा मुंबय्यां फोर्ट– एल्फिन्स्टन् सर्कल– प्रविभागे 'गुजराती' मुद्रणयन्त्रालये मुद्रयित्वा तदधिपैः–नटवरलाल-इच्छाराम-देशाई-प्रभृतिभिः श्रेष्ठिवरैस्तत्रैव प्रकाशिताः ।

प्रास्ताविकमत्र किञ्चित् ।

——:०:——

श्रीनीलकण्ठभट्टप्रणीतस्य भगवन्तभास्करस्य दशमोऽयं प्रायश्चित्तमयूखः । 'विहिताननुष्ठाननिषिद्धसेवननिमित्ते विहितं कर्म प्रायश्चित्तम्' (पृ.२पं.२) इति ह्येतदभिमतं प्रायश्चित्तलक्षणम् । वस्तुतस्तु—यथा भट्टपादैः—'तच्चोदकेषु मन्त्राख्या' (मी. सू. २।१।३२) इति सौत्रेऽभिधायकत्वरूपे मन्त्रलक्षणे वैदिकयाज्ञिकानां मन्त्रत्वेन प्रसिद्धेषु 'वसन्ताय कपिञ्जलानालभेत' इत्यादिष्वव्याप्तेर्यत्र वैदिकयाज्ञिकानामभियुक्तानां मन्त्र इति प्रसिद्धिः, स मन्त्र इति स्वीकृतम्; तथेहापि यत्राभियुक्तानां प्रायश्चित्तमिति प्रसिद्धिस्तत् प्रायश्चित्तमिति स्वीकरणमेव सरलमतीनां युक्तम् ।

"इदं च प्रायश्चित्तं निमित्ते विधानात् नैमित्तिकम्, पापनाशकतया काम्यं च" (पृ. २ पं. १३) । तत्र केचिदाहुः—प्रायश्चित्तस्य नैमित्तिकत्वेन तदकरणेऽपि प्रत्यवायान्तरापत्तिर्दुर्वारेति । तद्वार्तमेव, नैमित्तिकत्वावगतौ आवश्यकत्वनिर्वाहार्थं हि नैमित्तिकाकरणे प्रत्यवायः कल्प्यते । प्रायश्चित्ते तु तन्नाश्यदोषेणैवावश्यकत्वनिर्वाहात् प्रायश्चित्ताकरणे पापम्, तत्र च प्रायश्चित्तान्तरम्; इत्यनवस्थानाच्च न पापान्तरं कल्प्यते । किञ्च—निषिद्धक्रियोत्तरं प्रायश्चित्ते कालविलम्बानुसारेण तदाधिक्यस्योक्तत्वात् तत्र भवन्मते प्रतिक्षणमनन्तपापकल्पनापत्तिः स्यात् । अस्मन्मते तु कालविलम्बे निमित्ते पूर्वपापनाशार्थमेव नैमित्तिकी प्रायश्चित्ताधिक्यकल्पनेति लाघवम् ।

ननु कालविलम्बेन पापाभावेऽविलम्बितप्रायश्चित्तानुष्ठानानुपपत्तिरिति चेत्—न; प्रायश्चित्ताधिक्यभयेन तदुपपत्तेः । अतश्च—'विहितस्याननुष्ठानात्—'(याज्ञ. ३।२१९) इत्यादि यथा काम्यानुष्ठाने, यथा वा क्रत्वङ्गप्रेषप्रायश्चित्ताननुष्ठाने न प्रवर्तते; एवं पुरुषार्थविहितप्रायश्चित्तानुष्ठानेऽपि न प्रवर्तते । किन्तु यत्र नैमित्तिकनाश्यदोषाभाव उपरागस्नानादौ, तत्रैव प्रवर्तत इति । पापनाशकत्वं च प्रायश्चित्तस्य शास्त्रादेव सिद्धम् । तथा च पुराणम्—

'व्यतिक्रमाद्यथा पुत्र ! दोषोत्पत्तिर्भवेदिह ।
प्रायश्चित्तात्तथैवेह दोषक्षय इति श्रुतिः ॥' इति ।

'नाभुक्तं क्षीयते कर्म' इत्यादि तु अकृतप्रायश्चित्तपापपरमिति न कोऽपि

विरोध इत्याद्याकरग्रन्थे विस्तरेण प्रपञ्चितम्। तत्र निमित्तानामनेकत्वात् पापानामप्यपर्यन्तत्वात् देशकालाद्युपाधिभेदाच्च बहुधा भिन्नानि तानि प्रायश्चित्तानि मुनिवचसां समन्वयपूर्वकं संग्रहेण यथान्यायं व्यवस्थापनेन च सम्यगेव प्रतिपादयन्नयं ग्रन्थः सर्वोपरि वरीवर्ति। स चायं त्रिचतुर्वारमन्यत्र मुद्रितोऽपि नूनमशुद्धिभूयिष्ठः, पङ्क्तिपाताकुलः, दुश्छिन्नवाक्यविसंष्ठुलश्वासीदिति पुनस्तच्छोधनाय प्रवृत्ता वयम्।

१ पूर्वमुद्रितानि सर्वाणि पुस्तकानि, २ विविधविद्याविशारदैः वे. शा. सं. धनरयामशास्त्री जावडेकर, सांखळी, इत्येतैः स्वग्रन्थसंग्रहाद्वितीयमेकम्, ३ श्रीमद्धालशामगवत्यर्चकैः श्री. रामकृष्ण लक्ष्मण अभिषेकी– महादल– इत्येतैर्वितीर्णे काश्यां शङ्करभट्टेन लिखितं जरत्तरमपरं चैतत्पुस्तकमवलम्ब्य निरवर्तिष्महि संस्करणमदस्रीयम्। यथामनीषमयतिष्महि च पूर्वोपदर्शितसकलदोषपरिमार्जनाय। तथा 'प्रतारकैराहृतमत्र किञ्चिन्मया तु निर्मूलतया तदुज्झितम्।' इति ग्रन्थकर्त्रैव व्यतिरेकमुखेन सूचितस्यात्मनाहृतवचसां समूलत्वस्य सत्यतां प्रत्याययितुं महता प्रयत्नेन तेषामाकरस्थाननिर्देशमप्यकुर्महि।

अस्मिन् ग्रन्थे धर्मशास्त्रमात्रप्रसिद्धशब्दानां बाहुल्यात्, उदाहृतवचस्सु सन्दर्भशुद्धिवैकल्यात्, तत्र तत्र मीमांसाप्रक्रियानुसरणाच्च समुद्भूतां दुर्बोधतां दूरीकर्तुं क्वचिदपेक्षितान् विशेषानुपस्थापयितुं चानेकधर्मशास्त्रग्रन्थेभ्यो व्याख्यातार्थान् विचित्य 'तत्त्वदर्शिनीं' नाम तनीयसीं टिप्पणीमप्यतनुम। सर्वथा तथा संस्कृतोऽयं यथा पूर्वतनानि सर्वाण्यपि प्रकाशनान्यतिशेशयिष्यतीति विश्वसिमः।

एकादशः शुद्धिमयूखोऽप्यनयैवावृता संस्कृतो नचिरात् गुजरातीमुद्रणालयत एवाविर्भविष्यतीत्युद्घोषणमप्यत्र प्राप्तकालं मन्यामहे।

इत्थमास्थितेऽपि यथाशक्ति यत्नेऽस्माकमल्पज्ञत्वात्, मुद्रणयन्त्रस्य दूरस्थत्वाच्चावश्यम्भाविषु दोषविशेषेषु 'प्रायश्चित्तप्रदानेनानुगृह्णन्तु भवन्तः' इति तत्रभवतः सभ्यान् सम्प्रार्थ्यात्रैव तिष्ठासामः।

'सच्छास्त्रपूतपदपद्धतिवञ्चितापि वैदग्ध्यलेशरहितापि कृतिर्मदीया।
यत्स्वीकृता सहृदयैः सदयं सुधीभिर्वाणि त्वदीयकरुणापरिणाम एषः॥'

प्राञ्जपादपांसुः—

महाशालिक्षेत्रम्, गोवा
१८६२ दीपावली

अनन्तयज्ञेश्वरशर्मा धूपकरः।

॥ श्रीः ॥

प्रायश्चित्तमयूखस्थविषयानुक्रमणिका ।



विषयः	पृष्ठम्
मङ्गलम्	१
प्रतिज्ञा	,,
प्रायश्चित्तस्य पापशुद्धिहेतुत्वम्	,,
प्रायश्चित्तलक्षणम्	२
प्रायश्चित्तपदस्य योगार्थः ...	,,
प्रायश्चित्तस्य नैमित्तिकत्वं काम्यत्वं च ...	,,
प्रायश्चित्तेऽधिकारः ...	३
शूद्रस्य विशेषः	,,
स्त्रीणां व्यभिचारजानां चाधिकारः	४
क्षत्रियादिषु पादोनादि ...	,,
आश्रमिणां विशेषः ...	५
बालस्य विशेषः	,,
उपनयनादर्वाक्	६
प्रयोजकपित्रादीनां फलम् ...	७
औषधाद्युद्देशे न दोषः ...	,,
मरणफलकमन्यूत्पादने ...	८
निमित्तिदोषापवादः ...	,,
आततायिवधे दोषाभावः ...	९
आततायिलक्षणम्	,,
आततायिविप्रवधे	१०
कामाकामकृतप्रायश्चित्तव्यवस्था	,,
तत्प्रसङ्गलक्षणम्	१३
प्रायश्चित्तातिदेशः	,,
अतिदेशेऽर्द्धादिव्यवस्था ...	१६

विषयः	पृष्ठम्
कर्मविपाकः	१६
पर्षत्	२१
पर्षदुपस्थानम्	२२
पापिनं प्रति प्रश्नादि ...	२३
प्रायश्चित्तोपदेशः	,,
उपदेशकत्वे प्रायश्चित्तम् ...	२४
दुर्बलेऽनुग्रहः	,,
प्रायश्चित्तेतिकर्त्तव्यता ...	२५
स्त्रीशूद्रयोः प्रतिनिधिविचारः	२६
शूद्रे पञ्चगव्यम्	२७
वपनम्	,,
तत्र सधवानां विशेषः ...	२८
वपनप्रकारः	,,
वपनकालापवादादि ...	२९
वपनाभावे व्रतद्वैगुण्यम् ...	३०
भस्मस्नानम्	,,
गोमयस्नानम्	३१
मृत्तिकास्नानम्	,,
वारिस्नानम्	३२
पञ्चगव्यस्नानम्	३३
प्रायश्चित्ताचरणपर्यन्तं धर्माः	,,
होमजपादिविधिः	३४
ब्राह्मणभोजनादि	३५
अशक्तौ प्रायश्चित्तमन्यद्वाराकार्यम्	३६
व्रतभङ्गे प्रायश्चित्तम्	,,

विषयः	पृष्ठम्
प्रायश्चित्तप्रयोगः	३७
कृच्छ्रादिस्वरूपम्	४१
प्राजापत्यः	४२
कृच्छ्रातिकृच्छ्रः	४३
पराकः	,,
मासोपवासकृच्छ्रः	,,
यावककृच्छ्रः	,,
तप्तकृच्छ्रः	,,
ब्रह्मकूर्चः	४४
पञ्चगव्यहोमादि	४५
कपिलादिलक्षणानि ...	,,
सान्तपनम्	४६
महासान्तपनम्	,,
अतिसान्तपनम्	४७
तुलापुरुषकृच्छ्रः	,,
चान्द्रायणम्	,,
तस्य यवमध्यादिभेदाः ...	,,
चान्द्रायणे ग्रासपरिमाणम् ...	४८
चान्द्रायणे एकादश्याद्युपवासनिर्णयः	,,
चान्द्रायणविधिः	४९
चान्द्रायणप्रयोगः	५०
सोमायनम्	५१
प्राजापत्यादिप्रत्यान्नायाः ...	५२
सुवर्णनिष्कादिमानम् ...	५३
तीर्थप्रत्यान्नायाः	५८
पातित्यहेतवः	६१
साधारणप्रायश्चित्तानि ...	६४
महापापसाधारणप्रायश्चित्तानि	६६
पापभेदाः	६८
ब्रह्महत्याप्रायश्चित्तम् ...	,,
जातिमात्रविप्रवधे	७०

विषयः	पृष्ठम्
निर्गुणषण्ढादिविप्रविषये ...	७१
पतितविप्रवधे	,,
कामतो विप्रवधे	,,
क्षत्रियादीनां विशेषः ...	७२
पतितामिषु विशेषः	,,
पतितस्य सन्ध्यावन्दनम् ...	७३
ब्रह्महत्याव्रतातिदेशः ...	,,
आग्नेय्यादिवधे	,,
आग्नेयीस्त्रीलक्षणम्	,,
सवनस्थक्षत्रियादिवधे ...	७४
श्रोत्रियवधे	७५
विप्रे दण्डोद्यमादौ	,,
मिथ्याभिशंसने	,,
मिथ्याभिशस्तस्य	७६
जातिमात्रक्षत्रियादिवधे ...	,,
धनहर्तृप्रेतक्रियाया अकरणे ...	७७
अज्ञानाद्वृत्तक्षत्रियादिवधे ...	,,
व्यभिचारोत्पन्नवधे	,,
चण्डालान्त्यजादिवधे ...	७८
स्त्रीवधे	७९
ब्राह्मण्यादीनां वधे	,,
व्यभिचरितब्राह्मण्यादिवधे ...	८०
गोवधे	,,
विशिष्टायां गवि	८२
गोगर्भवधे	,,
काष्ठलोष्टादिभिर्गोवधे... ...	८३
दण्डलक्षणम्	८४
रोधबन्धादिना विपत्तौ ...	,,
औषधादिना विपत्तौ ...	८५
ग्रामदाहादौ	,,
अतिदाहादौ	८६
शृङ्गभङ्गादौ	८८

विषयः	पृष्ठम्
वृषवधे	९०
गजादिवधे	,,
सिंहव्याघ्रादिवधे	९१
सर्पवधे	,,
खरमार्जारादिवधे	९२
हंसबलाकादिवधे	,,
सास्थिनिरस्थिप्राणिवधे ...	९६
आत्मघाते	,,
आत्मघाताध्यवसाये ...	९७
वैधं मरणमध्यवसाय त्यागे ...	,,
अनुगमनान्निवृत्तौ	९८
आत्मघातिप्रेतक्रियायाम् ...	,,
अपमृत्यौ	९९
ऊर्ध्वोच्छिष्टादिमरणे ...	,,
पर्य्युषितशवदाहे	१००
द्विजस्य शूद्रप्रेतानुगमने ...	,,
सुरापाने	,,
सुरालक्षणम्	१०१
पानशब्दार्थविचारः	१०३
कामतः सकृत्पाने	१०४
अज्ञानतः सकृत्पाने	,,
अपर्युषितमद्यपाने	,,
सुरासंस्पृष्टद्रव्यभक्षणे ...	,,
अभक्ष्यभक्षणे	१०५
तमाखुभङ्गादिभक्षणे ...	,,
लशुनादिभक्षणे	,,
गृञ्जनपदार्थनिर्णयः	१०६
अनिर्दशाया गोः क्षीरपाने ...	१०९
उष्ट्र्यादिक्षीरपाने	,,
कपिलाक्षीरपाने शूद्रस्य ...	,,
मांसभक्षणे	११०
नरादिमांसभक्षणे	,,
क्वचिन्मांसभक्षणानुज्ञा ...	१११

विषयः	पृष्ठम्
ब्रह्मचारिणो मधुमांसभक्षणे ...	११३
शरीरमलभक्षणे	११४
केशादिभक्षणे	,,
क्रियादुष्टभक्षणे	११५
उच्छिष्टभक्षणे	,,
पीतोच्छिष्टपाने	११६
स्त्रीणामुच्छिष्टभोजने ...	,,
स्त्रीभिः सह भोजने	११७
उच्छिष्टापवादः	,,
आपदि शूद्रगृहभोजने ...	,,
दीपोच्छिष्टभक्षणे	,,
श्राद्धभोजने	११८
अनुक्तप्रायश्चित्तविषये ...	१२०
आमश्राद्धे ब्रह्मौदनादौ च ...	,,
संस्कारान्नभोजने	,,
हस्तदत्तादिभक्षणे	१२१
पर्यायदत्तान्नभोजने	,,
शूद्रहस्तभोजनादौ	,,
वृथापाकान्नभक्षणे	,,
पङ्क्तौ एकेन पात्रत्यागे ...	१२२
निन्दितपङ्क्तिभोजने	,,
अभोज्यान्नाः	१२३
अभोज्यान्नापवादाः	,,
रजकान्ने	१२५
कापालिकान्ने	१२६
चाण्डालान्ने	,,
म्लेच्छादिभिर्बलाद्भोजितस्य	१२७
आशौच्यन्ने	१२८
म्लेच्छादीनां पुष्करिणीजलपाने	१२९
अन्त्यजभाण्डजलपाने ...	,,
शूद्रोदकपाने	,,
प्रपादिजलपाने	१३०

विषयः	पृष्ठम्
संसर्गदुष्टभक्षणे	१३१
रजस्वलादिस्पृष्टभक्षणे ...	,,
श्वादिस्पृष्टभोजने	,,
पाकोत्तरं केशकीटादिपाते ...	१३२
चाण्डालादिदृष्टे	,,
तत्स्पृष्टभक्षणे	,,
क्लीबादिदृष्टे	,,
काकादिस्पृष्टापवादः ...	१३३
अस्थ्यादिदूषिताशने ...	,,
शवदूषितजलपाने	,,
शवदूषिते स्नानमात्रे ...	१३४
गुणदुष्टाशने	,,
उद्धृतस्नेहादिषु	१३५
पर्युषितापवादः	१३६
अहुतान्नभोजने	,,
शूद्रभाजनादौ	,,
भिन्नभाण्डापवादः	,,
वटार्कादिपत्रेषु भोजने ...	,,
कालदुष्टाशने	१३७
अपोशनमकृत्वा भोजने ...	,,
यज्ञोपवीतं विना भोजने ...	,,
भुञ्जानस्य रेतोविण्मूत्रादुत्सर्गे	,,
स्नाननिमित्ते सत्यस्नातभोजने	१३८
स्थितप्रह्वादिभोजने	१३९
वाग्दुष्टभावदुष्टाशने	,,
सुवर्णस्तेये	१४०
कामतः सुवर्णस्तेये	१४३
सुवर्णस्तेयसमेषु	१४४
पुरुषकृत्यश्वादिहरणे	१४५
अल्पमूल्यरत्नादिहरणे ...	,,
धान्यहरणे	१४६

विषयः	पृष्ठम्
कुम्भद्रोणादिमानम्	१४६
देवद्रव्यापहारे	१४७
वृत्त्युच्छेदे	,,
स्तेयापवादः	,,
अगम्यागमने	१४८
गुरुतल्पगमने	,,
व्यभिचरितसवर्णमातरि ...	१४९
जनन्यतिरिक्तगुरुभार्यायाम् ..	,,
शूद्रस्य विप्रागमने	१५०
गुरुभुक्तासु साधारणस्त्रीष्वपवादः	
भगिन्यादिगमने	,,
अन्त्यावसायिनः	१५१
राज्ञीप्रव्रजितादिगमने ...	१५२
चण्डाल्यादिगमने	,,
स्नुषादिगमने	१५३
भ्रातृभार्यागमने	,,
आचार्योपाध्यायादिभार्यागमने	१५४
सखिभार्याभ्रष्ट्रादिगमने ...	१५५
क्षत्रियवैश्यादिस्त्रीगमने ...	१५७
अनुपभुक्तागमने	,,
व्यभिचरितक्षत्रियादिगमने ...	,,
स्वैरिणीगमने	१५८
बन्धकीगमने	,,
स्वैरिणीबन्धक्योर्लक्षणम् ...	१५९
सर्वत्र गर्भोत्पत्तौ	,,
प्रातिलोम्यव्यवाये	१६०
रजस्वलागमने	१६१
तत्र दिनभेदाद्विशेषः... ...	१६२
अन्त्यजागमने	१६३
अन्त्यजाः	,,
स्त्रीणां व्यभिचारे	१६५

विषयः	पृष्ठम्
गर्भोत्पत्तौ	१६८
गर्भिण्या व्यभिचारे ...	,,
अन्त्यजादिगमने	१६९
पशुगमने	१७२
व्रतलोपे	१७३
स्वप्ने रेतस उत्सर्गे	१७६
वानप्रस्थयत्यो रेतउत्सर्गे ...	,,
स्त्रीसम्भोगमन्तरेण रेतउत्सर्गे	,,
नैष्ठिके विशेषः	१७७
वेदव्रतलोपे	१७८
परिवेदने	१७९
देशान्तगते विशेषः ...	१८१
अग्रेदिधिषुदिधिष्वोः परिणयने	१८२
पर्याहितपर्याधात्रोः	१८३
संसर्गप्रायश्चित्तानि ...	,,
संसर्गभेदाः	,,
तत्र प्रायश्चित्तम्	१८८
पतितस्वामिकान्नभोजने ...	१९०
पतितोच्छिष्टभक्षणे	१९१
निषिद्धस्पर्शे	१९२
चाण्डालादिस्पर्शे	,,
नग्नलक्षणम्	१९३
क्रव्यादश्वादिस्पर्शे	,,
कापालिकादिस्पर्शे	१९४
वायसादिस्पर्शे	१९५
रात्रौ स्नानप्राप्तौ	१९६
शिशोर्विशेषः	,,
म्लेच्छार्यैः सम्भाषणे ...	१९७
चण्डालादुपदेशग्रहणे ...	१९८
चाण्डालसङ्करे	,,
तदुच्छिष्टादिस्पर्शे	२०१

विषयः	पृष्ठम्
उच्छिष्टस्य मद्यादिस्पर्शे ...	२०२
उच्छिष्टस्य पुरीषस्पर्शे ...	२०४
उच्छिष्टस्य चाण्डालस्पर्शे ...	,,
द्रव्यहस्तस्योच्छिष्टस्पर्शे ...	२०५
उच्छिष्टस्य मूत्रादिकरणे ...	,,
उच्छिष्टस्य सूर्यादिदर्शने ...	,,
नीलीवस्त्रपरिधाने	२०६
रुदनिर्माल्यस्पर्शे	२०७
रजस्वलाया अस्पृश्यस्पर्शे	,,
रजस्वलयोः सपत्न्योः स्पर्शे ...	,,
असपत्न्योः सवर्णयोः स्पर्शे ...	,,
असवर्णास्पर्शे	,,
पतितचाण्डालादिस्पर्शे ...	२०८
उपवासासमर्थायाम्	२०९
चाण्डालेन सहैकवृक्षारोहणे..	२१०
भोजनकाले श्वान्त्यजादिस्पर्शे...	,,
उच्छिष्टयोः परस्परं स्पर्शे ...	२११
उच्छिष्टद्विजसंस्पर्शे ...	,,
भोजनकाल रजस्वलान्तरं स्पृष्ट्वा भोजने	,,
चाण्डालदर्शने	२१२
श्वादिदर्शने	,,
आशौचिस्पर्शे	,,
आशौचिनं स्पृष्ट्वा भोजनादौ	,,
आशौचिस्पर्शे स्नानात्प्राप्रजोदर्शने..	,,
बन्धुमरणश्रवणादौ	,,
रजस्वलायाः स्नाने विशेषः...	२१३
परम्परास्पर्शे	,,
अचेतनव्यवधाने	,,
चेतनव्यवधाने	,,

विषयः	पृष्ठम्
एकशाखारोहणे	२१४
स्पर्शप्रायश्चित्तापवादः ...	,,
चैत्यवृक्षादिस्पर्शे	२१५
श्वादिदंशे	,,
भेरूर्ध्वं दंशे	,,
ब्रह्मचारिणः श्वादिदंशे ...	२१६
व्रतस्थस्य श्वदंशे	,,
ब्राह्मणरहितग्रामे श्वदंशे ...	,,
स्त्रीणां विशेषः	२१७
व्रतस्थस्त्रीविषये	,,
रजस्वलायां विशेषः	,,
शुनाघ्रातादिषु	,,
व्रणे कृम्युत्पत्तौ	२१८
वर्णभेदेन प्रायश्चित्तभेदः ...	,,
नाभेरुपरि विशेषः ...	२१९
उपपातकानि	,,
गोवधे	२२०
व्रात्यतायाः	,,
ऋणानपाकरणे	२२२
अनाहिताग्नितायाम् ...	२२३
अविक्रेयविक्रये	२२४
अविक्रेयाणि	२२६
गोविक्रये निन्दा	,,
मृतकाध्यापकभृतकाध्यापितयोः	२२७
पुत्रविक्रये	२२८
कन्याविक्रये	,,
याज्ययाजने	,,
चाण्डालादिसन्निधौश्रुत्यादिपाठे	२२९
पितृमातृसुताचार्यभार्यात्यागे...	,,
कन्यासन्दूषणे	,,
अग्नित्यागे	२३०

विषयः	पृष्ठम्
कौमारदारत्यागे	२३२
द्रुमच्छेदे	,,
व्यसनेषु	२३४
शूद्रसेवादौ	,,
अनाश्रमे	,,
अभिचारे	२३५
असत्प्रतिग्रहे	,,
दुष्टप्रतिग्रहनिषेधः	,,
तीर्थतीरक्षेत्रादिलक्षणम् ...	२३७
प्रतिगृहीतद्रव्योत्सर्गः ...	२३९
कौशीलव्ये	२४०
गुरोर्निर्बन्धे	,,
जातिभ्रंशकराणि, तेषुप्रायश्चित्तंच	२४२
सङ्करीकरणानि	,,
अपात्रीकरणानि	,,
मलिनीकरणानि	,,
तेषु प्रायश्चित्तम्	२४४
प्रकीर्णानि प्रायश्चित्तानि	,,
वेदविक्रावने	,,
नित्यकर्माकरणे	,,
नित्ययज्ञाकरणे	,,
पञ्चमहायज्ञाकरणे	२४६
ऋतौ पत्न्यगमने	,,
पत्न्याः पत्यननुसरणे	,,
इन्द्रधनुर्दर्शनादौ	२४७
अनापदि भैक्षचर्ये ...	,,
पङ्क्तौ विषमदाने ...	,,
दण्डोत्सर्गे	२४८
क्षत्रियाद्यभिवादने	,,
देवादीनामभिमुखं धीवने ...	,,
मण्डपोद्यानदेवतागारादिभेदने...	,,

विषयः	पृष्ठम्
मन्त्रोद्धारादि	२४९
पत्न्या भर्तुरतिक्रमे ...	,,
पर्वणि मैथुने	,,
वमने	,,
यज्ञोपवीतादिनाशे	,,
अभ्युदितादिलक्षणम् ...	२५०
संस्कारातिपत्तौ	,,
गर्भाधानाकरणे	२५१
श्रुतादौ	,,
संवत्सरं क्रियातिपाते ...	,,
निमन्त्रणं गृहीत्वा तत्त्यागे ...	२५२
अनृतवचनादौ	,,
निषिद्धदेशगमने	,,
कर्मनाशाजलस्पर्शादौ ...	,,
खरयानाद्यारोहणे	२५३
खरोष्ट्राद्यारोहणे	,,
दिवा मैथुनादौ	
अनुदकमूत्रपुरीषकरणे ...	२५४
अप्सु मूत्रपुरीषोत्सर्गे ...	,,
स्वपुरीषदर्शनादौ	२५५
यज्ञोपवीतं विना मूत्रपुरीषोत्सर्गे	,,
पलाशासनयानाद्यारोहणे ...	२५६
निषिद्धकाष्ठेन दन्तधावने ...	,,
अन्तरागमने	,,
ब्रह्मचारिधर्मलोपे	,,
क्षत्रियस्य रणे पृष्ठदर्शने ...	२५७
गृहीतव्रतभङ्गे	,,
ब्राह्मणस्य क्षत्रियादिवृत्त्या धनार्जने	२५८
स्त्रीधनोपजीवने	,,
भार्याया मुखमैथुने	२५८

विषयः	पृष्ठम्
गोयुक्तयानादिषु मैथुने... ...	,,
भार्यां त्वं मात्रा सदृशीत्युक्त्वा पुनर्गमने	२५९
बस्तिकर्मणि	,,
देवालयशिलादिना स्वगृहकरणे	,,
वानप्रस्थयतिव्रतभङ्गे ...	२६०
व्रतोपव्रतानि	,,
जले प्रतिबिम्बदर्शने	,,
प्रतिश्रुत्याददतोक्तौ	,,
भोजनकालीनमौनत्यागे ...	२६१
पशुवन्मुखेन जलपाने ...	,,
असपिण्डैः सह रोदने ...	,,
प्रेतालङ्करणे	,,
प्रेतानुगमने	,,
ब्राह्मणस्य शूद्रप्रेतानुगमने ...	२६२
कन्याया विवाहात् पूर्वं रजोदर्शने	,,
श्राद्धोपवासदिने दन्तधावने...	,,
पतितत्यागविधिः	२६३
नियमविधिः	,,
स्त्रीत्यागे विशेषः	२६४
रहस्यप्रायश्चित्तम्	२६५
साधारणप्रायश्चित्तानि ...	२६६
ब्रह्महादिषु	२७०
सुरापाने	२७२
सुवर्णस्तेये	२७३
गुरुतल्पगमने	२७४
उपपापादिषु	२७५
अभक्ष्यभक्षणे	२७६
सर्वपापेषु	२७७
उपसंहारः	२७८

प्रायश्चित्तमयूखे प्रमाणत्वेनोपात्तग्रन्थग्रन्थकृन्नामानि ।

अङ्गिराः
अत्रिः
अपरार्कः
आचारमतम्
आचारमाधवीयम्
आदिपर्व
आपस्तम्बः
आश्वलायनः
उशनाः
ऋग्विधानम्
ऋग्वेदः
ऋष्यशृङ्गः
कण्वः
कल्पतरुः
कलिवर्ज्यनिर्णयः
कश्यपः
कात्यायनः
कालिकापुराणम्
कार्ष्णाजिनिः
कुमारः
कोशः
कौथुमब्राह्मणम्
कौर्मम्
क्रतुः
गदेवलः
गरुडपुराणम्
गार्ग्यः
गालवः
गौतमः
चतुर्विंशतिमतम्
च्यवनः
छागलेयः
जमदग्निः
जातूकर्ण्यः
जाबालः
जाबालिः
जिकनः
ज्येष्ठभ्रातृचरणाः
टोडरानन्दः
तैत्तिरीयकम्
दक्षः
दानधर्मः
देवलः
द्वैतनिर्णयः
धर्मप्रकाशः
धर्मविवृतिः
धौम्यः
नारदः
निबन्धकृतः
पद्मपुराणम्
पराशरः
पारस्करः
पितामहचरणाः
पुराणम्
पुलस्त्यः
पैठीनसिः
प्रचेताः
प्रजापतिः
प्रभासखण्डम्
प्रयोगपारिजातः
प्राचः
प्राजापत्यः
प्रायश्चित्तविवेकः
बादरायणः
बौधायनः
बृहन्नारदीयम्
बृहन्मनुः
बृहत्प्रचेताः
बृहत्संवर्तः
बृहद्यमः
बृहद्वसिष्ठः
बृहद्विष्णुः
बृहद्व्यासः
बृहस्पतिः
ब्रह्मगर्भः
ब्रह्मपुराणम्
ब्रह्माण्डपुराणम्
भवदेवः
भगवद्गीता
भरद्वाजः
भर्तृयज्ञः
भविष्यपुराणम्
भारद्वाजगृह्यम्
मदनः

मदनपारिजातः
मदनरत्नम्
मध्यमाङ्गिराः
मनुः
मरीचिः
महाङ्गिराः
महाभारतम्
महार्णवः
माधवः
मार्कण्डेयः
मार्कण्डेयपुराणम्
मिताक्षरा
मेधातिथिः
यमः
याज्ञवल्क्यः
योगयाज्ञवल्क्यः
योगी
योगीश्वरः
लघुपराशरः
लघुविष्णुः
लघुहारीतः
लिङ्गपुराणम्
लिखितः
लीलावती
लौगाक्षिः
वराहपुराणम्
वसिष्ठः
वह्निपुराणम्
वाचस्पतिमिश्राः
वायवीयम्
विज्ञानेश्वरः
विश्वामित्रः
विष्णुः
विष्णुधर्मोत्तरम्
विष्णुपुराणम्
विष्णुरहस्यम्
वृद्धगार्ग्यः
वृद्धपराशरः
वृद्धयाज्ञवल्क्यः
वृद्धवसिष्ठः
वृद्धविष्णुः
वृद्धशातातपः
वृद्धहारीतः
वैवस्वतः
वैशम्पायनः
व्यवहारमयूखः
व्याघ्रः
व्याघ्रपादः
व्यासः
शाट्यायनिः
शातातपः
शिवपुराणम्
शूलपाणिः
शौनकः
शङ्कराचार्याः
शङ्खः
शाण्डिल्यः
श्राद्धमयूखः
श्राद्धहेमाद्रिः
श्रीपतिः
श्रुतिः
षट्त्रिंशन्मतम्
समयमयूखः
साम्बः
सुमन्तुः
सूतसंहिता
सूत्रम्
संवर्तः
संस्कारमयूखः
स्मृत्यन्तरम्
स्मृत्यर्थसारः
स्मृतिसङ्ग्रहः
हरदत्तः
हारीतः
हेमाद्रिः

पृ.	पं.	अशुद्धम्	शुद्धम्
३०६	२५	शुनादिसाहचर्यात्	लशुनादिसाहचर्यात्
२५२	२१	कर्मनाशाज्जलस्पर्शादौ	कर्मनाशाजलस्पर्शादौ
२५२	२२	कर्मनाशाज्जलस्पर्शात्	कर्मनाशाजलस्पर्शात्
२६३	१८	नियमनविधिमाह	निनयनविधिमाह

शाङ्करभाष्याद्येकादशटीकोपेता

११ टीका-] श्रीमद्भगवद्गीता [११ टीका-

द्वितीयावृत्तिः [प्रथमो गुच्छः] द्वितीयावृत्तिः

अत्रायोजितानां व्याख्यानामयं क्रमः—

१ शाङ्करभाष्यम्, २ आनन्दगिरिकृता शाङ्करभाष्यव्याख्या,
३ रामानुजभाष्यम्, ४ वेङ्कटनाथरचिता रामानुजभाष्यतात्पर्यचन्द्रिका,
५ आनन्दतीर्थीयं माध्वभाष्यम्, ६ तदनुयायिनी जयतीर्थरचिता प्रमेय-
७ हनुमत्कृतं पैशाचभाष्यम्, [दीपिका,
८वेङ्कटनाथकृतं ब्रह्मानन्दगिर्याख्यानंव्याख्यानं,९वल्लभीया तत्त्वदीपिका,
१० तदनुसारिण्यमृततरङ्गिणी, ११ नैलकण्ठीयो भारतभावदीपः—इति।

पृष्ठसंख्या १५९० मूल्यम् रु.१८—०—० डाकव्ययः१—७—०

निम्बार्कीय—तत्त्वप्रकाशिकाद्यष्टटीकोपेता

८ टीका-] श्रीमद्भगवद्गीता [८ टीका-

प्रथमावृत्तिः [द्वितीयो गुच्छः] प्रथमावृत्तिः

अत्रायोजितानां व्याख्यानामयं क्रमः—

(१)निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता-तत्त्वप्रकाशिका,
(२) श्रीमधुसूदनसरस्वतीकृता— गूढार्थदीपिका,
(३) श्रीशङ्करानन्दप्रणीता तात्पर्यबोधिनी,(४)श्रीधरस्वामिकृता सुबोधिनी,
(५) श्रीसदानन्दविरचितः— भावप्रकाशः,
(६) श्रीधनपतिसूरिविरचिता— भाष्योत्कर्षदीपिका,
(७) दैवज्ञपण्डितश्रीसूर्यविरचिता— परमार्थप्रपा,
(८) पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः— अर्थसंग्रहः— इति।

पृष्ठसंख्या १३५० मूल्यम् रु.१०—०—० डाकव्ययः१—८—०

'गुजराती' प्रिन्टिंग प्रेस
सासुन बिल्डिंग, एल्फिन्स्टन सर्कल, कोट-मुंबई

श्रीनीलकण्ठभट्टकृते भगवन्तभास्करे

प्रायश्चित्तमयूखः ।

[दशमः]

अनन्तयज्ञेश्वरकृतया 'तत्त्वदर्शिन्या' टिप्पण्या विभूषितः ।

नमामि भास्वत्पदपङ्कजं तत्
श्रीनीलकण्ठोऽहमथ प्रकुर्वे ।
स्मृत्वोपदेशान् गुरुशङ्करस्य
विनिर्णयं पापविशुद्धिहेतुम् ॥
प्रेतारकैराहृतमत्र किञ्चित्
मया तु निर्मूलतया तदुज्झितम् ।
ऊनोक्तितातो न हि तत्र काचित्
खपुष्पहीनापचितिर्न हीयते ॥
भगवन्तभास्कराख्ये ग्रन्थेऽस्मिन् शिष्टसम्मते च ततः ।
प्रायश्चित्तमयूखः प्रतन्यते नीलकण्ठेन ॥

पापविशुद्धिहेतुत्वं प्रायश्चित्तस्याह याज्ञवल्क्यः—(३।२१९–२०)

'विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ।' इति ।

---

१ क्वचिदत्र 'जज्ञे पितामहतनोः' इत्यादयः श्लोका दृश्यन्ते, ते च आचार-समय-श्राद्ध-प्रतिष्ठा-मयूखारम्भेषु प्रकाशिता एवेत्याम्रेडनभयान्न संगृहीताः ।

—अनिग्रहादिति पर्युदाससंग्रहार्थम्। विहिताननुष्ठाननिषिद्धसेवननिमित्ते विहितं कर्म प्रायश्चित्तम्। प्रारब्धपापनाशार्थे तु कर्मणि तत्पदं गौणम्। माधवविज्ञानेश्वरावप्येवम्।

यत्तु-शूलपाणीयटोडरानन्दयोः-'पापनाशकं कर्म प्रायश्चित्तम्' इति; तन्न, तुलापुरुषादावतिव्याप्तेः, क्रत्वङ्गभ्रेषप्रायश्चित्तेऽव्याप्तेश्च।

एवं प्रायश्चित्तपदस्य रूढत्वे योगमप्याहांगिराः—

'प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥'
(म. स्मृ. ११।४७-प्र. ५) इति।

यत्तु पक्षधरमिश्रभक्तूपाध्यायटोडरानन्दकृतैः-

'प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनम्'।

इति पेठुः, तत्राकरश्चिन्त्यः॥

इदं च प्रायश्चित्तं निमित्ते विधानान्नैमित्तिकम्, पापनाशकतया काम्यं च। अत एव बृहस्पतिः—

'प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते।' इति।

---

१ 'इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः।' (म. ४।१६) इतीन्द्रियप्रसक्तेरपि निषिद्धत्वात् निन्दितसेवनग्रहणेनैव तद्ग्रहणसिद्धेः किमर्थं 'अनिग्रहाच्च' इति पृथगुपादानम्? इत्याशङ्कावारणार्थमाह— पर्युदास इति। पर्युदासः प्रत्ययातिरिक्तेन धातुना वा नाम्ना वा नञः सम्बन्धः। यथा- 'नेक्षेतोद्यन्तमादित्यं' इत्यत्र 'तस्य व्रतं' इत्युपक्रमात् कश्चित्कर्तव्य एवार्थो वक्तव्यः। तदुक्तौ च न नञः प्रत्ययेन सम्बन्धो घटते, कर्तव्यार्थोक्तेरनुपपत्तेरिति तस्मादवतारितो नञीक्षतिना सम्बध्य लक्षणया विधानयोग्यमीक्षणविरोधिनं 'नेक्षे' इत्यनीक्षणसङ्कल्परूपमर्थं प्रतिपादयति; तथाऽत्र 'व्रतानीमानि धारयेत्' (म. ४।१६) इति व्रतशब्दाधिकारात् नञ्श्रवणाच्चेन्द्रियप्रसक्तिप्रतिषेधकः सङ्कल्पो विधीयते। स च भावरूप इति पृथक् संगृह्यत इति भावः।

जाबालः—

'काम्यं नैमित्तिकं चातः प्रायश्चित्तमिति स्थितिः।' इति।

एवं च सर्वाङ्गोपसंहारासामर्थ्येऽप्यधिकारोऽविरुद्धः॥

अत्राधिकारस्त्रैवर्णिकानां तावद्द्विजत्वादप्रतिबद्ध एव। शूद्रस्याप्याहतुः शङ्खलिखितौ—

'कृच्छ्राणि द्विजातीनामेव, नावरस्य, कामं धर्मेप्सोरप्रतिषिद्धः साधारणो हि धर्मो नियमश्च' इति।

—कृच्छ्राणि काम्यानि। धर्मेप्सोः प्रायश्चित्तार्थिनः।

याज्ञवल्क्योऽपि—(३।२६२)

'शूद्रोऽधिकारहीनोऽपि कालेनानेन शुद्ध्यति।' इति।

—अधिकारहीनो जपहोमाधिकारशून्यः। कालः प्रायश्चित्ताधिकरणम्। तस्य विशेषमाहाङ्गिराः—

'तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम्।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम्॥' इति।

स एव—

'शूद्रः कालेन शुद्धयेत गोब्राह्मणहिते रतः।
दानैर्वाऽप्युपवासैर्वा द्विजशुश्रूषया तथा॥' इति।

यत्तु मिताक्षरायां स्मृत्यन्तरे—(३।२६२)

'कृच्छ्राण्येतानि कार्याणि सदा वर्णत्रयेण तु।
कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयते॥' इति;

१ अतः—पापक्षयकामनावदधिकारिकर्तव्यत्वेन, पापनिश्चयवदधिकारिकर्तव्यत्वेन च काम्यत्वं नैमित्तिकत्वं चेति द्वयोरेवावगम्यमानत्वात् जातेष्टिवदधिकारयोः संवलनम्।—इति प्रायश्चित्ततत्त्वे। न चैकस्य कर्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्याङ्गीकारे नित्यानित्यसंयोगविरोधः; 'एकस्य तूभयार्थत्वे संयोगपृथक्त्वम्' (पू. मी. ४।३।१) इति न्यायेन तस्य सुपरिहरत्वात्।

'प्रायशश्च समं चित्तं चारयित्वा प्रदीयते। पर्षदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतम्॥' अस्यार्थः— पापिनां चित्तमतिव्याकुलं भवति, तच्च परिषदा व्रताद्यनुष्ठानेन प्रायशोऽवश्यं समं स्वस्थं कार्यते, तद्व्रतं प्रायश्चित्तपदवाच्यमिति।—प्रा.सु. 'प्रायस्य चित्तिचित्तयोः' इति पारस्करादिगणे (६।१।१५७) पाठात् सुट्। प्रा. कौ.

तत्काम्यकृच्छ्रपरम्।

यत्तु मनुः—(१०।१२६)

'न शूद्रे पातकं किंचिन्न च संस्कारमर्हति।
नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम्॥' इति;

तदर्थमाह मेधातिथिः—द्विजाधिकारिकं भक्ष्याभक्ष्यप्रकरणालशुनादिभक्षणे पापं नाऽस्ति, विहितविवाहाद्यतिरिक्तसंस्कारं च नार्हति। उपवासादावेतस्य न नित्योऽधिकारः, तदकरणान्न प्रत्यवैति। तस्मादेव धर्मादस्य प्रतिषेधनमपि नास्ति, करणेऽभ्युदयोऽस्त्येवेति॥

'वदन्ति केचिद्विद्वांसः स्त्रीणां शूद्रसमानताम्।' (१।७।२१) इति सूतसंहिताद्युक्तेः।

'शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः।' (म. स्मृ. १०।४१) इति स्मृतेश्च, स्त्रीणां व्यभिचारजानां चाधिकारः। अत एव प्रायश्चित्तमपि शूद्रवदेव। तथा च विष्णुः—

'विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतम्।
वैश्येऽर्द्धं पादशेषं तु शूद्रजातिषु शस्यते॥' इति॥

यत्तु कश्यपः—(य. स्मृ. ३।१९)

'विप्रार्द्धं क्षत्रियस्योक्तं तदर्द्धं वैश्यजातिषु।
तदर्द्धमेव शूद्राणां प्रायश्चित्तं विदुर्बुधाः॥' इति;

तदकामकृतविषयमिति माधवः।

यत्त्वङ्गिराः—

'पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता।
वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतम्॥' इति।

भविष्ये—

'चतुर्गुणं तु शूद्राणां पर्षदुक्ता महात्मभिः।
पर्षद्वच्च व्रतं प्रोक्तं शुद्धये पापकर्मणाम्॥' इति।

एतच्च 'प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः'। (२।२०७) इति याज्ञवल्क्योक्तेर्दण्डाधिक्यानुमितदोषगौरवात्प्रातिलोम्यकृतचतुर्विधसाहसरूप्यपरम्।

'द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा।
क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे व्रतम्॥' इति प्रजापत्युक्तेर्विप्रवधपरं च।

आश्रमिणां विशेषमाहाङ्गिराः—

'गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि।
शौचवच्छोधनं प्रोक्तमर्वाग्ब्रह्मनिदर्शनात्॥' इति।

—शौचवद्द्विगुणादि। तथा च मनुः—(९।१३७)

'एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः।
त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम्॥' इति।

गृहस्थोक्तिः स्नातकोपलक्षिका। अन्यथा विधुरादेः प्रायश्चित्तमेव न स्यात्। ब्रह्मनिदर्शनं तत्त्वज्ञानम्। ज्ञानोत्पत्त्यनन्तरं तूत्पन्नं पापं ज्ञानेनैव नाश्यते, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन!' (४।३७) इति भगवद्गीतोक्तेः।

ब्रह्मचारिणो द्वैगुण्योक्तिः षोडशवर्षोर्ध्वम्। षोडशवर्षपर्यंतं त्वाहांगिराः—(ल. अं. ३३ बृ. यमः ३।३ देवलः ३०आप. ३।६)

'अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव च॥' इति।

आदिपर्वणि—(१०८।१७)

'आचतुर्दशकाद्वर्षान्न भविष्यति पातकम्।
परतः कुर्वतामेवं दोष एव भविष्यति॥' इति।

---

१ अत्र पूर्वोदाहृतवचनस्य ब्रह्मचारिषु लब्धावकाशतया कथं बाधकता? तस्मादिह केन किंवा बाध्यमिति विनिगमनं परिभावनीयम्। प्रा. कौ.

२ चतुर्दशाद्ऊर्ध्वं पापमस्तीति पौराणं मतमिदम्। वस्तुतस्तूक्तहेतोः पुण्यपापविभागज्ञानपर्यंतमेव पापानुत्पत्तिः। तेन पञ्चवर्षाद्यन्तर एव दोषो नास्तीत्यादिवचनं विद्वदभिप्रायम्। अन्यथा कलिशेषेऽल्पायुष्ट्वेन पापाभावप्रसङ्गः स्यात्। भा. भा. दी.

अङ्गिराः—

'अर्वाक्तु द्वादशाद्वर्षादशीतेरूर्ध्वमेव वा।
अर्द्धमेव भवेत्पुंसां तुरीयं तत्र योषिताम्॥' इति।

अत्रोचावचावधितारतम्यं शक्तितो ज्ञेयम्।

यत्तु विष्णुः—

'स्त्रीणामर्द्धं प्रदातव्यं वृद्धानां रोगिणां तथा।
पादो बालेषु दातव्यः सर्वपापेष्वयं विधिः॥' इति;

तदुपनयनादर्वाक् ज्ञेयम्।

शङ्खः—(बृ. यमः ३।१-२)

'ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च।
प्रायश्चित्तं चरेद्भ्राता पिता वाऽन्यः सुहृज्जनः॥
अतो बालतरस्यास्य नापराधो न पातकम्।
राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते॥' इति।

कुमारः—

'मद्यमूत्रपुरीषाणां भक्षणे नास्ति कश्चन।
दोषस्त्वा पञ्चमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोः॥' इति।

गौतमः—(१।२।१)

'प्रागुपनयनात्कामचारकामवादकामभक्षाः' इति।
'सुरापाननिषेधस्तु ज्ञात्याश्रय इति स्थितिः।'

इति कुमारवाक्यात्;

'अनुपेतस्तु यो बालो मद्यं मोहादिपेद्यदि।
कृच्छ्रत्रयं गुरुः कुर्यान्माता भ्राता तथा पिता॥'

इति[1] स्मृतेश्चानुपेतस्य दोषोऽस्त्येवेति विज्ञानेश्वरः।

एतद्वचनद्वयस्य पञ्चमवर्षप्रवृत्त्युत्तरपरतयाऽप्युपपत्तेस्तत्रानुपेतस्य दोषः, वर्षचतुष्टयपर्यंतं न दोष इति तु युक्तम्।

यत्तु स्मृत्यन्तरे—(दक्षः १।३-४)

---

१ जातूकर्ण्य— प्रा. मु.

'जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शितः॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते।
तस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते॥'

इति; तन्मद्येतरपरम्।

इदं चार्द्धपादादिपरिमाणमुपदिष्टमौलिकद्वादशाब्दिकाद्येकमपेक्ष्य प्रवर्तते, न तु क्षत्रियादिनिमित्तकद्वैगुण्याद्यपेक्षया। ब्रह्मचारित्वादिनिमित्तकं द्वैगुण्याद्यप्येवम्। अर्द्धपादद्वैगुण्यत्रैगुण्यादिविधीनामुपजीव्योपजीवकभावाभावेन परस्परानालोचनया मौलिकविधिमात्रालोचनेनैव प्रवृत्तेः॥

प्रयोजकपित्रादीनां फलमाहापस्तंबः—(ध. सू. २।२९।१)

'प्रयोजयिताऽनुमन्ता कर्त्ता वेति स्वर्गनरकफलेषु कर्मसु भागिनः' इति।

पैठीनसिः—

'हन्ता मन्तोपदेष्टा च तथा सम्प्रतिपादकः।
प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः॥
आश्रयः शस्त्रदाता च भक्तदाता विकर्मिणाम्।
उपेक्षकः शक्तिमांश्चदोषवक्तानुमोदकः॥
अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्।'

—हन्ता साक्षाद्धन्ता। मन्ताऽनुमन्ता प्रवृत्तप्रवर्त्तकः। उपदेष्टा मार्गोद्घाटनादिकृत्। सम्प्रतिपादकः पलायमानमभित्रमुपरुन्धन् परेभ्यो हन्तारं यो रक्षति। प्रोत्साहकः स्तावकः। सहायः सहगन्ता। अनुमोदको हन्तुर्हर्षमनुपोद्बृंहयति। भक्तपदमौषधादेरप्युपलक्षकम्। एते च निषिद्धक्रियोद्देशे सत्येव दोषभाजः, नान्यथा।

तथा च याज्ञवल्क्यः—(यमः ५० संवर्तः १४०)

'औषधं स्नेहमाहारं दद्याद्रोगार्त्तब्राह्मणे द्विजः।
दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते॥'

तथा— 'दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम्।
द्विजानां गोहितार्थं तु प्रायश्चित्तं न विद्यते॥'

पराशरः—

'कूपखाते च धर्मार्थं गृहदाहे च या मृता।
ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥' इति॥

औषधदाने विशेषमाहाङ्गिराः—

'औषधे तु न दोषोऽस्ति स्वेच्छया तु पिबेद्यदि।
अन्यथा दीयमाने तु प्रायश्चित्तं न संशयः॥' इति।

उद्देष्टुर्मरणफलकमन्यूत्पादने तु विष्णुः—(३।४६)

'आक्रुष्टस्ताडितो वापि धनैर्वाऽपि वियोजितः।
यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम्॥' इति।

तथा– 'ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च।'

उत्तरार्द्धं तदेव। "अयं चाक्रोशकादिर्निमित्तीत्युच्यते" इति निबन्धकृतः। तेन 'निमित्ती पादमाद्ध्यात्' इति पादप्रायश्चित्तमेतस्य भवति।

या तु— 'सन्बन्धेन विना देव! शुष्कवादेन कोपितः।' इति वार्षिकं प्रायश्चित्तं प्रक्रम्य भविष्योक्तिः; सा परिहासकृताऽऽक्रोशपरा।

भविष्ये—

'पुत्रः शिष्यस्तथा भार्या शासतश्चेत्प्रणश्यति।
न शास्ता तत्र दोषेण लिप्यते राजसत्तम!॥'

इदं च पुत्रादीनुपक्रम्य—

'प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा।
पृष्ठतस्तु शरीरस्य नोत्तमांगे न वक्षसि॥
अतोऽन्यथा तु प्रहरन् चोरस्यापोति किल्बिषम्॥'

इति मनूक्तायां (८।२९९–३००) शास्तौ ज्ञेयम्। अधिकशासने तु दोष एव। निमित्तिदोषमपवदति विष्णुः—

'उद्दिश्य कुपितो विप्रस्तोषितः श्रावयेत्पुनः।
तस्मिन्मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते॥'

—तोषितो निमित्तिना। द्वयोरुच्छ्रावणे कृते न दोष इति सम्बन्धः। द्वयोरित्यनेकोपलक्षणम्।

मदनस्तु–"यस्य कस्यचिदुच्छ्रावणे कृते द्वयोराक्रोशकात्मघातयोर्दोषो नास्ति" इत्याह।

विष्णुः—

'असम्बन्धेन यः कश्चिद्द्विजः प्राणान्समुत्सृजेत्।
तस्यैव तद्भवेत्पापं न तु यं परिकीर्त्तयेत्॥'

बृहस्पतिः—

'आक्रुष्टस्तु यदाक्रोशंस्ताडितः प्रतिताडयन्।
हत्वाऽऽततायिनं चैव नाततायी भवेन्नरः॥'

याज्ञवल्क्यः—(३।२८३)

'कृच्छ्रत्रयं गुरुः कुर्यान्म्रियते प्रहितो यदि।' इति।

अत्र सम्प्रतिपादकाख्यानुग्राहकस्य व्यापारबाहुल्यान्मौलिकमेव पादोनम्। आज्ञाप्रार्थनादिना प्रयोजकस्यार्द्धम्। प्रवृत्तप्रवर्त्तकस्यानुमन्तुः सार्द्धपादम्।

'प्रयोजयिताऽनुमन्ता कर्त्ता वेति स्वर्गनरकफलेषु कर्मसु भागिनः। यो भूय आरभते तस्मिन् फलविशेषः' इत्यापस्तंबोक्तेः (ध. सू. २।२९।१–२)। एतेषां प्रायश्चित्तेयत्तायां तु ग्रंथकारा एव प्रमाणम्।

सुमन्तुः—

'तिरस्कृतो यदा विप्रो हत्वाऽऽत्मानं मृतो यदि।
निर्गुणः सहसा क्रोधाद्गृहक्षेत्रादिकारणात्॥
त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमं सरस्वतीम्।[२]
गच्छेद्वाऽपि विशुद्ध्यर्थं तत्पापस्येति निश्चितम्॥'

बृहस्पतिः—

'नाततायिवधे हन्ता किल्बिषं प्राप्नुयात्क्वचित्।
विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्॥'

वसिष्ठः—(३।१९)

'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते ह्याततायिनः॥'

---

१ हत्वा इति पठित्वा आत्मानमेव खड्गादिना प्रहत्येत्यर्थः— इति भट्टोजिदीक्षिताः।

२ प्रतिलोमं अन्ततो मूलपर्यन्तं सरस्वतीं नदीं गच्छेत्। अत्यन्तसंयोगे द्वितीया।

अपरार्के व्यासः—(विष्णुः ५।१८६-८७)

'उद्यतासिं विषाग्निं च शापोद्यतकरं तथा।
आथर्वणेन हन्तारं पिशुनं चैव राजसु॥
भार्यातिक्रमिणं चैव विद्यात्सप्ततायिनः।
यशोवित्तहरानन्यानाहुर्धर्मार्थहारकान्॥'

कात्यायनः—

'अनाक्षारितपूर्वो यत्त्वपराधे प्रवर्त्तते।
प्राणद्रव्यापहारे च प्रवृत्तस्याततायिता॥'

—अनाक्षारितोऽनपकृतः। तेन पूर्वकृतापराधस्य मारणाद्युद्यतस्य नाततायितेति तद्वधे दोष एव। आततायिवधे दोषाभावश्च गोविप्राततायिभिन्नविषय इति मिताक्षरापरार्कादौ; 'नाततायिवधे दोषोऽन्यत्र गोब्राह्मणात्' इति सुमन्तूक्तेः।

कल्पतरौ तु— 'आततायिन्यदोषोऽन्यत्र गोब्राह्मणात्। यदा हन्यात्प्रायश्चित्तं न स्यात्' इति पाठः।

अत्र युगान्तरे युद्धे विप्रवधे प्रायश्चित्ताभावः, युद्धं विना हनने तु प्रायश्चित्तम्। कलौ तु युद्धेऽपि हनने प्रायश्चित्तम्;

'आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम्।'

इति कलिनिषिद्धेषु पाठात्। प्रपञ्चितं चैतत् भ्रातृचरणैः कलिवर्ज्य-निर्णयेऽस्माभिश्च व्यवहारमयूखे। (पृ. १४७-४८)

आततायिवधे प्रायश्चित्तं भविष्ये—

'हत्वा तु प्रहरन्तं वै ब्राह्मणं वेदपारगम्।
कामतश्चेच्चरेद्वीर! द्वादशाब्दाख्यमुत्तमम्॥'

अथ कामाकामकृतप्रायश्चित्तव्यवस्था

बृहस्पतिः—

'कामाकामकृतं त्वेव पातकं द्विविधं स्मृतम्।
पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता॥' इति।

---

१ खलो राजवधोद्योगी पितॄणां च वधे रतः। अनुयायी नृपो राज्ञश्चत्वारश्चाततायिनः॥ (सू. खं. ४८।५९) इति पाद्मे।

२ एवं सति यच्छ्रीरामेण रावणं हत्वा दश जारूथ्या अश्वमेधाः कृता इति रामायणम्, तत् आततायिवधे युगान्तरे सपरिहारो दोष इत्येतदर्थम्।—कृष्णभट्टी। अत्र नीतिमयूखे (पृ. ९९) प्रपञ्चितमप्यनुसन्धेयम्।

यत्तु याज्ञवल्क्यवाक्ये—(३।२२६)

'प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।
कामतो व्यवहार्य्यस्तु वचनादिह जायते ॥'

—इत्यज्ञानपदम्, तदप्यकामपरम्। अत एव तत्प्रतियोगिरूपं कामतः पदं सङ्गच्छते। एवं वाक्यान्तरीयाणि बुद्धिज्ञानाभिसन्धिपदानि कामपराणि, अबुध्यज्ञानानभिसन्धिपदानि चाकामपराणि। तेन बलात्कारिते पापे सत्यपि ज्ञाने न द्विगुणं प्रायश्चित्तम्, तत्प्रयोजक-कामाभावात्।

अत्राकामकृतपापस्य व्यवहारनिरोधिका नरकजनिका चेति शक्ति-द्वयमपि नश्यति प्रायश्चित्तेन। कामकृतस्य तु व्यवहारनिरोधिकैव नश्यति, न तु नरकानुकूलेति विज्ञानेश्वरादयो निबन्धकृतः। एतच्च येष्वाहृत्य व्यवहारो निषिद्धस्तत्परम्।

तानि चाह गौतमः—(३।३।१-२)

'ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसम्बद्धागस्तेननास्तिकनिंदित-कर्माभ्यासिपतितात्याग्यपतितात्यागिनः पतिताः। पातकसंयोजकाश्च'। इति। एतेष्वेव व्यवहारो निषिद्धः, नान्यत्र।

'एनस्विभिरनिर्णिक्तैर्नार्थं कंचित्समाचरेत्।' (११।१८९)

इति मानवीयमेनस्विपदमपि ब्रह्महादिपरमेव। इतरपापेषु तु नरकानु-कूला नाश्यते। सर्वरहस्यपापेषु ब्रह्महत्यादिप्रकाशेषु मरणान्तिकप्रायश्चित्ते चैवम्। व्यवहारनिरोधनाभावेन तदनुकूलशक्त्यभावात्।

श्रीशङ्कराचार्यास्तु—'कामतोऽव्यवहार्यस्तु' (३।२२६) इत्यकारप्र-श्लेषेणेदं याज्ञवल्क्यवचः 'बहिस्तूभयथापि स्मृतेराचाराच्च' (ब्र. सू. ३।४।४३) इति सूत्रे— कृतप्रायश्चित्तनैष्ठिकब्रह्मचार्यादिपरम्।

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुद्धयेत्स आत्महा ॥' (अत्रिः ८।१९) इति;

---

१ 'चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत्।' इत्युत्तरार्धं शातातपस्मृतौ (९८) अत्रिसंहितायां च (८।२५)।

'आरूढपतितं विप्रं मंडलाच्च विनिःसृतम् ।
उद्बुद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् ॥ '

इति च स्मृतेरिति ।

—येन शुद्धयेद्व्यवहारयोग्यो भवेत्तत्प्रायश्चित्तं न पश्यामीति, कृत-प्रायश्चित्तमप्यारूढपतितादिकं स्पृष्ट्वा चान्द्रायणं कुर्यादिति वाक्यद्वयार्थ इत्याहुः ।

तत्सूत्रे वाचस्पतिमिश्रास्तु बालघ्नादिपरमप्याहुः—

'बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संपिबेत् ॥ '

(म. स्मृ. ११।१९० वि. स्मृ. ५४।३२) इति स्मृतेः ।

—न सम्पिबेन्न व्यवहरेत् ।

अत एव याज्ञवल्क्यः—(३।२९९)

'शरणागतबालस्त्रीहिंसकान्संविशेन्न तु ।
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ॥ ' इति

तेनाचार्यमतेऽवकीर्णिनैष्ठिकादिभिर्बालघ्नादिभिश्च कृते प्रायश्चित्ते नरकानुकूला शक्तिर्नाश्यते, व्यवहारनिरोधिका त्वस्त्येव ।

इतरपापेषु कामकृतेष्वपि शक्तिद्वयमपि नाश्यते द्विगुणप्रायश्चित्तेन । तदाहाङ्गिराः—

'विहितं यदकामानां कामात्तद्विगुणं भवेत् ।'

महापापे तु कामकृते मरणमेव । तथा च स एव—

'यः कामतो महापापं नरः कुर्यात्कथञ्चन ।
न तस्य निष्कृतिर्दिष्टा भृग्वग्निपतनादृते ॥ '

तथा—'प्राणान्तिकं तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ।
तत्कामकारविषयं विज्ञेयं नात्र संशयः ॥ '

व्यासः—(म. स्मृ. ११।८९)

'कामतो ब्राह्मणवधे निष्कृतिर्नास्ति जीविनः ।'

---

१ उत्तमाश्रममारुह्य तं परित्यज्याधमाश्रमे । उन्मार्गे वा वर्तमान आरूढपतितः—प. मा. ११।१ ।

२ 'संवसेत्' इति स्मृतिपाठः ।

३ 'निष्कृतिर्न विधीयते' इति पाठान्तरम् ।

'यस्तु सर्वं परित्यज्य यावज्जीवं चरेद्व्रतम्।
स विशुद्धः शुभान् लोकान् विप्रो गच्छेन्न संशयः ॥'

अथ तन्त्रप्रसङ्गौ—तत्रानेकनिमित्तेषु प्राजापत्यादीनां सजातीयानां प्रायश्चित्तानां देशकालकर्त्रैक्ये तन्त्रम्। तत्र चैकस्मिन्निमित्ते प्राजापत्यद्वयम्,एकत्रैकम्,इति विशेषेणग्रहणे द्वयमेव कार्यम्। तेनैवैकप्राजापत्यकार्यमपि सिद्ध्यतीति प्रसङ्गः। यथा गौतमः—(३।४।२९—३०) 'द्वे परदारे। त्रीणि श्रोत्रियस्य' इति सामान्यतः परदारमात्रगमने श्रोत्रियपत्नीगमने च श्रोत्रियपत्नीगमननिमित्तकं त्रैवार्षिकमेव केवलं कार्यम्। तेनैव द्वैवार्षिकसिद्धिः। शङ्खलिखितौ—'गुप्तायां वैश्यायामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत्। क्षत्रियायां द्वे वर्षे। ब्राह्मण्यां त्रीणि वर्षाणि' इति। अत्र तिसृष्वप्यवकिरणेषु ब्राह्मणीनिमित्तकं त्रैवार्षिकमेव कार्यमिति। निमित्तानां व्याप्यव्यापकभावेऽपि व्याप्यनिमित्तेन व्यापकनिमित्तस्य प्रसङ्गतः सिद्धेः। यथा—

'अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने।' (म.स्मृ.११।२०८)
'कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते।'
(या. स्मृ. ३।२९३) इति।

अत्रासृक्पातने सत्यवगूरणनिपातनयोर्ने पृथक्स्वनिमित्तप्रायश्चित्तप्रयोजकतेति। ब्रह्महत्याप्रायश्चित्ते तु तत्प्रकरणे तन्त्रावापौ वक्ष्येते।

अथ प्रायश्चित्तातिदेशः—स त्रिविधः, वाचनिकातिदेशस्तादूप्यातिदेशः साम्यातिदेशश्चेति। तत्र वाचनिकं तावत्, तमाह याज्ञवल्क्यः—(३।२५१)

'यागस्थक्षत्रविट्घाती चरेद्ब्रह्महणि व्रतम्।'

तादूप्यातिदेशमप्याह स एव—(३।२३२—३३)

'पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।' इति।

साम्यातिदेशमप्याह स एव–(३।२२८)

'गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥' इति।

अत्र साम्यातिदेशेऽर्द्धं, तादूप्यवाचनिकयोस्तु पादोनम्। 'राजसमो मन्त्री' इत्यादौ किञ्चिद्धीन एव समपदप्रयोगात्, महापातकातिदेशविषयाणां च पातकसंज्ञत्वात्।

'महापातकतुल्यानि पापान्युक्तानि यानि तु।
तानि पातकसंज्ञानि तन्न्यूनमुपपातकम्' ॥

इति पापकानां महापापापेक्षन्यूनत्वप्रतिपादनाच्चेति विज्ञानेश्वरादयः।

अत्र केचित्– इषौवेकाहे 'समानमितरच्छ्येनेन' इति वाचनिकातिदेशे न्यूनत्वाप्रतीतेरिहापि न न्यूनतेति। 'राजसमो मन्त्री' इत्यादौ तु न्यूनता प्रत्यक्षगम्या। अस्तु वा समशब्देन न्यूनताप्रतीतिकलहः; पादोनार्द्धादीयत्ता तु निष्प्रमाणिकेति।

अत्रास्मज्ज्येष्ठभ्रातृचरणाः—"महापापतुल्येषु पातकसंज्ञेषु विशेषतः प्रायश्चित्तानुक्तेस्तदाकाङ्क्षायामर्थवादे महापापजन्यनरकार्द्धावगतेः प्रायश्चित्तेऽप्यर्द्धता कल्प्यते। तमेवार्थवादमाहाङ्गिराः—

'पातके तु सहस्रं स्यान्महत्सु द्विगुणं तथा।
उपपापे तुरीयं स्यान्नरकं वर्षसंख्यया ॥' " इति।

यत्तु विष्णुः—(४३।३–५)

'अतिपातकिनः पर्यायेण पच्यन्ते कल्पम्। मन्वन्तरं महापातकिनः। अनुपातकिनश्चोपपातकिनश्च चतुर्युगम्' इति; तदभ्यासपरम्। अनुपातकं महापातकतुल्यं पातकसंज्ञम्। तादूप्यवाचनिकातिदेशे तु पादोनमेव। 'ब्राह्मणीपुत्रस्य क्षत्रियायां मातरि गमने पादहान्या द्वादशवार्षिकमेव-

---

१ इषुनामकः श्येननामकश्च द्वावेकाहौ ज्योतिष्टोमविकारौ। तयोरुभयोर्ज्योतिष्टोमधर्माश्चोदकेन प्राप्ताः। ते चोभयत्र समानाः। तच्च समानत्वमिषुप्रकरणेऽनेन वाक्येनानूद्यते। इषौ यो वैशेषिको धर्मो विहितः, तं परित्यज्य इतरचोदकप्राप्तं सर्वं श्येनेन समानमित्यर्थः (जै. न्या. मा. वि. ७।१।२)।

२ दाम्नोदरभट्टाः द्वैतनिर्णयपरिशिष्टकाराः।

मन्यवर्णासु' इति मिताक्षरोक्तस्मृत्या (३।२६०) पादोनं द्वादशाब्दमुक्तम्। तच्च न केवलं हीनवर्णामातृगमन एव, किन्तु 'मातुः सपत्नीम्' (या. ३।२३२) इत्याद्युक्तसर्वैतादृश्यवाचनिकातिदेशविषयम्। सर्वेषां समानधर्मत्वात्। यथाहोशनाः—

'बहूनामेकधर्माणामेकस्यापि यदुच्यते।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः॥' इति।

अत एव मिताक्षरायां (३।२६५) रजक्यादीनां पञ्चानां गमने चान्द्रायणद्वयं प्रायश्चित्तमापस्तम्बोक्तमुक्त्वा—

रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः॥ (अत्रिः६।१६)-

---

१ **रजकः**— 'ब्राह्मण्यां यो मुनिश्रेष्ठ वैदेहेन प्रजायते। स नाम्ना रजको ज्ञेयः पण्डितैः पण्डितोत्तमाः!॥' (सू.सं. १।१२।३५)। 'तीवर्यां धीवरात् पुत्रो बभूव रजकः स्मृतः।' (ब्र. वै. १।१०।११२)। 'पुल्कसाद्वैश्यकन्यायां जातो रजक उच्यते।' (औ. स्मृ. १८) इत्याद्यनेकविधः। २ **चर्मकारः**— 'तीवरेण च चाण्डाल्यां चर्मकारो बभूव ह।' (ब्र. वै. १।१०।१०३)। 'आयोगवेन ब्राह्मण्यां चर्मकारः प्रजायते।' (सू. सं. १।१२।१४०) इत्युक्तः। ३ **नटः**— 'मल्लात्तु पिच्छलस्तेन नटाख्यो जायते भुवि।' (सू. सं. १।१२।४२) मनुस्तु—(१०।२२) 'झल्लो मल्लश्च राजन्यान्व्रात्यान्निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड एव च॥' इत्याह। एतान्येकस्यैव नामानीति कुल्लूकः। ४ **बुरुडः**— 'कर्मचण्डालकात् पुत्रं वैदेही पाण्डुशोपकम्। लेभे बुरुडजातित्वं सदा वंशविदारणम्॥' (शू. क.) ५ **कैवर्तः**— 'क्षत्रवीर्येण वैश्यायां कैवर्तः परिकीर्तितः।' (ब्र. वै. १।१०।१११) इति, 'निषादो मार्गवं सूते दासं नौकर्मजीविनम्। कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः॥' (म. १०।३४) इति, 'आयोगवी च कैवर्ते जज्ञे पारसवात्सुतम्। स हीनः सर्वजातिभ्यो जालं स्वीकृत्य सर्वदा। मत्स्यान् जलचरानन्यान् घातयेदात्मवृत्तये॥ नाव्यं कर्म प्रवहणं नद्यां वर्षासु वाहयेत्। नदीमुत्तारयेल्लोकांस्तेभ्यश्चेच्छेद्धनं तथा॥' इति चोक्तः। ६ **मेदः**— 'वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ।' (म. १०।३६) वैदेहिकात् अन्ध्रमेदाख्यौ कारावरनिषादस्त्रियोरेव क्रमेण जायेते इति कुल्लूकः। ७ **भिल्लः**— 'कारावारी यदा नारी धीवराज्जनयेत् सुतम्। स भिल्लसंज्ञः कथितः कन्दमूलादिजीवनः॥' (जा. भा.)

---इति सप्तान्त्यजस्त्रीगमनेऽपि तदेव प्रायश्चित्तमुशनोवाक्यबलादुक्तम्-—इति युक्तमुत्पश्यन्ति ।

एतेनातिदेशे पूर्णप्रायश्चित्तं वदन्तौ शूलपाणिभवदेवावपास्तौ ।

किंच- सर्वत्र द्वादशाब्दविधित्सायां स्मृतिषु तदुपदेश एव स्यात्, न तु क्वचिदुपदेशः क्वचिच्चातिदेश इति निष्प्रयोजनं द्वैविध्यम् । न चात्रान्यूनतातिरिक्तं सौर्यादिष्विव दर्शपूर्णमासिकातिदेशस्योहादिप्रयोजनमस्ति ।

यच्च भवदेवः—साम्योक्तिरर्थवादः; अन्यथा ब्रह्महत्यासुरापानसमेषु मिथ्योत्कर्षोक्तिवेदनिन्दादिष्वपि द्वादशाब्दं स्यात् । क्वचित्तद्विशेषे मनुष्यहरणे मनुना-(११।१६३) चान्द्रायणादिस्वल्पप्रायश्चित्तान्तरास्नानाच्चेति । तदपि न, मिथ्योत्कर्षोक्तिवेदनिन्दादिषु द्वादशाब्दाद्यपेक्षयाऽर्द्धस्येष्टत्वात्, मनूक्तालपप्रायश्चित्तस्य नीचमनुष्यापहारपरत्वाच्च । इत्यतिदेशः ॥

अथ पापिनामनुतापार्थं कर्मविपाक उच्यते ।

यमः—

'पतितैः सम्प्रयुक्तश्च कृतघ्नो गुरुतल्पगः ।
एते पतन्ति सर्वेषु नरकेष्वनुपूर्वशः ॥

महापातकसंयुक्ता युगं तिष्ठन्त्यधोमुखाः ।
रौरवे कूटसाक्षी च यश्च मिथ्याभिशंसकः ॥
कुलग्राहे पक्षवादी स चाप्यत्र पतेन्नरः ।'

—कुलग्राहे कुलसन्देहे । स एव-

'न्यासापहर्ता कुमतिर्विषमो यश्च वृत्तिषु ।
तप्तकुंभे स्वसृगामी गोघ्नो राजभटाश्च ये ॥'

—राजभटा राजबलेनोपद्रावकाः ।

'महाज्वाले दुहितरं स्नुषां गत्वा च मातरम् ।
अजाविकः शौकरिकस्तेनश्च क्रोधनो नरः ॥

---

१ पतितैः सम्प्रयुक्तो महापातकिसंसर्गिभिः सह ब्राह्मयेनिश्च सम्बन्धैः संयोगतः, साक्षात् सम्बन्धे तु 'यौनसौबमुख्यैस्तु सम्बन्धैः सद्य एव' (वि. स्मृ. ३५।९) इति वचनेन पतितत्वात् ।—कृ. भ. २ 'शुक्लक्षयकरी वन्ध्या त्वजेति परिकीर्तिता । तस्यास्तु यो भवेद्भर्ता तं तु विद्यादजाविकम् ॥' (बृ. य. ३।२४)

रङ्गोपजीवी[1] पशुहा शकुनी[2] ग्रामयाजकः ॥
अभक्ष्यभक्षो वान्ताशी विप्रो धर्मपुरस्कृतः।
अगम्यागामी गरदो नारकं शबलं व्रजेत् ॥ '

—शकुनी पक्षिपोषकः। वान्ताश्युक्तो हेमाद्रौ विष्णुना—

' देशं गोत्रं कुलं विद्यामन्नार्थं यो निवेदयेत्।
वैवस्वतेषु धर्मेषु वान्ताशी स प्रकीर्त्तितः ॥
सर्वज्ञा वयमित्येवमभिमानरता नराः।
वान्ताशिनः परित्याज्याः श्राद्धे दाने च लम्पटाः ॥ ' इति।

' वेदविक्रयिणो ये च केशविक्रयिणस्तथा[4]।
वेदानां दूषका ये च समयानां च दूषकाः ॥
दूषका धर्मशास्त्राणां हेतुवादकुतूहलाः।
एते विहङ्गमे घोरे पच्यन्ते पापकारिणः ॥ '

—समयानां दूषकाः सम्भूय व्यवस्थापितार्थव्यतिक्रमकारिणः।

सर्वविक्रयकर्त्तारो मित्राणां भेदकारकाः।
निर्मर्यादाः क्रोधनाश्च कदर्यैश्वर्यसंयुताः[5] ॥
कोटरे विनिपात्यन्ते बन्धुभक्षाश्च वाणिजाः ॥

—बन्धुभक्षाः बन्धुपीडकाः।

विमुखे पतिते घोरे मर्यादां यश्च लङ्घति[6]।
शाखामृगत्वं गोघ्नश्च कृमिभक्ष्यं व्रजन्ति ते ॥

---

१ रङ्गोपजीवी नटमल्लादिवृत्तिः— रत्नगर्भः। वस्त्रादिरञ्जकः— श्रा. काशिका।
२ शुभाशुभनिमित्तशकुनोपजीवी वा।—वि. पु. टी. ३ श्राद्धकाशिकायां तु—भुक्त्वमित्वा लालसया पुनर्भोजी उक्तः। ४ केशविक्रयी चामरादिविक्रेता। श्रा. का.
५ कदर्यो यो लोभाद्विद्यमानमपि धनं न भुङ्क्ते, न च ददाति। तदुक्तम्—
' आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन्। लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥ '— अप. ६ मर्यादा शिष्टाचारादिसिद्धो धर्मः।— वि. पु. टी.

—विमुखः युद्धादिषु पराङ्मुखः। पतिते युद्ध एवेति शेषः।

एकाकी मिष्टमश्नाति वञ्चयित्वा सुहृत्सुतान्।
दारान् भृत्यातिथींश्चैव तथा सम्बन्धिबान्धवान्॥

उत्सन्नपितृदेवेष्टः पशुघाती च यो वृथा।
लालके नरके घोरे दुर्गन्धे पात्यते नरः॥

मानकर्त्ता कुंलालश्च स्वर्णकारश्चिकित्सकः।
पतन्ति नरके घोरे कूटकर्त्ता विशेषतः॥

देवब्राह्मणविद्वेष्टा गुरुं यश्चावमन्यते।
अवाक्शिरः प्रपद्यन्ते रत्नं दूषयते च यः॥

मांसं मद्यं सुरां लाक्षां गन्धान्वस्त्रं घृतं पयः।
विक्रीणाति य एतानि स तु पूयवहं व्रजेत्॥

अगाँरारामदाही च दुष्टः पापकृदेव च।
पतन्ति रुधिरार्द्रे तु कृतघ्ना दाम्भिका नराः॥

शूद्रहत्यां तु यः कुर्यात्तथा यो गुरुदूषकः।
सीधुकृन्मधुकृद्दण्डी कर्मकारो निराकृतिः॥

—दण्डी निषिद्धदंडग्राही। कर्मकारः कर्मकाराधिष्ठाता। निराकृतिरस्वाध्यायः।

अतितीक्ष्णश्चंडवृत्तिरुपघातपरः शठः।
श्येनजीवी कालहिकः पुत्रोपाध्याय एव च॥

---

१ कुलालः कुम्भकारवृत्त्युपजीवी। स्मृ. चं.। अत्र कुलालस्वर्णकारादयः स्वैवर्णिका एव तद्वृत्त्युपजीविनो गृह्यन्ते, न तु जातिकुलालादयः; तेषां स्ववृत्त्यनुष्ठाने दोषासम्भवात्। २ चिकित्सकश्चिकित्साजीवी। अत्रम्यक् चिकित्सक इतोऽपि। अत्र. ३ अगारदाही तु द्वेधा देवलेन दर्शितः— 'अगारदाही स ज्ञेयः प्रतप्तया घनेन यः। स चाप्यगारदाही स्याद्वेश्मदाहकः॥'—स्मृ. चं. ४ निराकृतिरस्वाध्यायस्तु देवलेन दर्शितः— 'अधीत्य विस्मृते वेदे भवेद्विप्रो निराकृतिः।' कात्यायनस्त्वन्यथाऽऽह— 'यस्त्वाधायाग्निमालस्यादेवादीन्नैभिरिष्टवान्। निराकर्तामरादीनां स विज्ञेयो निराकृतिः॥'—स्मृ. चं.

द्यूतसंव्यवहारी च प्राणिहिंसारताश्च ये ।
वैतरण्यां निपात्यन्ते ये नरा बन्धुघातकाः ॥

—अतितीक्ष्णः अत्युग्रः । चण्डवृत्तिः वधबन्धादिवृत्तिः । उपघातपरः परोपहतिप्रवणः । शठो मायावी । काँलहिकः कलही । पुत्रोपाँध्यायः पुत्र उपाध्यायो यस्य सः ।

तथा—'असत्प्रतिगृहीतारस्तथैवायाज्ययाजिनः ।

नक्षत्रैर्जीवते यश्च सोऽन्धकारं प्रपद्यते ॥
अप्राप्तदमको यश्च ब्राह्मणो वृषलीपतिः ।
गोश्वोष्ट्रहस्तिदमको मित्रध्रुक् सूचकस्तथा ॥
असिपत्रवने घोरे पतन्त्यौरभ्रिका नराः ॥

—अप्राप्तदमकोऽयोग्यदमकः । गोश्वोष्ट्रहस्तिदमकः सा वृत्तिर्यस्य स तथोक्तः । औरभ्रिका मेषाजीविनः ।

वृथाँप्रव्रजितो यश्च सेतुभेत्ता च सूँचकः ।
आश्रमात्पतितो यश्च सोऽग्निज्वालं प्रपद्यते ॥

कृत्याकरा निकृत्यंते नरा अनृतवादिनः ।
राजा च श्रुतिलोपी च सन्दंशनरकं व्रजेत् ॥

मृगव्याधस्तमो घोरं क्रूरकर्मा च वार्द्धुषिः ।
भक्ष्यन्ते श्यामशबलैस्तीक्ष्णतुण्डैश्च वायसैः ॥

---

१ काहलिक इति पाठे काहलाख्यवाद्यविशेषेण जीवी ।

२ ग्रामगतगृहस्थपुत्राणामक्षरशिक्षको वा । तथा च सङ्ग्रहकारः— 'पुत्राचार्यः स विज्ञेयो ग्रामे योऽक्षरपाठकः । ' स्मृ. चं.

३ वृषलीपतिः— ' वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥ यस्त्वेनामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः । अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥ ' प. मा.

४ वृथाप्रव्रजितः पुत्रानुत्पाद्यैव सन्न्यासी । —श्रा. का.

५ सूचको राजकर्णेजपः । श्रा. का.

६ यस्तु निन्देत्परगुणान्प्रशंसत्यात्मनो गुणान् । स वै वार्धुषिको नाम हव्यकव्येषु गर्हितः । अम.

ब्रह्मविक्रयिणो ये च ब्रह्मावाक् क्रियते च यैः ।
क्रयविक्रयकर्त्ता च वार्द्धुषिः सोमविक्रयी ॥

गुरूंश्च येऽवमन्यन्ते वाक्चैस्तर्जयन्ति च ।
विकर्माणः पापरताः शौचाचारविवर्जिताः ॥

अगोप्तारः कुलद्रव्याः परस्वानां च नाशकाः ।
कन्यानां दूषकाश्चैव समयानां च दूषकाः ॥

क्रोधनाः पापशीलाश्च लुब्धा ये कृष्णगामिनः ।
स्कन्दन्ते च दिवा स्वप्ने व्रतिनो ब्रह्मचारिणः ॥
सर्वे ते नरके घोरे पात्यन्ते पापकारिणः । '

—अगोप्तारोऽवश्यरक्षणीयानामिति शेषः । कुलद्रव्याः छलेनार्जितधनाः । कृष्णगामिनः शूद्रारताश्चैवर्णिकाः ।

मनुः— (१२।५४)

' बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात् ।
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विह ॥ '

याज्ञवल्क्यः— (३।२०७—)

' मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ।
खरपुल्कसवेणानां सुरापो नात्र संशयः ॥ '

—पुल्कसवेणौ[२] चण्डालविशेषौ ।

' कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् ।
तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः ॥ '

---

१ अल्पवृद्धया धनं स्वीकृत्याधिकवृद्धया प्रयोजको वार्द्धुषिः । ' समर्घं धनमुद्धृत्य महर्घं यः प्रयच्छति । स वै वार्द्धुषिको नाम ब्रह्मवादिषु गर्हितः ॥ ' इति स्मृतेः । —नि. सि. टी. 'धान्यम्' इति वसिष्ठ—(२।४६ बृ. य. ३।२३) पाठः । क्रयविक्रयकर्तृसाहचर्यादत्रायमेव विवक्षितः ।

२ कृष्णा शूद्रा 'कृष्णा रामा रमणायैव ' (वसि.१८।१६) इत्यादिनिर्देशात् । 'ङ्याप्रातिपदिकात्—(अष्टा. ६।३।६२) इति ङीप् ।

३ 'जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः' (मनुः १०।१८) ' वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ' । (मनुः १०।१९)

स एव–(३।२०९–१०)

'ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः ।
हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥
यो येन सन्धिं यात्येषां स तल्लिङ्गोऽभिजायते ॥'

फलविशेषा ग्रन्थान्तरतोऽवसेयाः ।

अथ पर्षत् ।

लघुपराशरः– (८।१९–२१)

'चत्वारो वा त्रयो वाऽपि वेदवन्तोऽग्निहोत्रिणः ।
ब्राह्मणानां समर्था ये पर्षत्सा हि विधीयते ॥
अनाहिताग्नयो येऽन्ये वेदवेदांगपारगाः ।
पञ्च त्रयो वा धर्मज्ञाः परिषत्संप्रकीर्तिता ॥
[मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम्]
वेदव्रतेषु स्नातानामेको[1]ऽपि परिषद्भवेत् ॥'

यमः–'एको द्वौ वा त्रयो वाऽपि यद्ब्रूयुर्धर्मपाठकाः ।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ॥'

मनुः —(१२।१११)

'त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशावरा ॥'

—हैतुको मीमांसकः ।

अंगिराः—

'एकविंशतिसङ्ख्यातैर्मीमांसान्यायपारगैः ।
वेदाङ्गकुशलैरेव पर्षत्त्वं तु प्रकल्पयेत् ॥'

धर्मविवृतौ—

'पातकेषु शतं पर्षत्सहस्रं महदादिषु ।
उपपापेषु पञ्चाशत्स्वल्पे स्वल्पा तथा भवेत् ॥'

पराशरः—(८।१४]

'अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः ।
प्रायश्चित्ती भवेत्पूतः किल्बिषं परिषद्भजेत् ॥'

---

१ वेदानामृगादीनां चतुर्णामध्ययनायानुष्ठितानि तत्तद्वेदोक्तानि व्रतानि वेदव्रतानि । मा.

२ एकस्य पर्षत्त्वमसंशय एव । 'बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः । तस्मान्न वाच्यो हेतुकेन बहुज्ञेनापि संशये ॥' (१।१।१३) इति बौधायनवचनात् ।

पर्षदुपस्थानमाहाङ्गिराः—(३।८०-८१)

सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः ।
क्षत्रियो वाऽपि वैश्यो वा पर्षदं ह्युपतिष्ठति ॥

आधिकारिमात्रोपलक्षणमिदम् ।

उपस्थाय ततः शीघ्रमार्त्तिमान्धरणीं गतः ।
गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत् ॥

पराशरः—

पापं विख्यापयेत्पापी दत्त्वा धेनुं तथा वृषम् । [बृ. य.४।५]

इदमुपपातकविषयम् । महापापादिष्वधिकं कल्प्यमिति मिताक्षरायाम् । अल्पपापेष्वपि तत्रैव—

तस्माद्द्विजः प्राप्तपापः सकृदाप्लुत्य वारिणि ।
विख्याप्य पापं वक्तृभ्यः किंचिद्दत्त्वा व्रतं चरेत् ॥

—किंचिद्दत्त्वा पापं विख्याप्य व्रतं चरेदित्यन्वयः ।

विष्णुः—

पादव्रते वस्त्रदानं कृच्छ्रार्द्धे तिलकाञ्चनम् ।
पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतम् ॥

अत्र 'सर्वे धर्मविवेक्तारः' इत्यादिप्रार्थना पर्षत्प्रदक्षिणा च वक्ष्यते यद्धतौ ।

देवलः—

पापकृत्स्वकृतं पापं कृत्स्नमाख्याय संसदि ।
तत्र स्नानेन याचेत निष्कृतिं तस्य कर्मणः ॥

अङ्गिराः—

कृत्वा पापं न भुञ्जीत त्रिरात्रमहरेव वा ।
कुर्याद्ब्राह्मणशुश्रूषामाप्रदानाद्व्रतस्य तु ॥

---

१ 'ततः पर्षदमाव्रजेत् ।' (परा. स्मृ. ८।९) इति पाठः ।
२ इदं प्राजापत्योर्ध्वप्रायश्चित्ते ।– प्रा. मु.

एतच्च पर्षदुपस्थानं प्रकाशप्रायश्चित्त एव, न रहस्ये;

'विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्।
अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत्॥' [३।३००]

इति याज्ञवल्क्योक्तेः। प्रकाशेऽपि पर्षदसम्भवे स्वयमेव कुर्यात्।

मनुः— [११।१४६]

'मतिपूर्वमनिर्देश्यं प्राणांतिकमिति स्थितिः।'

—मतिपूर्वमयं मरणार्थं पृच्छतीति ज्ञात्वा।

अङ्गिराः—

'ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितम्।
वृद्धाः पृच्छन्ति किं कार्यमुपविश्याग्रतः स्थितम्॥

किं ते कार्यं वदास्माभिः किंवा मृगयसे द्विज!।
तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः॥

यदि चेद्वक्ष्यसे सत्यं नियतं प्राप्स्यसे शुभम्।
यद्यागतोऽस्यसत्येन न त्वं शुद्ध्यसि कर्हिचित्॥
एवं तः समनुज्ञातः सर्वं ब्रूयादशेषतः॥'

विश्वामित्रः—

'जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा।
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्॥'

उपदेशश्च पर्षदनन्तर्गतेन पर्षदनुमत्या केनचित्कार्यः। तथा चाङ्गिराः—'आहूय श्रावयेदेकः पर्षदा यो नियोजितः'। 'उपदेशश्च त्रिः कार्यः' इति मदनः, पितामहचरणाश्च।

स एव—

ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः।
वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत्॥

अगुरुः क्षत्रियाणां यो वैश्यानां वाऽप्ययाजकः।
प्रायश्चित्तं समादिश्य तप्तकृच्छ्रं व्रतं चरेत्॥

---

१ अनिर्देश्यमिति ब्रुवन्प्राणान्तिकप्रायश्चित्तं पर्षदानुक्तं स्वयमेव शास्त्रतो विदित्वा कुर्यादिति गमयति।—अप. ३।२५३

स एव—

'तथा शूद्रं समासाद्य सदा धर्मपुरस्सरम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥'

जपहोमौ चाङ्गप्रधानरूपावविशेषात् ।

पर्षदन्तर्गतस्योपदेशकत्वे प्रायश्चित्तमाह हारीतः—

'प्रायश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते ।
यत्पवित्रं विजानीयाज्जपेद्वा वेदमातरम् ॥'

अङ्गिराः—[३।४१]

'वचः पूर्वमुदाहार्यं यथोक्तं धर्मकर्तृभिः ।
पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहम् ॥'

— वचः प्रायश्चित्तविधायकम् । अनुग्रहः प्रायश्चित्तन्यूनता ।

पराशरः—[६।५६]

'दुर्बलेऽनुग्रहः कार्यस्तथैव शिशुवृद्धयोः ।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत् ॥'

---

१ 'धर्मपथे स्थितम्' इति पाठः ।

२ अत्र यत्पदसम्बन्धात्तत्पदमध्याहार्यम् । 'सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम् ।' इत्युपक्रम्य 'अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समाः । कूष्माण्ड्यः पावमान्यश्च दुर्गा सावित्र्य एव च ॥' (अत्रि. ६।१,शंख. १९।१वसिष्ठ. २८।११) इत्यादीनि यानि पवित्रसंज्ञकान्युक्तानि, तेषु यदधीयीत तत्, अथ वा गायत्रीं जपेदित्यर्थः । गायत्र्या वेदमातृत्वं च 'गायत्री छन्दसां माता' (तै. आ १०।२६) इति श्रुतिप्रसिद्धमेव ॥ मात्स्येऽपि—'अभावे सर्वविद्यानां गायत्रीं जपनारभेत् ।' इति । ''नन्वु इदं पर्षदः प्रायश्चित्तविधानमनुपपन्नम्; 'आर्तानां मार्गिमाणानां प्रायश्चित्तानि ये द्विजाः । जानन्तो न प्रयच्छन्ति ते तेषां समभागिनः ॥' इति प्रायश्चित्तावचने तस्या दोषस्मरणात्— इति चेत्; अत्र **कश्चित्**-नेदं प्रायश्चित्तं प्रायश्चित्तविधाननिमित्तम्, किन्तु पतितसम्भाषणादिनिमित्तम्- इत्याह । तद्, 'वृद्धाः पृच्छन्ति किं कार्यम् ?' इत्यादिना तदन्यनुज्ञानात् । नाप्यथाज्ञानं प्रायश्चित्तविधाननिमित्तम्, नित्यवच्छ्रवणविरोधात् । अत्रोच्यते— पर्षत्प्रवेशानन्तरं प्रायश्चितावचने दोषस्मरणेऽपि पर्षत्प्रवेशाभावे दोषास्मरणात् रागप्राप्तपर्षत्प्रवेशनिमित्तमेवेदं प्रायश्चित्तम् । यथा श्राद्धे निमन्त्रितस्य श्राद्धाभोजने दोषसद्भावेऽपि श्राद्धप्रवेशने न दोषः, प्रवेशे च रागकृते प्रायश्चित्तविधानम्, तथा प्रकृतेऽपि । प्रायश्चित्तान्नानेन निषेधानुमानं तुभयत्र समानमेव । तस्मात् पर्षत्प्रवेशो न कर्तव्यः, प्रवेशे यथोक्तप्रायश्चित्तमुक्त्वा स्वयमपि पर्षत्प्रवेशनिमित्तं प्रायश्चित्तं कर्तव्यमिति । ''—वि. म.

देवलः—

'प्रायश्चित्तं यथोद्दिष्टमशक्त्या तद्वशात्पुनः ।
इष्यतेऽनुग्रहश्चापि पूजानुग्रहकारणात् ॥
एको नार्हति तत्कर्तुमनूचानोऽप्यनुग्रहम् ।
धर्मज्ञा बहवो विप्राः कर्तुमर्हत्यनुग्रहम् ॥
स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा ।
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति ॥'

(परा. ६।५७ लि. स्मृ. ७७)

पूजा अनुग्राह्यस्य पूज्यत्वम् । अनुग्रहो दया । अनुग्रहरूपन्यूनतावधिमाह हारीतः—

'तस्मात्कृच्छ्रमथामप्यर्द्धं पादं वाऽपि विधानतः ।
ज्ञात्वा बलाबलं कार्यं प्रायश्चित्तं प्रकल्पयेत् ॥'

किञ्चिदशक्तौ कृच्छ्रं प्राजापत्यम् । अधिकायां अर्द्धम् । अधिकतरायां पादमनुग्रहं कृत्वा प्रकल्पयेदित्यनुग्रहं कृत्वेत्यध्याहारेण योज्यम् ।

अथेतिकर्त्तव्यता ।

विष्णुः—(३।२१–२५)

'सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकम् ।
ग्रहणं सम्प्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते ॥
दिनान्ते नखरोमादीन् प्रवाप्य स्नानमाचरेत् ।
भस्मगोमयमृद्वारिपञ्चगव्यादिकल्पितैः ॥
मलापकर्षणं कार्यं ब्रह्मशौचप्रसिद्धये ।
दन्तधावनपूर्वेण पञ्चगव्येन संयुतम् ॥
व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने ।
आचम्यातः परं मौनी ध्यायन् दुष्कृतमात्मनः ॥
मनःसन्तापनात्तीव्रमुद्वहेच्छोकमन्ततः ॥' इति ।

—रोम श्मश्रु । आदिना केशग्रहणम् । ब्रह्मशौचं[1] पापनिर्हरणम् । पञ्चगव्येनेति भस्मादिसमस्तस्यैव पञ्चगव्यादेरनुवादाद्भस्मादिस्नानापेक्षयाऽपि दन्तधावनस्य पूर्वत्वसिद्धिः । आचारोऽप्येवम् । पितामहचरणाश्च । व्रतं होमावशिष्टपञ्चगव्यप्राशनमिति महार्णववादौ । प्राय-

१ 'बाह्यशौच–' पा.

श्चित्तसङ्कल्प इति माधवशूलपाणी। घृतप्राशनमिति कल्पतरुः, 'न्युप्य केशनखान् पूर्वं घृतं प्राश्य विशुध्यति'इति शङ्खलिखितोक्तेःपूर्वमित्यस्याग्रे 'नद्यां स्नात्वा विशुद्ध्यति' इति वा पाठः। तदा न घृतप्राशनं बहिर्ग्रामात्। जाबालिः—

'आरम्भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः।
आज्येनैव तु शालाग्नौ जुहुयाद्व्याहृतीः पृथक्॥
श्राद्धं कुर्याद्व्रतान्ते च गोहिरण्यादिदक्षिणा।
स्त्रीणां होमो न दातव्यः पञ्चगव्यं तथैव च॥'

—श्राद्धं वैष्णवम्।

'विधाय वैष्णवं श्राद्धं साङ्कल्पं निजकाम्यया।
धेनुं दद्याद्द्विजेभ्योऽथ दक्षिणां च स्वशक्तितः॥'
(क. वि. १।२२) इति शातातपोक्तेः।

—व्रतान्ते प्रायश्चित्तान्ते। गोहिरण्यादिदक्षिणा देयेति संबन्धः। अत्र विष्णुदेवतया पित्रादिदेवताबाधः। साङ्कल्पत्वाच्चार्घ्यावाहनाग्नौकरणावनेजनपिण्डस्वधावाचनानां बाध इत्युक्तमस्मत्कृते श्राद्धमयूखे (पृ. ११९) आरम्भे च समाप्तौ चेति श्राद्धे कुर्यादित्यत्राप्यन्वेति। शूलपाणिस्तु—'गोहिरण्यादिदक्षिणां' इति पपाठ। तदा प्रायश्चित्तान्त एव गोहिरण्यादिदक्षिणं श्राद्धं कार्यं, नादावित्यर्थः।

स्त्रीणां शालाग्निहोम एव न भवति, तस्यैव प्रकृतत्वात्। लौकिकेऽग्नौ तु भवत्येव। स च विप्रद्वारेति केचित्।

'उपवासो व्रतं होमस्तीर्थस्नानजपादिकम्।
विप्रैः सम्पादितं यस्य सम्पन्नं तस्य तत्फलम्'॥

इति पराशरोक्तेः (६।६४ शा. क. १।२८)

तन्न; अस्य प्राप्तेषु जपहोमादिषु अशक्तौ विप्ररूपप्रतिनिधिनियममात्रार्थत्वात्। प्रायश्चित्ताङ्गजपहोमयोस्तु निषेधादेवाप्राप्तेस्तत्र तस्याप्रवृत्तेः।

यदपि वाराहे—(१८८।५७) 'अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते' इति, तस्यापि परिभाषात्वेऽपि प्राप्तयोरेव जपहोमयोः प्रवृत्तिः।

१ अत्र व्यवहारमयूखे (पृ. ७०) उक्तमप्यनुसन्धेयम्।
२ गृह्णाति मन्त्रतः। मू. पा.

एतेन यन्महार्णवमदनरत्नयोः–'स्त्रीशूद्रादेर्विप्रद्वारा समन्त्रकौ जपहोमौ भवतः' इति; तत्परास्तम्।

पराशरः—(१२।४)

'स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत्।
पञ्चगव्यं च कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्॥'

स्त्रीणां पञ्चगव्यस्य विहितप्रतिषिद्धत्वाद्विकल्पः। शूद्राणां तु नित्यं भवत्येव। शूद्रस्यापि विकल्प इति महार्णवे। तन्न, तस्य स्त्रीपदगर्भ-निषेधाप्रवृत्तेः। यत्तु 'स्त्रीशूद्रास्तु सधर्माणः' इति, तद्विशेषाभावे स्त्रीशूद्रयोः समानधर्मत्वप्रतिपादनार्थम्। अस्ति चात्र[1] पञ्चगव्यस्य विशेषविधिः। यत्तु–

'पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्।
उभौ तौ तुल्यकर्माणौ पूयाख्ये नरके वसेत्॥' इत्यत्रिवचस्त-द्रागप्राप्तप्राशननिषेधपरम्।

वपने विशेषमाह वसिष्ठः–(२४।४–५)

'कृच्छ्राणां व्रतैरूपाणां[3] श्मश्रुकेशादि वापयेत्।
'आक्षिरोमशिखावर्जम्' इति।

काम्यकृच्छ्रादौ वपनं नेति मदनपारिजाते।

गोवधे तु पराशरः–(८।३१)

'प्राजापत्यं चरेत्कृच्छ्रं गोघाती व्रतमुत्तमम्।
सशिखं वपनं कार्यं त्रिसन्ध्यमवगाहनम्॥' इति

विशेषमाह संवर्तः—(परा. ९।१४। लि. ८२। यमः ९३)

'पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च।
त्रिपादे तु शिखावर्जं सशिखं तु निपातनम्॥' इति।

---

१ 'स्त्रीणां होमो न दातव्यः' इति पूर्वोक्तं जाबालिवचनमप्युपलक्ष्यम्।

२ उभौ तौ नरकं यातो महारौरवसंज्ञितम्। (वि. स्मृ. १४।७) कृतौ प्राशनमेव, युगान्तरे विकल्प इति सिद्धान्तितं संस्कारमयूखे (पृ. १२८)। अयं तु निषेधो मन्त्रवत्पञ्चगव्यविषय इति प्रतीमः। 'स्त्रीणां चैव तु शूद्राणां पतितानां तथैव च। पञ्चगव्यं न दातव्यं दातव्यं मन्त्रवर्जितम्॥' (६१) इति देवलस्मरणात्।

३ व्रतरूपाणां प्रायश्चित्तरूपाणाम्। प्रा. मु.

४ शिखाच्छेदश्चतुर्थके। लि. स्मृ. पा.

सधवानां विशेषमाह वसिष्ठः—

'केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः ।
गोवधादिषु सर्वेषु छेदयेदङ्गुलद्वयम् ॥
सधवानां तु नारीणामलङ्काराय सर्वदा ।
केशसन्धारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः ॥' इति ।

—'अङ्गुलत्रयम्' इति क्वचित्पाठः । अत्र सधवापदाद्विधवानां सर्ववपनम् । अत्र विशेषमाह पराशरः—(९।५४–५५)

'वपनं नैव नारीणां नानुव्रज्या जपादिकम् ।
न गोष्ठे शयनं तासां न वसीरन् गवाजिनम् ॥
सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम् ॥' ९।५६

वासिष्ठे आदिपदं प्रायश्चित्तान्तरपरम् । तेन प्रयागादौ 'मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः'इति देवलाद्युक्तेः सर्वमुण्डनमेव; 'वेण्यां वेणीप्रदानेन' इति लिङ्गात्, आचाराच्च तीर्थान्तरे न भवतीत्यन्यदेतत् ।

अपरार्के—

'उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् ॥
दक्षिणं कर्णमारभ्य धर्मार्थं, पापसञ्चये ।
शिखाद्यं नवसंस्कारे शिखाद्यन्तं शिरो वपेत् ॥'

धर्मार्थं तीर्थादिवपने दक्षिणकर्णादि उदक्संस्थं वपेत् । पापसञ्चये तन्निमित्ते प्रायश्चित्ते शिखामादौ कृत्वाऽधस्तात्सर्वतो वपेदुदक्संस्थम् । नवसंस्कारे चूडाकरणे दक्षिणकर्णाच्छिखान्तं, शिखामारभ्य वामकर्णान्तं च वपेदित्युत्तरपद्यार्थः । तैत्तिरीयके आसुरं वपनं निन्दित्वा दैवक्रम उक्तः । देवान्प्रक्रम्य—'तत उपपक्षावग्रे वपन्त । अथ श्मश्रूणि । अथ केशान्' (तै.ब्रा. १।५।६) इति । मानुषेऽपि तत्रैव मनुं प्रक्रम्य—

---

१ 'सर्वत्रैव हि नारीणां' 'एवं नारीकुमारीणां'—पा.

२ पाठक्रमात्केशश्मश्रुक्रमेण वपनं कार्यमित्येके । क्षणमपि म्लेच्छाचारप्रसङ्गवारणार्थं श्मश्रुकूर्चयोरादौ वपनं कार्यम्, ततः केशानामित्यन्ये ।

'स इमश्रूण्यग्रे वपेत । अथोपपक्षौ । अथ केशान्'(तै.ब्रा.१।५।६)इति। अन्नाधानेष्टिसोमेषु दैवम्, तत्र तस्य विधानात् । प्रायश्चित्ते तु दैवमानुषे विकल्पेन । तत्राप्युदक्संस्थितायै दक्षिणश्मश्रुपपक्षौ वप्त्वा वामाविति । इदं च वपनं निषिद्धकालेऽपि कार्यम् ।

'क्षौरं नैमत्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतियात्रासु प्रायश्चित्ते च तीर्थके ।।' इति स्मृतेः ।

निषेधांश्चाह वृद्धगार्ग्यः—

'रव्यारसौरवारेषु रात्रौ पाते व्रतेऽहनि ।
श्राद्धाहः प्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् ।।'
—भद्रा द्वितीयाद्याः । न करणम्, तिथिसाहचर्यात् ।

व्यासः–(म. भा. १३।१०४।१२७)

'नक्षत्रे तु न कुर्वीत यस्मिञ्जातो भवेन्नरः ।
न प्रौष्ठपद्योः कार्यं नैवाग्नेये च भारत ।।
दारुणेषु तु सर्वेषु दुष्टतारां च वर्जयेत् ।'

बादरायणः—

'सिंहे धनुषि मीने च स्थिते सप्तुरङ्गमे ।
यात्रोद्वाहगृहारम्भक्षौरकार्याणि वर्जयेत् ।।'[1]

व्यासः—

'विवाहमौञ्जीचूडासु वर्षमर्द्धं तदर्द्धकम् ।
अन्तर्वत्न्यां च जायायां नेष्यते केशवापनम् ।।'

इत्याद्यनेकनिषेधाः समयमयूखे (पृ. १७९) उक्ताः । तथा जीवत्पितृकेनापि कार्यम् ।।

'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्याद्दुर्विणीपतिरेव च '

इति दक्षीयनिषेधस्य रागप्राप्तविषयत्वाद्विधिस्पृष्टेऽनवकाशात् । वस्तुतस्त्विदं दक्षस्मृतौ निबन्धे चानुपलम्भान्निर्मूलम् ।

---

१ अत्र 'निषेधे सत्यपि' इत्युपादानात्प्रायश्चित्ततीर्थयो रात्रावपि क्षौरम् ।

शङ्खः—(ल. शं. ५७-५८- परा. ९।९३)

'राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥
केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेत् ॥'

यत्तु- 'विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥' इति ॥

तत्र विज्ञानेश्वरः-'महापातकादिव्यतिरिक्ते राजादीनां वपनं नास्त्येव । महापातकादौ तु तेषां वपनानिच्छायां द्विगुणदक्षिणासहितं व्रतद्वैगुण्यमिति । अन्ये तु-महापातकादौ नित्यं राजादेरपि वपनमेव । अन्यत्र तु वपनानिच्छायां व्रतद्वैगुण्यविधिरित्याहुः । इयं च वपनाद्येतिकर्त्तव्यता प्राजापत्यप्रभृतिष्वेव भवति, न ततोऽल्पेषु । तथा च पैठीनसिः-'द्वादशाहे सम्पूर्णं वपनम्' इति । वपनग्रहणं चेतिकर्त्तव्यतान्तरस्याप्युपलक्षणम् ।

तथा च याज्ञवल्क्यः-(३।३२५)

'कुर्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा ।
पवित्राणि जपेत्पिण्डान् गायत्र्या वाऽभिमन्त्रणम्' इति ।

निवर्तमानवपनसाहचर्याच्च पञ्चगव्यादेरपि निवृत्तिः । अत एव 'न्यूनपादव्रते वस्त्रदानम्' इति वैष्णवे वस्त्रादिमात्रदानोक्तेरपीदमवगम्यते ॥

अथ पूर्वोक्तभस्मादिस्नानप्रकारः ।

लैङ्गे—(पू. २६।३७।३८)

'ईशानेन शिरोदेशे मुखं तत्पुरुषेण तु ।
उरोदेशमघोरेण गुह्यं वामेन सुव्रताः ! ॥
सद्येन पादौ सर्वाङ्गं प्रणवेन तु शोधयेत् ।'

---

१ अत्र राजादय उपलक्षणार्थाः । यत्र राजादीनामप्येवम्, अन्येषां किमु वक्तव्यम् ? इति कैमुतिकन्यायात् । प्रा.मु.

—अत्रेशानादिपदेन 'ईशानः सर्वविद्यानाम्' (तै. आ. १०।२१) इत्यादयो मन्त्रा उच्यन्ते। चतुर्थ्यन्तानि नमोन्तानीशानादिपदान्येव मन्त्रा इत्यन्ये। 'अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वꣳह वा इदं भस्म' (का. रु. उ.। भ. जा. १) इति पंच मन्त्रा ईशानादिमन्त्रस्थान इत्यपरे।

विष्णुः—

'अग्रमग्रमिति स्मृत्वा मानस्तोकेन (तै.आ.१०।५३) वा पुनः।
गोमयैर्लेपयेत्प्राज्ञः सोदकैर्भानुदर्शितैः।'

योगयाज्ञवल्क्यः—

'त्रिधा कृत्वा मृदं तां तु गोमयं च विशेषतः।
अधमोत्तममध्यानामङ्गानां क्षालनं च तैः॥'

कौर्मे—(उ. १८।५९)

'गोमयस्य प्रमाणं तु येनाङ्गं लेपयेत्ततः।' इति।

अथ मृत्तिकास्नानम्।

जमदग्निः—

'अश्वक्रान्तेति (तै. आ.१०।८) वै शुद्धां मृत्तिकामाहरेच्छनैः।
नमोमित्रस्ये (ऋ. सं. ७।८।१२) त्यादित्याय दर्शयेत्समृदौ करौ॥
गन्धद्वारामिति (तै. आ. १०।१०) जप्त्वा स्वान्यङ्गान्यनुलेपयेत्॥

'शिवपुराणे—

'अश्वक्रांत इति स्मृत्वा मन्त्रेणामन्त्र्य मृत्तिकाम्।
उद्धरेदुद्धृतासी-(तै. आ. १०।८)ति मन्त्रेण सुसमाहितः॥

---

१ अग्निरित्यादिभिर्मन्त्रैर्जाबालोपनिषद्भतैः। सप्तभिर्धूलनं कार्यं भस्मना सजलेन च' ॥ (सु. सं. ४।३।१८) [उपर्युक्तश्लोकनिर्दिष्टप्रमाणवचसा 'अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। देवा भस्म। ऋषयो भस्म।' इति सप्त मन्त्राः 'सर्वꣳ ह वा इदं भस्म।' इत्यष्टमो भस्मजाबालोपनिषदि। परमत्र मूले क्रमेण अग्निरित्यादय :सर्वं ह वान्ताः षण्मन्त्राः सन्ति। उक्तं च 'पञ्च मन्त्राः' इति। तच्चिन्त्यम्।]

'नमो मित्रस्येति (ऋ. सं. ७।८।११।) ऋचा दर्शयित्वा च भानवे।
आरुह्येति च गात्राणि समालभ्य द्विराचमेत् ॥'

अनुपलेपने मन्त्रान्तरमाह योगी—

'आलभेत मृदाङ्गानि इदं विष्णुरिति (ऋ. सं. १।२।७) त्र्यृचा।'

मृत्परिमाणं कौर्मे—(उ. १८।५९)

'मृत्तिका च समुद्दिष्टा त्वार्द्रामलकमात्रिका' इति।

क्रम उक्तो नारदेन—

'आयुष्कामः शिरोलेपं मृदा कुर्याद् द्विजः पुरा।
श्रीकामः पादयोः शौचं मृदा पूर्वं समाचरेत् ॥'

पारस्करः—

'एकया तु शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि।
मृद्भिश्च तिसृभिः कार्यं षड्भिः पायु तथैव च ॥
कटिबस्त्यूरुजङ्घाश्च पादौ च तिसृभिस्ततः।
तथा हस्तौ परिक्षाल्य द्विराचामेत्समाहितः ॥'

योगी—

'मृद्भिरद्भिश्च गात्राणि क्रमशस्त्ववनेजयेत्।
शीर्षाद्यानाभि सर्वाणि स्मरन्विष्णुमनामयम् ॥
कटिबस्त्यूरुजङ्घे च चरणौ च त्रिभिस्त्रिभिः।
तथैव हस्तावाचम्य नमस्कृत्य जलं ततः ॥

यत्किञ्चेदमिति (ऋ.सं.५।६।११) मन्त्रेण नमस्येत्प्रयताञ्जलिः' ॥

अत्र विरुद्धानां मृत्सङ्ख्यादीनां यथाशास्त्रं व्यवस्थेति हेमाद्रिः।

इति मृत्स्नानविधिः।

अनन्तरं चतुर्थं वारिस्नानमुक्तम्। तत्र मन्त्रो ब्रह्माण्डपुराणे—

'आपो अस्मानिति ह्युक्त्वा भास्कराभिमुखः स्थितः।
इदं विष्णुर्जपित्वा च प्रतिस्रोतो निमज्जति ॥'

महार्णवे तु – वैकल्पिकौ द्वौ मन्त्रावुक्तौ 'इदमापः प्रवहत' (ऋ. सं. १।२।१२) इति ऋक्।

---

२ आरुह्य मम गात्राणि सर्वं पापं प्रणोदय। नमस्ते सर्वलोकानां प्रभवारणि! सुव्रते! (मत्स्य पु. १०२।१२) ॥' 'अतो देवेति (ऋक्सं.१।२।७) मन्त्रेण' इति पाठः। म. र. भू.

'आपोहिष्ठा' (ऋ. सं. ७।६।५) इति ऋचो वेति। तत्र मूलं मृग्यम्

अनन्तरं पञ्चगव्यस्नानान्युक्तानि। तत्र तद्ग्रहणमन्त्रा मात्स्ये—(२६७।५–७)

'सावित्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि॥
तेजोऽसीति घृतं तद्वद्देवस्य त्वेति चोदकम्।
कुशमिश्रं जपेद्विद्वान्पञ्चगव्यं भवेत्ततः॥' इति।

पाराशर्ये तु– (११।३३)

'तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्।
पञ्चगव्यमृचा पूतं स्थापयेदग्निसन्निधौ॥' इति।

इति द्वितीयः श्लोक उक्तः। 'देवस्य त्वा' इत्यनन्तरं 'अभिषिञ्चामि' इति वाक्यशेषः पूरणीय इति निबन्धकृतः।

यद्यपि मात्स्ये देवप्रतिष्ठायां देवस्नानार्थपञ्चगव्यग्रहणे एते मन्त्रा उक्ताः, पराशरेण च ब्रह्मकूर्चप्रकरणे; तथाप्युभयत्रापि कुशोदकसहितानां षण्णां गोमूत्रादीनां 'पञ्चगव्यं भवेत्ततः' इति 'पञ्चगव्यमृचा पूतं' इति च पञ्चगव्यमिति परिभाषेति गम्यते। तस्याश्च प्रकरणेन नियमाभावाद्यत्र पञ्चगव्यविनियोगस्तत्रैतदेव मन्त्राद्यवगन्तव्यम्, अन्यथा गव्यमिति तद्धितस्य गव्यशृङ्गतक्रादिसाधारण्येन[1] तेनापि स्नानं स्यात्॥ केचित्तु—

'मलापकर्षणं कार्यं बाह्यशौचप्रसिद्धये' इति बाह्यशरीरमलशोधनमात्रार्थत्वादमन्त्रकाण्येव तानीत्याहुः। जमदग्निः—

'हिरण्यशृङ्गं वरुण-(तै. आ.१०।१२) मित्यापोऽभिप्रपद्यते
'सुमित्र्या' इत्यपः स्पृष्ट्वा 'दुर्मित्र्यास्तु'(तै. आ.१०।११)बहिःक्षिपेत्।
'यदपां क्रूर-(तै. आ. १०।१३)मित्यापस्त्रिरालोड्य तु पाणिना।'

प्रायश्चित्तचरणपर्यन्तं धर्मानाह शङ्खः—

'प्रायश्चित्तमुपासीनो वाग्यतस्त्रिरुपस्पृशेत्।
एकवासार्द्रवासा वा लघ्वाशी स्थण्डिलेशयः॥

---

१ यद्यपि 'तेजोऽसि' 'देवस्य त्वा' इत्यनयोर्यजुष्टाट्चेति साधारणव्यपदेशो नोपपद्यते, तथापि 'सृष्टीरुपदधाति' इतिवत् भूम्ना तत्सिद्धिरिति न दोषः। वि.स.

'स्थानवीरासनी मानी मौञ्जी दण्डकमण्डलुः ।
भैक्षचर्याग्निकार्यं च कूष्माण्डैर्जुहुयाद्घृतम् ॥'

—उपस्पर्शः स्नानमित्यपरार्के । दिवास्थिती रात्रौ चोपवेशनं वीरासनमिति विज्ञानेश्वरः । कुड्याद्यनाश्रयेणाहोरात्रमुपवेशनमिति शूलपाणिः । मनुः-(११।२२४)

'स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा ।'
कूष्माण्डैः 'यद्देवा देवहेडनम्' इत्याद्यैः ।

वासिष्ठः—

'महाव्याहृतिभिर्होमः सावित्र्या वाऽन्वहं स्वयम् ।
कर्त्तव्यः पावनः सम्यक् सर्पिषा च तिलैस्तथा ॥'

द्रव्याणां व्याहृतिगायत्र्योश्च विकल्प इत्यपरार्के ।

तत्रैव पुराणे—

'आपोहिष्ठेति सूक्तं तु शुद्धवत्योऽघमर्षणम् ।
शंवत्यः स्वास्तिमत्यश्च पावमान्योऽघमर्षणम् ॥

---

१ महाव्याहृतयश्च भूरादयस्तिस्रः, तदाह मनुः- 'ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।' (२।८१) इति । आसां च त्रित्वं जप एव, होमे तु व्यस्ता प्रयोज्याः । समस्ता अपि प्रयोज्याः शास्त्रान्तरदर्शनात् । अप० । महाव्याहृतयो 'भूरग्नये च०' इत्याद्या इत्यन्ये ।

२ 'आपो हि ष्ठा' (ऋ. सं. ७।६।५) इत्यृग्वेदे प्रसिद्धम् । शुद्धवत्यः- 'एतो न्विन्द्रं स्तवाम' (ऋ. सं. ६।६।३१) इत्याद्यास्तिस्रः । स्मृ. चं. । अघमर्षणम् 'ऋतं च' (ऋ. सं. ८।८।४८) इत्याद्यास्तिस्रः । स्मृ. चं. । अत्र वाचस्पतिमिश्रीये द्वैतनिर्णये- 'अघमर्षणसूक्तं माध्यन्दिनीयानां नास्त्येव । ऋग्वेदे तैत्तिरीयके चास्ति । तत्र तैत्तिरीयकस्य याज्ञवल्क्येनोदीर्णतया माध्यन्दिनीयैस्तदुक्तं न परिगृह्यते, किंतु ऋग्वेदोक्तमेवाघमर्षणसूक्तमादेयम्-इति निर्णीतम् । शंवत्यः 'शं न इन्द्राग्नी' (ऋ. ५।३।२८) इत्यादयः । 'शंवतीः पारयन्ति' (ऋ. ५।३।३० परि०) इत्यादय इति नन्दपण्डितः । स्वस्तिमत्यः 'स्वस्ति नो मिमीतां०, (ऋ. ४।२।७) इत्याद्याः । पावमान्यः- 'स्वादिष्ठयेति सूक्तानां सप्तषष्टिरिहोदिताः । दशोत्तराण्यृचां चैव पावमानीः शतानि षट् ॥' इति शौनकः । 'स्वादिष्ठया' (६।७।१६) इत्यादयो 'यत्ते राजञ्छृतं हविः ।' (ऋ. ७।५।२८) इत्येतदन्ताः ॥ अप० । 'पवमानः सुवर्जनः' (तै. ब्रा. १।४।८) इत्यादय इति केचित् । अघमर्षणम्-व्रतविशेषः ॥ तद्विधिमाह विष्णुः-(४६।२-९)'त्र्यहं नाश्नीयात् । प्रत्यहं च त्रिषवणं स्नानमाचरेत् । त्रिः प्रतिस्रानमप्सु मज्जनम् । मन्त्रैरघमर्षणं जपेत् । दिवा स्थितस्तिष्ठेत्, रात्रावासीनः । कर्मणोऽन्ते पयस्विनीं दद्यात् । इत्यघमर्षणम्' इति । अपरार्के तु 'पावमान्यस्तथैव च' इत्येव पाठः ।

सर्वत्रैव प्रयुञ्जीत कृच्छ्रादिव्रतमाचरन् ।'

वैशम्पायनः—

'ऋषभं च विराजं च शुद्धवत्योऽघमर्षणम् ।
गायत्रीं वा जपेद्देवीं पवित्रां वेदमातरम् ॥
शतमष्टशतं वाऽपि सहस्रमथवाऽपरम् ।'

स एव—'स्नात्वोपतिष्ठेदादित्यं सौरीभिस्तु कृताञ्जलिः ।'

गौतमः (२।८।९)– 'रौरवयौधाजपे नित्यं प्रयुञ्जीत ।'

—रौरवयौधाजपे सामनी । षट्त्रिंशन्मते—

'जपहोमादि यत्किञ्चित्कृच्छ्रोक्तं सम्भवेन्न चेत् ।
सर्वं व्याहृतिभिः कुर्याद्गायत्र्या प्रणवेन वा ॥'

हारीतः—

'सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्' इति ।

निवेदनं 'अग्ने व्रतपते व्रतं' इत्यादिमन्त्रेणेत्यपरार्के–

पराशरः–(८।४१)

'प्रायश्चित्तेषु सर्वेषु कुर्याद्ब्राह्मणभोजनम् ।
शक्त्या वित्तानुसारेण प्रायश्चित्तानुरूपतः ॥
आ सहस्रादा शताद्वा दशान्तमथ वा जपेत् ।
ओंकाराद्यं तथाऽन्यद्वा गायत्रीमथ वाऽयुतम् ॥'

---

१ 'सुरूपकृत्नुमूतये' (सा. सं. उ. ४।१।१६) 'पिबासोममिन्द्र मन्दतु त्वा' (सा. सं.उ. ३।१।१३) 'स्वादोरित्था' (सा. सं. उ. ३।२।१५) इत्यूगुत्पन्नानि सामानि ऋषभाः ।'–श्राद्धकाशिका । 'पिबा सोमं०' (सा. सं. उ. ३।१।१३) इति विराजम् । 'विरजम्'इति पाठे तदन्वेष्यम् । अन्यत्प्रसिद्धम् ।

२ सौर्यैः–'उदुत्यं जातवेदसं' (ऋ. सं. १।४।७) इत्याद्यास्त्रयोदश 'षष्टिश्चार्धर्चश्चैतासां सूर्य एव देवतात्वं' इत्यादिनोक्ता वा ।

३ 'पुनानः सोमधारया०' (सा. सं. उ. १।१।९) इत्यस्यामृचि गीते – ह. द. शास्त्रदीपिकादिषु 'यौधाजये' इति दृश्यते ॥ एतत्सामगविषयम्, अनधीतसामवेदेन गायत्र्यादिकमेव जप्तव्यम् ।—मि. ।

४ 'अग्ने व्रतपते व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयम्' एवं 'वायो व्रतपते०' 'सूर्य व्रतपते०' इति । अप० । अन्ये तु 'अग्ने व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम् ॥ वायो व्रतपते० । आदित्य व्रतपते० । व्रतानां व्रतपते० । (तै. ब्रा. ३।७।४) इति तैत्तिरीये पठिता एव ग्राह्या इत्याहुः ।

अशक्तौ प्रायश्चित्तमन्यद्वाराऽपि कार्यमिति प्रायश्चित्तविवेके ब्राह्मे-

'रोगी वृद्धस्तु पोगंडः[1] कुर्यादन्यैर्व्रतं सदा' इति ।

—कुर्यात् कारयेत् ।

पराशरः—(६।४५)

'व्याधिव्यसनिनि श्रान्ते दुर्भिक्षे डामरे तथा ।
उपवासो व्रतं होमो द्विजसम्पादितानि वै ॥'

— शुद्धिकराणीति शेषः । डामरं परचक्रादि ।

व्रतान्ते कर्त्तव्यमाह पराशरः (११।३)—

'पञ्चगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः ।
एकद्वित्रिचतुर्गावो दद्याद्विप्राद्यनुक्रमात् ॥'

ब्रह्मकूर्चप्रकारो वक्ष्यते । शिष्टास्तु पूर्वमेव ब्रह्मकूर्चं कुर्वन्ति ।

यमः—(बृ. य. २।७)

'प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते ।
शुद्धस्तदहरेवाऽसाविह लोके परत्र च ॥' इति

अङ्गिरा अपि—

'यो यदर्थं चरेद्धर्ममप्राप्य म्रियते व्रतम् ।
स तत्पुण्यफलं प्रेत्य प्राप्नुयान्मनुरब्रवीत् ॥'

छागलेयः—

'पूर्वं व्रतं गृहीत्वा तु नाचरत्कामसंमोहितः ।
जीवन्भवति चण्डालो मृतः श्वा चाभिजायते ॥'

वायवीये—

'लोभान्मोहात्प्रमादाद्वा व्रतभङ्गो भवेद्यदि ।
उपवासत्रयं कुर्यात् कुर्याद्वा केशमुण्डनम् ॥
प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।'

—वाशब्दः समुच्चये ।

---

१ पोगण्डः शरीरविकलः, 'शरीरपाणिचरणैर्निसर्गेण शरीरिणः । विकलाः सद्भि-रुच्यन्ते पोगण्डकुणिपङ्गवः ॥' इति नारदस्मृतिभाष्ये वररुचिवचनात् ।

अथ साधारणप्रयोगः ।

तत्र प्रायश्चित्तं तावत्स्त्रीरोगिवृद्धबालादिष्वर्द्धम् । पञ्चवर्षात्पूर्वं पादः। षोडशवर्षाधिकब्रह्मचारिणि द्विगुणम् । यतौ चतुर्गुणम् । क्षत्रविट्-शूद्राणां पादपादहानिः । ब्रह्मवधे चतुर्विधसाहसे च तेषां द्वित्रिचतुर्गुणम् । सर्वपापेष्वनुग्राहकप्रयोजकानुमन्तृनिमित्तानां क्रमात्पादपादहानिः । निमित्तिनः पादः । अनुलोमानां मातृतुल्यम् । प्रतिलोमानां शूद्रतुल्यम् । स्त्रीशूद्रयोरङ्गप्रधानजपहोममन्त्ररहितम् । प्रत्याम्नायाश्च प्राजापत्ये धेनुरेका देया । तन्मूल्यं वा । तच्च चत्वारिंशन्माषास्तदर्द्धं वा हेम । रूप्यं चैतावत् । त्रिपुराणं वा रूप्यम् । द्वात्रिंशद्गुञ्जः पुराणः। द्वादशविप्रभोजनम्, अयुतं गायत्रीजपः, गायत्र्या सहस्रतिलाहुतयः, संहितापारायणम्, पञ्चथां तीर्थसम्बन्धि योजनगमनम्, शुष्ककेशस्य द्वादशस्नानानि, प्राणायामशतद्वयं, पावकेष्टिः, पावनी वेति । एकस्मिन् चान्द्रायणे प्राजापत्यप्रत्याम्नायास्त्रिगुणाः, अतिकृच्छ्रे द्विगुणाः, त्रिंशत्प्राजापत्यसममब्दमित्यादि ॥

प्रायश्चित्तं सदाचाराद्रिक्तायां तिथौ दिनान्तेऽपराह्णेऽपि वा द्वौ त्रींश्चतुरः पञ्च सप्त दश वा विप्रानाहिताग्नीनन्यान्वा एकमेवाध्यात्मविदं वा पर्षत्त्वेनोपवेश्य, तेभ्यो गोवृषौ तन्निष्क्रयं वा दत्त्वा, प्रदक्षिणीकृत्य साष्टाङ्गं भूमौ प्रणमेत् ।

'सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥
मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ।
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ ॥
पूज्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्तमैः ।'

---

१ ततस्तैः 'किं ते कार्यं, वदास्माभिः' इति पृष्टः अमुकशर्मणो मे जन्मप्रभृत्यद्य यावत् ज्ञानाज्ञान ... ... सम्भावितानां पातकानां निरासार्थमनुग्रहं कृत्वा प्रायश्चित्तमुपदिशन्तु भवन्त इत्युक्त्वा प्रणमेत्प्रार्थयेच्च । प्रा. मु.

इति मन्त्राभ्यां तात्पर्यपेदाचारात्। ततः सभ्यास्तच्छक्तिं विचार्य संमत्या तत्तत्प्रायश्चित्तविधिवाक्यमुक्त्वा अशक्तस्त्रीबालवृद्धरोग्यादिष्वनुग्रहं कृत्वा सभ्यान्यानुवादकविप्रद्वारामुकक्रमेजन्यपापनाशार्थमिदं प्रायश्चित्तमशक्तावमुकप्रत्याम्नायेन त्वया कार्यम्, तेन त्वं शुद्धो भविष्यसीति। सर्वप्रायश्चित्ते तु—तव जन्मप्रभृति अद्य यावत् ज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकातिपातकलघुपातकसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपापानां मध्ये संभावितानां नाशार्थं षडब्दम्, अशक्तौ त्र्यब्दं, सार्द्धाब्दं वा प्रायश्चित्तं त्वं कुर्विति।

अयं चोपदेशो व्रतकर्त्रा पुस्तकपूजने सभ्येभ्यश्च तदुद्देशेन गोदाने च कृते वारत्रयं कार्य इति सम्प्रदायः।

ततः कर्त्ता मासपक्षादि स्मृत्वा 'मम जन्मप्रभृत्यद्य यावत्' इत्यादि प्रायश्चित्तमित्यन्तं पूर्वोक्तमुक्त्वा 'अहं करिष्ये' इति सङ्कल्प्य

'यानि कानि च पापानि ब्रह्महत्यासमानि च।
केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम्' ॥

इति मन्त्रमुक्त्वा कक्षोपस्थशिखावर्जं क्रमेण श्मश्रूपपक्षकेशानुदक्संस्थान् वापयेत्।

यतिविधवादीनां सशिखं वपनम्। ब्रह्महत्यादिष्वपि सशिखं, सर्वाङ्गलोम्नां च। सधवानां व्यङ्गुलकेशाग्रच्छेदनम्। राजतत्पुत्रबहुश्रुतविप्राणामिच्छया वपनाभावः। तदा च द्विगुणं व्रतम्। दक्षिणा च द्विगुणा। इत्थं वापयित्वा'आयुर्बलेम्' इत्यादिना च दन्तधावनं कृत्वा दश स्नानानि कुर्यात्—

तत्र भस्मस्नानम्— 'ईशानः सर्वविद्यानां' इति शिरसि। 'तत्पुरुषायः इति मुखे। 'अघोरेभ्योऽथ घोरेभ्यः' इति हृदि। 'वामदेवाय' इति गुह्ये। 'सद्यो जातं' इति पादयोः। प्रणवेन सर्वाङ्गे। यद्वा— 'ईशानाय नमः' शिरसि। 'तत्पुरुषाय नमः' मुखे। 'अघोराय

१ कर्ता च भवदनुग्रह इति वदेत्। प्रा. मु.

२ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते! ॥ (छं. प. १।१०)

नमः' हृदि। 'वामदेवाय नमः' गुह्ये। 'सद्योजाताय नमः' पादयोः। प्रणवेन सर्वाङ्गे। 'अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वं ह वा इदं भस्म' इति मन्त्रैः क्रमान्मुखादिषु। ततो गोमयमादाय त्रिधा कृत्वा सूर्याय प्रदर्श्य

'अग्रमग्रं चरन्तीनामोषधीनां वने वने।
तासामृषभपत्नीनां पवित्रं कायशोधनम्।
तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा' ॥

इति मन्त्रेणैकेन भागेन नाभेरधः, परेण नाभेरूर्ध्वमाकण्ठम्, अन्येन च शिरः क्षालयेत्। 'मानस्तोके' (ऋक्सं. १।८) इति वा मन्त्रः। ततः

'अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके! हर मे पापं यन्मया दुष्कृतं कृतम्॥'

(मत्स्यपु. १०२।१०)

—इति मृत्तिकामभिमन्त्र्य—

'उद्धृतासि वराहेण कृष्णेन शतबाहुना।
मृत्तिके! ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता॥
मृत्तिके! हर तत्सर्वं यन्मया दुष्कृतं कृतम्।
मृत्तिके! देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥
त्वया हतेन पापेन जीवामि शरदां शतम्।'

इति ब्रह्माण्डीयमन्त्रेण खनित्वा, 'नमो मित्रस्य' (ऋक्सं. ७।८।१२) इति सूर्याय प्रदर्श्य, त्रिधा कृत्वैकस्माद्भागात्षट् चतस्रो वा मृदः पादयोः जङ्घोरुकटिबस्तिषु प्रत्येकं चतस्रः, गुह्ये षट्, उदरकुक्षिपृष्ठवक्षोहस्तकण्ठेषु द्वे द्वे, शिरस्येका। मृत्परिमाणमार्द्रामलकमात्रम्।

ततः 'आपो अस्मान्मातरः' (ऋक्सं. ७।६।२४) 'इदं विष्णुः' (ऋक्सं. १।२।७) इत्येताभ्यां, 'देवस्य त्वा' (शु. य. १।१० इत्यनेन वा स्नात्वा, गायत्र्या गोमूत्रेण, 'गन्धद्वारां' इति गोमयेन

'आप्यायस्व' (ऋक्सं. १।६।३२) इति दुग्धेन, 'दधिक्राव्णः (ऋक्सं. ३।७।१३) इति दध्ना, 'तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि। प्रियं देवानामनाधृष्यं देवयजनमसि' (शु. य. २२।१) इत्याज्येन 'देवस्यत्वा' (तै. सं. १।१।६।६) इति कुशोदकेन स्नायात्। यद्वैतानि दशापि स्नानान्यमन्त्रकाण्येव कार्याणि।

ततो 'हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः" (तै. आ. १०।१)इत्येताभ्यां तीर्थं प्रार्थ्य 'ॐनमो नारायणाय' इत्यष्टाक्षरेण तीर्थं प्रकल्प्य 'ॐ भूर्भुवः स्वः' इति त्रिराचम्य सकृन्निमज्य, 'याः प्रवत' (तै. सं. ४।२।९) इत्येतया व्याहृतिभिर्गायत्र्या जलमभिमन्त्र्यापामार्गदूर्वाकुशैः 'काण्डात् काण्डात्' (तै. आ. १०।५) 'या शतेन (शु. य. १३।२०।२१) इति द्वाभ्यां प्रणव–व्याहृति–गायत्री – आपो हि ष्ठाभिर्मार्जयित्वाऽन्तर्जले। 'ऋतं च' (ऋक्सं. ८।८।४८) इति तृचं जप्त्वा त्रिर्निमज्य देवर्षिपितॄन्सन्तर्प्य शुष्कं वासो धृत्वा, व्यधिकैर्विप्रैरावाहनाग्नौकरणस्वधावाचनरहितपार्वणविधिना श्राद्धं कुर्यात्। तत्र सर्वेष्वपि विप्रेषु विष्णोरेवावाहनम्। तत एकां गां हिरण्यं च दत्त्वा, व्याहृतिभिः शालाग्नौ अष्टाविंशत्यादिसङ्ख्यया ऽऽज्यं क्रमादग्निवायुसूर्यप्रजापतिदैवत्यं हुत्वा, ब्रह्मकूर्चहोममपि कुर्यादाचारात्। तत्र ताम्रे पालाशे पात्रे वा पात्रेऽरुणायाः कृष्णाया वा गोमूत्रं पलमितमष्टमाषमितं वा गायत्र्याऽऽदाय, श्वेताया अङ्गुष्ठार्द्धमितं षोडशमाषमितं वा गोमयं 'गन्धद्वारां' (तै. आ.१०।१) इति, ताम्राया हेमवर्णाया वा पयः सप्तपलं द्वादशमाषमितं गोमयाष्टगुणं गोमूत्रत्रिगुणं वा 'आप्यायस्व' इति, रक्तायाः कृष्णाया वा दधि त्रिपलं दशमाषमितं गोमयात्पञ्चगुणमष्टगुणं गोमूत्रद्विगुणं वा 'दधिक्राव्णः' (ऋक्सं. ३।७।१३) इति, कपिलाया नीलाया वा घृतमेकपलमष्टमाषमितं गोमयाच्चतुर्गुणं वा 'तेजोऽसि शुक्रमसि' (शु. य. २२।१) इति, कुशोदकं च पलमितं चतुर्माषमितं वा 'देवस्य त्वा' इति गृह्णीयात्। गोमूत्रादि कापिलं वा ग्राह्यम्। अलाभे गव्यमात्रम्। एतन्मन्त्रान्ते गृह्णामीति वाक्यशेषः।

ततः 'आपो हि ष्ठा' (ऋक्सं. ७।६।५)' इति हस्तेनालोड्य, 'मानस्तोके (ऋ. सं. १।८।६) इति यज्ञियकाष्ठेन निर्मथ्य, सप्तावरैः कुशैः त्रिभिः पलाशपत्रैर्वा जुहुयात्।

मन्त्रास्तु—'ॐ इरावती धेनुमतीहि भूतं०' (ऋक्सं.५।६।२४) पृथिव्या इदं न ममेति त्यागः। 'इदं विष्णुः' (ऋक्सं. १।२।७) विष्णवे इदं०। 'मानस्तोके०' रुद्राय०। 'शन्नो देवी'[1] (ऋक्सं.७।६।५) अद्भ्यः स्वाहा, अद्भ्य इदं०। अग्नये स्वाहा, अग्नय इदं०। सोमाय स्वाहा, सोमायेदं०। गायत्र्या सवित्रे०। 'प्रजापते न त्वदेतान्यन्यो०। (ऋक्सं. ८।७।४) ॐ प्रजापतये स्वाहा, प्रजापतय इदं०। अयं च ब्रह्मकूर्चहोमोऽन्ते प्रमाणवान्। ततः स्विष्टकृदादि होमशेषं समाप्य, तारकोदये होमावशिष्टं पञ्चगव्यं प्रणवेनालोड्य, प्रणवेन निर्मथ्य, प्रणवेन पीत्वा, सभ्योपदिष्टं सङ्कल्पितं प्रायश्चित्तं साक्षाद्यथासम्भवप्रत्याम्नायेन वा कृत्वा, पूर्ववद्व्याहृतिभिराज्यहोमं ब्रह्मकूर्चहोमं विष्णुश्राद्धं च कृत्वा, गोहिरण्यादिदक्षिणां च दत्त्वा, शिरसा तृणभारमानीय गोभ्यो दत्त्वा, ताभिर्भक्षिते शुद्धयेत्।

॥ इति श्रीमीमांसकशङ्करभट्टात्मजनीलकण्ठकृते भगवन्तभास्करे प्रायश्चित्तमयूखे साधारणः प्रायश्चित्तप्रयोगः ॥

अथ कृच्छ्रादिस्वरूपम्।

याज्ञवल्क्यः—(३।३१८–३१९)

'एकभक्तेन नक्तेन तथैवाऽयाचितेन[2] वा।
उपवासेन चैकेन लघुकृच्छ्र उदाहृतः ॥
यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते।
एष एवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः ॥' इति।

१नारायणभट्टैरस्य स्थाने 'ब्रह्म जज्ञानं' इति मन्त्रो लिखितः।

२एतच्च प्राशनं ग्रामाद्बहिः कार्यमिति नारायणभट्टाः।

३न विद्यते याचितं यस्मिन् भोजने तदयाचितम्। तेन कालविशेषानुपादानाद्दिवा रात्रौ वा सकृदित्येव। तपोरूपत्वात्कृच्छ्राणां द्वितीयभोजने तदनुपपत्तेः। अयाचितमिति न केवलपरकीयान्नयाचनप्रतिषेधः, अपि तु स्वकीयमपि परिचारकभार्यादिभ्यो न याचितव्यम्। प्रेषणाध्येषणयोः समानत्वाद्याच्ञायाः। अतः स्वगृहेऽपि भृत्यभार्यादयोऽनाज्ञप्ता एव यदि भोजनमुपहरन्ति,तर्हि भोक्तव्यम्। नान्यथा।—मि.

लघुकृच्छ्रस्यैव शिशुकृच्छ्र इति नामान्तरम् । यथाकथञ्चित् अनुलोमः, प्रतिलोमो, दण्डकलितवदावृत्तः, स्वस्थानविवृद्धो वा। एतांश्चत्वारोऽपि पक्षान्तत्यन्तरसिद्धान् यथाकथञ्चित्पदेनैव सङ्ग्राह योगी । ग्राससङ्ख्यामाहापस्तम्बः–(१।२९।५०)

'सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः ।
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतम् ॥
कुक्कुटाण्डप्रमाणाः स्युर्यथा वाऽऽस्यं विशेत्सुखम् ॥'

पाराशर्ये तु—

'सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।' इति पूर्वार्द्धम्।

चतुर्विंशतिमते तु—

'प्रातस्तु द्वादश ग्रासाः सायं पञ्चदशैव तु ।
अयाचिते तु द्वावष्टौ परं वै मारुताशनः ॥' इति ।

आसां च सङ्ख्यानां शक्त्या विकल्पः । अतिकृच्छ्रे उपवासभिन्न नवदिने भोजनेषु पाणिपूरान्नविधिः । पाणिपूरमेकग्रासमितम् ।

'एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ॥'
इति मनूक्तेः(११।२१३)।

साङ्गं प्राजापत्यमाह गौतमः–(३।८।२–१६)

'हविष्यान्प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयात् । अथापरं त्र्यहं नक्तं भुञ्जीत । अथापरं त्र्यहं न कञ्चन याचेत। अथापरं त्र्यहमुपवसेत् । तिष्ठदहनि रात्रावासीत क्षिप्रकामः । सत्यं वदेत् । अनार्यैर्न सम्भाषेत। रौरवयौधाजपे नित्यं प्रयुञ्जीत । अनुसवनमुदकोपस्पर्शनम् 'आपो हि ष्ठा' इति तिसृभिः पवित्रवतीभिर्मार्ज्जयीत । 'हिरण्यवर्णाः शुचयः पावकाः'(तै.सं.५।६।१)इत्यष्टाभिः ।

अथोदकतर्पणम् । नमोऽहमाय मोहमाय मंहमाय धुन्वते तापसाय पुनर्वसवे (१) नमो मौञ्ज्यायौञ्ज्याय सुविविदाय सुविदे सर्वविदाय (२) नमः पाराय सुपाराय महापाराय पारदाय पारयिष्णवे (३) नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायैकचरा याधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने(४) नमः

सूर्यायादित्याय (५) नमो नीलग्रीवाय शितिकण्ठाय (६) नमः कृष्णाय पिंगलाय (७) नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे (८) नमः सत्याय पावकाय पावकवर्णाय कामाय कामरूपिणे(९)नमो दीप्ताय दीपरूपिणे(१०)नमस्तीक्ष्णाय तीक्ष्णरूपिणे(११) नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषाय (उत्तमपुरुषाय) ब्रह्मचारिणे (१२) नमश्चन्द्रललाटाय कृत्तिवाससे (१३) नम इति। एत एवादित्योपस्थानम्। एता एवाज्याहुतयः। द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो जुहुयात्। अग्नये स्वाहा सोमाय स्वाहाऽग्नीषोमाभ्यामिन्द्राग्निभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये स्विष्टकृत इति। अन्ते ब्राह्मणभोजनम्। एतेनातिकृच्छ्रो व्याख्यातः इति।

'नमोऽहमाय' इत्यादयस्त्रयोदशमन्त्राः नमःपूर्वा नमोन्ताश्चेति हरदत्तः। कौथुमब्राह्मणे तु तथैव पाठः।

अथ कृच्छ्रातिकृच्छ्रः।

याज्ञवल्क्यः (३। ३२०)

'कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।' इति।

—पयो जलम्, 'चरेत्कृच्छ्रातिकृच्छ्रं तु पिबेत्तोयं तु शीतलम्' इति ब्रह्माण्डपुराणात्।

अथ पराकः।

स एव (३।३२०)

"द्वादशाहोपवासेन पराकः परिकीर्त्तितः।" इति।

मासोपवासकृच्छ्रमाह जाबालः—

'अनभ्यन्मासमेकं तु महापातकनाशनम्।' इति।

यावककृच्छ्रमाह शङ्खः— (१८।१०)

'गोपुरीषाद्यवानश्नन् मासमेकं समाहितः।
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥'

तप्तकृच्छ्रमाह मनुः— (११।२१४)

'तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्।
प्रतिन्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः॥'

---

१ पयः क्षीरमित्यपरार्कविज्ञानेश्वरादयः।

पराशरः—(४।८)

'षट्पलं तु पिबेद्दंभस्त्रिपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रो विधीयते ॥'

तप्तकृच्छ्रमुक्त्वा शङ्खलिखितौ—

'एष एव शीतैः शीतकृच्छ्रः ।' इति ।

ब्रह्मकूर्चमाह जाबालः—

'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः ॥'

प्रजापतिः—

'पालाशं पद्मपत्रं वा ताम्रं वाऽथ हिरण्मयम् ।
गृहीत्वाऽऽदायित्वा तु ततः कर्म समाचरेत् ॥'

पराशरः—(११।२९-३०)

'गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् ।
पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ॥
कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वा ।' इति ।

स एव—(११।३०-३१)

'मूत्रमेकपलं दद्यादङ्गुष्ठार्द्धं तु गोमयम् ।
क्षीरं सप्तपलं दद्यादधि त्रिपलमुच्यते ॥
घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ।'

---

१ 'बौधायनः— (४।५।२६) 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
यवाचामेन संयुक्तो ब्रह्मकूर्चोऽतिपावनः ॥'

गवां वर्णान्तरस्य पञ्चगव्यपरिमाणान्तरस्य च बोधकवाक्यानि ग्रन्थान्तरे द्रष्टव्यानि। तदर्थस्तु प्रयोगेऽस्माभिः सङ्गृहीतः।

पराशरः (११।३३)

'आपो हि ष्ठेति चालोड्य मानस्तोकेति मन्त्रयेत् ॥'

स एव (२१।२४)

'सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः।
तैरुद्धृत्य तु होतव्यं पञ्चगव्यं यथाविधि ॥' इति।

प्रजापतिस्तु—

'स्थापयित्वाऽथ दर्भेषु पालाशैः पत्रकैरथ।
तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमम् ॥'

पराशरः (११।३५–३६)

'इरावती इदं विष्णुर्मानस्तोके च शंवती।
एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः ॥'

---

१ विष्णुधर्मोत्तरे—(१।९३।३–४)

'पयः काञ्चनवर्णाया नीलायाश्च तथा घृतम्।
दधि वै कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् ॥
गोमूत्रं ताम्रवर्णायाः पञ्चगव्यं प्रकल्पयेत्।'

एतासां विशेषलक्षणानि **विधानमालायाम्**—

'नवाम्रपल्लवाभा या पीतनेत्रा सुलक्षणा।
सा धेनुः **कपिला** ज्ञेया साक्षाद्विष्णुस्वरूपिणी ॥
लाक्षारससमानाभा श्वेतरोम्णी ललाटतः।
सा **रक्ता** कथिता विष्णुस्वरूपा धेनुरुत्तमा ॥
या गौः स्फटिकसङ्काशा सुस्निग्धा स्निग्धलोचना।
सा गौः **श्वेता** समादिष्टा मुनिभिस्तत्त्वदर्शिभिः ॥
अतसीपुष्पसङ्काशा लम्बपीनपयोधरा।
सा **नीली** सुरभिर्ज्ञेया महापापविनाशिनी ॥
भिन्नाञ्जनसमानाभा पीनोध्नी चारुमस्तका।
सा कृष्णा कृष्णरूपा च महादोषनिवारिणी ॥' इति।

'कांस्यपात्रस्थितविलीनघृतसमानवर्णा कपिला' इति कुत्रचित्।

'एकवर्णा तु कपिला' इति स्मृत्यन्तरम्।

प्रजापतिः—

'अग्नये चैव सोमाय सावित्र्या च तथैव च ।
प्रणवेन तथा हुत्वा स्विष्टकृच्च तथैव च ॥

मरीचिः—

'अग्नये स्वाहा । सोमाय स्वाहा । इरावती । इदं विष्णुः । मानस्तोके । गायत्र्या । 'प्रजापते न त्वदेतानि' इत्याज्याहुतीरग्नौ जुहुयात् ।

पराशरः— (११।३६)

'आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ।
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ॥'

मरीचिः—

'पालाशेन च पत्रेण बिल्वपत्रेण वा पिबेत् ।
तृतीयं ताम्रपात्रं वा ब्रह्मपात्राणि तानि वै ॥'

वृद्धपराशरः— (९।३९ परा.११।३९ वृ. शा. १२)

'यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
ब्रह्मकूर्चो दहेत्सर्वं शुष्कमग्निरिवेन्धनम् ।' इति

पानदिने चोपवासः ।

ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेन्धनम् ।
इति (६।२९) पराशरोक्तेः ।

अथ सान्तपनम् ।

शङ्खः—(१८।८)

'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥
एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतम् ।'

महासान्तपनमाह याज्ञवल्क्यः— (३।३१६)

'पृथक् सान्तपनद्रव्यैः षडहः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥'

---

१ यत्त्वगस्थि—(११।३०) इति श्लोकोत्तरार्द्धस्यैव पाठान्तरमिदं मिताक्षरायां (३।३१४) पठ्यते ।

यमः—

'एतान्येव च पेयानि एकैकं च त्र्यहं त्र्यहम् ।
अतिसान्तपनं नाम श्वपाकमपि शोधयेत् ॥'

द्वादशाहोऽयम् ।

'त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः ॥'

पञ्चदशाहोऽयम् ।

जाबालः—

'एकैकमेतदेवं हि त्रिरात्रमुपयोजयेत् ।
त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥' इति ।

एकविंशतिरात्रोऽयम् ।

अथ तुलापुरुषकृच्छ्रः ।

शङ्खः—(१८।१०)

'पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् ।
उपवासान्तराभ्यासात्तुलापुरुष उच्यते ॥'

अथ चान्द्रायणम् ।

यमः—(६।६४,६३, २१—२३)

'वर्द्धयेत् पिण्डमेकैकं शुक्ले कृष्णे च ह्रासयेत् ।
एतच्चान्द्रायणं नाम यवमध्यं प्रकीर्तितम् ॥
एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
एतत्पिपीलिकामध्यं चान्द्रायणमुदाहृतम् ।
त्रींस्त्रीन् पिण्डान्समश्नीयान्नियतात्मा दृढव्रतः ।
हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम् ॥
चतुरः प्रातरश्नीयाच्चतुरः सायमेव च ।
पिण्डानेतद्धि बालानां शिशुचान्द्रायणं स्मृतम् ॥
पिण्डानष्टौ समश्नीयान्मासं मध्यन्दिने रवौ ।
यतिचान्द्रायणं ह्येतत्सर्वकल्मषनाशनम् ॥'

—यतिचान्द्रायणमिति संज्ञामात्रम् । तेन न यतिमात्रस्यैवात्राधिकारः, किन्तु सर्वेषाम् । एवं शिशुचान्द्रायणेऽपि ।

यवपिपीलिकामध्ययोस्तिथिह्रासे वृद्धौ वा ग्रासानामपि ह्रासवृद्धी। तथा च विष्णुः–(४७।२–३) ग्रासानास्याविकारमश्नीयात्तांश्चन्द्रकलाभिवृद्धौ क्रमेण वर्द्धयेद्धानौ च ह्रासयेदमावास्यायां च नाश्नीयादिति।

एतेन यत्कल्पतरुकृच्छ्रलपाणी आहतुः–'कृष्णप्रतिपदि पञ्चदश ग्रासाः। तत एवैकहानावमावास्यामेको ग्रासः। शुक्लप्रतिपदादिषु ह्यादिवृद्धिः' इति तदपास्तम्।

'अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः।'

(१०।२ बृ. य. २।६) इति पराशरोक्तेश्च।

सामान्यचान्द्रायणमाह स एव—(वि. स्मृ. ४७।९)

'यथाकथञ्चित्पिण्डानां तिस्रोऽशीतीरश्नीयात्स सामान्यचान्द्रायणः' इति। प्रतिदिनं सङ्ख्यानियमादरेण मासेन चत्वारिंशदुत्तरं शतद्वयं ग्रासानश्नीयादित्यर्थः। पिपीलिकायवमध्यभिन्नचान्द्रायणेषु दिनान्तरेऽप्यारम्भो ,न प्रतिपद्येव।

ग्रासपरिमाणमाह याज्ञवल्क्यः—(३।३२३)

'तिथिवृद्ध्या चरेत्पिण्डान् शुक्ले शिख्यण्डसंमितान्।'

(बृ. य. २।५)

—शिखी मयूरः।

चान्द्रायणप्रकरणे पराशरस्तु—(१०।३)

'कुक्कुटाण्डप्रमाणं[1] तु ग्रासं वै परिकल्पयेत्।।'

शङ्खस्तु–'आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः।' इति।

एतेषां च परिमाणानां शक्त्या विकल्पः।

एकादश्यादौ नित्यप्राप्त उपवासस्तावच्चान्द्रायणविधिना बाध्यते एतस्य 'धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम्' (या.३।३२६) इति काम्यत्वात्, लशुनभक्षणादिनिमित्ते विहितत्वेन नैमित्तिकत्वाच्च। काम्यस्त्वेकादश्याद्युपवासोऽन्यद्वारा करणीयः। प्रतिनिधिना कृतेऽपि फलप्राप्तेः कात्यायनादिभिरुक्तत्वात्। वचनानि त्वस्मत्कृते समयमयूखे

१ 'कुक्कुटाण्डप्रमाणं स्याद्यावद्वास्य विशेन्मुखे।' (अत्रिः ४।२७)

२ 'क्षीरादिद्रवहविष्णुशिख्यण्डपरिमितत्वं पर्णपुटकादिना सम्पादनीयम्'–म०

द्रष्टव्यानि । अयं चैकादश्यादुपवासबाधः सामान्यचान्द्रायणभिन्नेष्वेव । तत्र प्रतिदिनग्रासग्रहणनियमाभावात् ।

गौतमः—(३।९।१–१३) " अथातश्चान्द्रायणम् । तस्योक्तो विधिः कृच्छ्रे । वपनं व्रतं चरेच्छ्रोभूतां पौर्णमासीमुपवसेत् ' आप्यायस्व ' 'संते पयांसि' 'नवो नवः' इति चैताभिस्तर्पणम् । आज्यहोमो हविष्यान्नमन्त्रणम् । उपस्थानं चन्द्रमसः । ' यदेवा देवहेडनम' इति चतसृभिराज्यं जुहुयात् । ' देवकृतस्य'इति चान्ते समिद्भिः । ॐ भूः, भुवः, स्वः, तपः, सत्यं, यशः, श्रीः, ऊर्क्, इट्, ओजः, तेजः, वर्चः, पुरुषः, धर्मः, शिवः, इत्येतैर्ग्रासानुमन्त्रणं मनसा । नमः स्वाहेति वा सर्वान् । ग्रासप्रमाणमास्याविकारेण । चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकान्युत्तरोत्तरप्रशस्तानि । पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वा एकैकापचयेन परपक्षमश्नीयात् । अमावास्यामुपोष्यैकैकोपचयेन पूर्वपक्षम् ॥ " इति ।

बौधायनः–(३।८।१–३)

'अथातश्चान्द्रायणकल्पं व्याख्यास्यामः । शुक्लचतुर्दशीमुपवसेत् । कृष्णचतुर्दशीं वा केशश्मश्रुलोमनखानि वापयित्वा स्नात्वा शुक्लपक्षेवा'इत्यादि ।

---

१ अत्र च चान्द्रायणे पूर्वप्रकान्तमेकादश्युपवासादिव्रतं न क्रियते । सङ्ख्याविशेषो हि ग्रासस्म्पाद्यतयाऽङ्गं विधीयते, न चान्द्रायणान्तरवत्प्रत्येकदिवससम्पाद्यतया । शक्नोति चैकादशीमुपवसन्नपि ग्रासस्म्पाद्यां चत्वारिंशच्छतद्वयात्मिकां सङ्ख्यां सम्पादयितुम् । चान्द्रायणान्तरेषु यद्येकादशीमुपवसेत् तत्तन्निमित्तां ग्रासाश्रितामेकादशसङ्ख्यां नैव सम्पादयेदेव, किन्तु विनिपातयेदेव । यद्यपि ग्रासग्रसनमविधेयम्, रागतः प्राप्तत्वात्, तथापि तदाश्रितां सङ्ख्यां चान्द्रायणविधिर्विषयीकरोत्येव– यथा दर्शपूर्णमासविधिव्यापारतः प्राप्तानुष्ठानं गोदोहनं पशुकामविधिः । तत्र यदि दर्शपूर्णमासप्रयुक्तमपां प्रणयनं नास्ति, तदा ' गोदोहनेन पशुकामस्य प्रणयेत् ' इत्येष शास्त्रार्थो न सिद्ध्यति । तथा एकादश्यादौ ग्रासाग्रसने तदाश्रितसङ्ख्याविशेषविषयश्चान्द्रायणविधिर्न सिद्ध्यत्येव । अत्रापि हि रागप्राप्तभोजनाश्रितग्राससङ्ख्याविशेषलक्षणो गुणः पापक्षयादिफलार्थत्वेन विधीयते । तेन ' चान्द्रायणमथापरम् ' इत्येतस्मादन्येषु चान्द्रायणेषु यदैकादश्युपवासाद्यादियते– न तदा चान्द्रायणविधिसिद्धिरिति ।–अप.

यमः-(६।५०)

'आयसं तैजसं पात्रं चक्रोत्पन्नं विवर्जयेत्।
असुराणां हि तत्पात्रं देवपात्रमचक्रकम् ॥'

—चक्रोत्पन्नं घटशरावादि।

स एव-(६।५८)

'अङ्गुल्यग्रस्थितं ग्रासं सावित्र्या चाभिमन्त्रयेत्।'

अत्र ग्रासैरेव प्राणाग्निहोत्रमाह बौधायनः- (३।८।१०।१५।)'अग्नीयात्प्राणाय त्वेति प्रथमम्। अपानाय त्वेति द्वितीयम्। व्यानाय त्वेति तृतीयम्। उदानाय त्वेति चतुर्थम्। समानाय त्वेति पञ्चमम्। यदा चत्वारस्तदा द्वाभ्यां पूर्वम्। यदा त्रयस्तदा द्वाभ्यां द्वाभ्यां पूर्वौ। यदा द्वौ द्वाभ्यां पूर्वं त्रिभिरुत्तरमेकं सर्वैः।' इति। ग्रासद्वयपक्षे प्रथममाद्यैस्त्रिभिरित्यं द्वाभ्याम्। एकपक्षे सर्वैरेकमित्यर्थः।

अथ चान्द्रायणप्रयोगः।

चतुर्दश्यां कृतनित्यक्रियः पूर्वाह्णे प्राणानायम्य मासपक्षाद्युल्लिख्यामुकपापक्षयकामः श्रीकामो देवताप्रीतिकामो रसायनादिसिद्धिकामो वाऽमुकचान्द्रायणं करिष्य इति सङ्कल्प्य, 'अग्ने व्रतपते व्रतं चरिष्यामि' (तै. ब्रा. ३।७।४) इत्यादिमन्त्रैर्व्रतमादित्याय निवेद्य, केशश्मश्रुलोमनखानि श्मश्रूण्येव वा वापयित्वा, तद्दिन उपोष्य, परेद्युरेऽमा चेत्तत्रापुपोष्य, पौर्णिमा चेत्पञ्चदश ग्रासान्भुञ्जीत। तत अमोत्तरपक्षे उपचयः पौर्णिमोत्तरपक्षेऽपचयो ग्रासानाम्। प्रतिदिनमुदिते चन्द्रे 'आप्यायस्व' (ऋ. सं. १।६।२२) सोम तर्पयामि। 'सं ते पयांसि' (ऋ. १।६।२२) चन्द्रं तर्पयामि। 'अयो वयो' (८।३।२३) चन्द्रमसं तर्पयामि इति तर्पयित्वाऽऽज्येन एतैरेव मन्त्रैरौपासनेऽग्नौ हुत्वा एतैरेव पात्रस्थं हविरनुमन्त्र्य एतैरेव चतुरुपस्थाय 'अदेवा देवहेडनम्' (तै.आ.२।३) इति चतसृभिश्च प्रत्यृचमाज्यं जुहुयात्। सर्वत्राग्नये न ममेति त्यागः। ततो 'देवकृतस्य'इति त्रिभिः समिधं हुत्वा 'ॐ भूः, भुवः, स्वः

---

१ अग्नय इदं नममेति त्यक्त्वा। —प्रा. मु.

२ अत्र जहः, जतः, इत्यधिकं ईट्, वर्च इति द्वयं चाग्रे नास्ति। —प्रा. मु.

तपः, सत्यम्, यशः, श्रीः, ऊर्क्, इट्, ओजः, तेजः, वर्चः, पुरुषः, धर्मः, शिवः' इत्येतैः पञ्चदशभिरेकैकक्रमेण पात्रस्थं ग्रासमनुमन्त्र्य मनसा नमः स्वाहेत्युक्त्वा वा सर्वाननुमन्त्र्यैकैकमङ्गुल्य[1]ग्रैर्गृहीत्वा सावित्र्याऽनुमन्त्र्य भक्षयेत्। तत्र प्रथमदिन एकग्रासभक्षणे प्राणाय स्वाहेत्यादयः पञ्चापि मन्त्राः। द्वयोर्ग्रासयोरादौ त्रिभिस्त्रिभिर्मन्त्रैरेकं, द्वाभ्यामपरम्। त्रिषु ग्रासेषु द्वाभ्यां द्वाभ्यां द्वौ एकेनान्त्यः। चतुर्षु द्वाभ्यां पूर्वे, एकैकेनान्यान्। पञ्चभ्योऽधिका ग्रासास्तूष्णीमेव भक्षणीयाः, समाप्तौ व्यवरान् विप्रान् भोजयित्वा गां दक्षिणां दद्यात्। आ समाप्ति प्रत्यहं त्रिषवणस्नानं सौरमन्त्रैः कृताञ्जलेरादित्योपस्थानं गायत्र्या व्याहृतिभिः कूष्माण्डैर्वाऽऽज्यहोमः। दिवा स्थितिः, रात्रावुपवेशनम्। अशक्तौ शयनम्। यथाशक्ति– 'आपो हि ष्ठा' इति सूक्तम्, 'एतो न्विन्द्रं' 'ऋतं च' इति तृचम्, 'शन्न इन्द्राग्नी' (ऋ.५।३।८)' स्वस्ति नो मिमीतां'(ऋ. ४।३।७) 'पुनंतु मा देवजनाः' (तै. ब्रा.) ऋषभं विरजं सौरवयौबाजपे सामनी च पठेत्। एतेषामसम्भवे गायत्रीं व्याहृतीः प्रणवं वा जपेत्। एतच्च विप्रभोजनदक्षिणादानादिजपान्तं सर्वेष्वपि प्राजापत्यादिव्रतेषु तुल्यम्।

॥ इति चान्द्रायणव्रतप्रयोगः ॥

अथ सोमायनम्।

मार्कण्डेयः—

'गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्।
स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात्॥
स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेत्।'

एतत्त्रिंशद्दिनसाध्यम्।

चतुर्विंशतिदिनसाध्यमाह हारीतः–"चतुर्थीप्रभृति चतुःस्तनेन त्रिरात्रम्। त्रिस्तनेन त्रिरात्रम्। द्विस्तनेन त्रिरात्रम्। एकस्तनेन त्रिरात्रम्। एवमेकस्तनप्रभृति पुनश्चतुःस्तनान्तम्। 'या ते सोम चतुर्थी तनूस्तया नः

१ एकैकस्य ग्रासस्य मनसाऽनुमन्त्रणं कर्तव्यम्।–ह. द.

याहि तस्यै स्वाहा'। 'या ते सोम पञ्चमी' 'षष्ठी' इत्येवं यथार्थास्तिथिहोमाः। एकमाश्वा एनोभ्यः पूतश्चन्द्रमसः समानतां सामान्यतां समानलोकतां सायुज्यं च गच्छति। समाप्ते ब्राह्मणतर्पणं दक्षिणादानं च" इति।

—चतुर्थी कृष्णा। समानता तुल्यत्वम्। सामान्यताऽपरचन्द्रत्वम्। सायुज्यं चन्द्राभेदः।

सर्वेषां कृच्छ्राणां फलार्थत्वमप्याह व्यासः—

'श्रीकामः पुष्टिकामश्च स्वर्गकामस्तथैव च।
देवताराधनपरस्तथा कृच्छ्रं समाचरेत्॥
रसायनानि मन्त्राश्च तथा चैवौषधानि च।
तस्य सर्वाणि सिध्यन्ति यो नरः कृच्छ्रकृद्भवेत्॥
वैदिकानि च सर्वाणि यानि काम्यानि कानिचित्।
सिध्यन्ति सर्वदा तानि कृच्छ्रकर्तुर्न संशयः॥' इति।

अथ प्राजापत्यादिप्रत्याम्नायाः।

तत्र तावच्चान्द्रायणद्वादशाब्दादिव्रतविषयेष्वपि पापेषु प्राजापत्यकल्पनामाहतुर्यमोशनसौ — (उ. ३।१९)

'यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम्।
प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः॥'

प्राजापत्यश्च व्रतान्तरानुरोधेनावृत्तो वा।

प्राजापत्यप्रत्याम्नायश्चतुर्विंशमतिमते—

'कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम्।
तिलहोमसहस्रं तु वेदपारायणं तथा॥
विप्रा द्वादश वा भोज्या पावकेष्टिस्तथैव च।
अन्या वा पावमानेष्टिः समान्याहुर्मनीषिणः॥'

अपरार्के—

'समिद्धुतं हविर्धान्यं तिलान्वा मारुताशनः।
हुत्वा द्वादशसाहस्रं गायत्र्या कृच्छ्रमाप्नुयात्॥' इति।
—द्वादशभिरधिकं साहस्रं द्वादशसाहस्रम्।

---

१ विशेष्ये एकसङ्ख्यापरिच्छिन्नेऽपि संख्यान्तरपरिच्छिन्नावृत्तिवैशिष्ट्यस्य वक्तुं शक्यत्वात्। सहस्रमेव साहस्रम्। -अप.

याज्ञवल्क्योऽपि – (३।३०९)

'यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या वाचनं तथा ॥'

–संकीर्णं पापयुक्तम् । वाचनं दानम् । तिलैरित्यत्रापि संबध्यते तिलदानमित्यर्थः । वेदपारायणं संहितापारायणम्, अयुतगायत्री-भिरल्पान्तरितत्वात् । 'संहिताध्ययनं यावत्तं कालं सावित्रीं जपेत्' इत्यपरार्के प्रचेतस्स्मृतेश्च ।

पराशरः—

'कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च ।
धेनुप्रदानं विप्राय सममेतच्चतुष्टयम् ॥' इति

–उदवासोऽहोरात्रमिति महार्णवे ।

मार्कंडेयः–

'प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीम् ।
धेनोरभावे दातव्यं मूल्यं तुल्यं न संशयः ॥' इति ।

संवर्त्तः–

'गवामभावे दातव्यं तुल्यं मूल्यं न संशयः ।' इति ।

मूल्यमुक्तं माधवीये ब्रह्मपुराणे–

'गवामभावे निष्कं स्यात्तदर्द्धं पादमेव वा ।'

रूप्यपरिमाणे निष्कपरिभाषामाह याज्ञवल्क्यः – (१।३६५)

'निष्कं सुवर्णाश्चत्वारः' इति

–सुवर्णचतुष्टयं समतोलितं रूप्यं निष्कमित्यर्थः ।

लीलावत्याम्–

'वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः ।

---

१ गायत्र्यावर्तनम् ' इत्यप०

२ चतुर्विंशतिमते–मा. ।

३ यद्यपि 'धेनुः स्यान्नवसूतिका' । (अ. को. २।९।७१) इत्युक्तम्, तथापि धेनुदानाशक्तौ गोमात्रं दद्यात्, बह्वीषु स्मृतिषु गोपदस्याप्युपादानात् । – कृ. भ.

ते षोडश द्रम्म इहावगम्यो
द्रम्मैस्तथा षोडशभिश्च निष्कः ॥ ' इति ।

मूल्यान्तरमपि प्रायश्चित्तविवेके षट्त्रिंशन्मते—

' धेनुः पञ्चभिराख्यानां मध्यानां त्रिपुराणिका ।
कार्षापणैकमूल्या हि पवित्राणां प्रकीर्तिता ॥ '

दरिद्राणामिति क्वचित्पाठः । पुराणं द्वात्रिंशत्कृष्णलमितं रजतम्

' द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः ।
ते षोडश स्याद्धरणं पुराणश्चैव राजतः ॥ ' (मनुः ८।१३६)

इति मिताक्षरायां स्मृतेः ।

कार्षापणस्तु—

' कार्षापणः स विज्ञेयः कार्षिकस्ताम्रिकः पणः ।'

इति मनूक्तेः (८।१३७)

नारदोक्तोऽपि— (१८।११६)

' कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्तते ।
पौर्णिबद्धः पूर्वस्यां षोडशैव पणाः स तु ॥ '

मूल्याध्याये कात्यायनः—

' द्वात्रिंशत्पणिका गावश्चतुष्कार्षापणो वरः ।
वृषे षट्कार्षापणका अष्टानवडुहि स्मृताः ॥
दशकार्षापणा धेनावश्वे पंचदशैव तु । ' इति ।

एतेषां च गोमूल्यपक्षाणां शक्ताशक्तभेदेन व्यवस्था ।

यत्तु अपरार्के—

' द्वादशैव सहस्राणि जपेद्देवीमुपोषितः ।
जलांते विधिवन्मौनी प्राजापत्योऽयमुच्यते ॥ ' इति ।

—जलांते जलसमीपे । तथा तत्रैव चतुर्विंशतिमतमुक्तम्—

' अतिकृच्छ्रे पराके च प्राजापत्यत्रयं कुर्यात्कृच्छ्रे गोमिथुनम् ' इति ।—

अत्र द्वादशसहस्रगायत्रीजपो गोमिथुनं च गौतमाद्युक्तप्राजापत्यविषयम्, शक्तविषयं वा । तत्रैव—

---

१ ' रूढ ' इति पठित्वा ' द्रविडविषयादौ रूढ एव लोहैः कृतो रूपमानगणनायाम् ' इति व्याख्याति भवस्वामी ।

'अन्नदानहिरण्येन द्वादश ब्राह्मणान् शुचीन् ।
तर्पयेन्मारुताशी च श्रोत्रियान्कृच्छ्र उच्यते ॥
उपोष्य श्रद्धया युक्तस्तिलपात्राणि धर्मतः ।
द्वादश ब्रह्मवादिभ्यः प्राजापत्येन तत्समम् ॥
स्वयमाहृत्य यो मूर्ध्ना तृणभारानुपोषितः ।
दद्याद्गोमंडले कृच्छ्रे द्वादशैव न संशयः ॥
प्राणायामशतं कृत्वा द्वात्रिंशोत्तरमार्तिषु ।
अहोरात्रोषितस्तिष्ठेत्प्राङ्मुखः कृच्छ्र उच्यते ॥
नमस्कारसहस्राणि द्वादशैव दृढव्रतः ।
गोविप्रपितृदेवेषु कुर्यात्कृच्छ्रत्रयं भवेत् ॥'

तिलपात्राण्युक्तानि कौर्मे –

'तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम् ।
ताम्रपात्रं दशपलं जघन्यं परिकीर्त्तितम् ॥
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतम् ।'

वसिष्ठः – (२७।१७ अत्रिः ३।१२)

'अथ चेत्त्वरते कर्तुं दिवसं मारुताशनः ।
रात्रौ स्थित्वा जले व्युष्टः प्राजापत्येन तत्समम् ॥
गोमूत्रेण समायुक्तं यावकं चोपयोजयेत् ।
कृच्छ्रमेकाहिकं प्रोक्तं दृष्टमंगिरसा स्वयम् ॥
निश्यासीनो दिवा तिष्ठेत्त्रिरात्रं मारुताशनः ।
प्राजापत्यं विजानीयात्कूष्मांडैर्जुहुयाद्घृतम् ॥' इति ।

पराशरः (१२।६३)

'कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् ।
पुण्यतीर्थेऽनार्द्रशिरः स्नानं द्वादशसंख्यया ॥'[1]

माधवीये स्मृत्यन्तरे—

'प्राजापत्यं चरन्विप्रो यद्यशक्तः कथञ्चन ।
अहानि पञ्च विप्राग्र्यान् भोजयेत्सम्यगीप्सितान् ॥'

---

१ – अनार्द्रशिरस्त्वविशेषणात्स्नानानन्तरं तदङ्गमनुष्ठाय शिरः शोषयित्वा द्वितीयवारं स्नायादित्युक्तं भवति ।— वि. म.

अत्र कपिञ्जलाधिकरणन्यायेन (पू. मी. ११।१।६) पञ्चस्वप्यहस्सु त्रयस्त्रयो विप्राः।

कण्वः—

'एकमध्ययनं कुर्यात्प्राजापत्यमथापि वा।
दद्याद्द्वादशसाहस्रं गवां मुष्टिं विचक्षणः॥'

—एकमध्ययनं सकृत्संहिताध्ययनम्। तथा 'षड्डपवासैरपि प्राजापत्यः' इति निबन्धकृतः।

चतुर्विंशतिमते—

'प्राजापत्ये तु गामेकां दद्यात्सान्तपने द्वयम्।
पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा॥' इति।

सान्तपनमत्र महत्, इतरत्र सार्द्धप्राजापत्योक्तेः।

तथा च षट्त्रिंशन्मते—

'पराकतप्तातिकृच्छ्रस्थाने कृच्छ्रत्रयं चरेत्।
सांतपनस्य वाप्यर्द्धमशक्तौ व्रतमाचरेत्॥' इति।

स्मृत्यर्थसारे तु 'पराके पञ्च, तप्तकृच्छ्रे षट्' इति।

अपरार्के मार्कण्डेयः—

'प्राजापत्यसमा धेनुस्तद्वयं तप्तकृच्छ्रके।
पराके तु सुवर्णं स्याद्धेमशृङ्गी तथैव च॥' इति।

—पराके सुवर्णं धेनुद्वयमूल्यसमम्। हेमशृङ्गीग्रहणेन सकलकांस्यदोहाद्युपस्कारवतीं धेनुं लक्षयति।

कर्मविपाकसारे गोरनुवृत्तौ—

'एका कृच्छ्रेऽतिकृच्छ्रे द्वे तिस्रश्चांद्रायणे स्मृताः' इति।

मदनरत्ने स्मृतौ—

'प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम्।
चान्द्रायणे पराके च तिस्रो गा दक्षिणास्तथा॥' इति।

बृहद्विष्णुः—

'चांद्रायणमकुर्वाणाः कुर्युः कृच्छ्रचतुष्टयम्।'

एतच्चतिचान्द्रायणविषयम्।

---

१ एतन्निर्धनविषयम्।— मा.

स एव—

'चान्द्रायणपराकाभ्यां निष्कृतिं यो न शक्नुयात् ।
स करोत्यात्मशुद्ध्यर्थं प्राजापत्यस्य पञ्चकम् ॥' इति ।

—इदमृषिचान्द्रायणपरम् । पिपीलिकायवमध्ययोरष्टधेनूक्तेः, शिशुचांद्रायणादौ च धेनुत्रयोक्तेः ।

यत्तु चतुर्विंशतिमते—

'अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा ।' इति ।

तत्पिपीलिकायवमध्यविषयमतिधनिनः ।

धर्मविवृत्तौ चतुर्विंशतिमते च—

'चान्द्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च ।
मित्रविंदापशुश्चैव कृच्छ्रत्रयमथापि वा ॥
तिलहोमायुतं चैव पराकद्वयमेव च ।
गायत्र्या लक्षमेकं तु समान्याहुर्मनीषिणः ॥
नित्यनैमित्तिकानां च काम्यानां चैव कर्मणाम् ।
इष्टीनां पशुबंधानामभावे चरवः स्मृताः ॥' इति ।

कृच्छ्रातिकृच्छ्रे तु धेनुत्रयम् ।

अत्र—

'विप्रदंडोद्यमे कृच्छ्रस्त्वतिकृच्छ्रे निपातने ।
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यंतरशोणिते ॥
(या. ३।२९२)

इत्यतिकृच्छ्रे धेनुद्वयोक्तेस्तद्विषयनिपातनादधिकेऽसृक्पाते विहितस्य कृच्छ्रातिकृच्छ्रस्यातिकृच्छ्रादाधिक्यावगमाद्धेनुत्रयं प्रत्याम्नायो गम्यते । यदा त्वतिकृच्छ्रे तिस्रस्तदा तु कृच्छ्रातिकृच्छ्रे ततोऽधिके चतस्रः ।

तथा चोत्तरोत्ताराधिक्येनाऽऽह हारीतः—

'अनाश्रमी संवत्सरं प्राजापत्यं चरित्वाऽऽश्रममुपेयात् । द्वितीयेऽतिकृच्छ्रम् । तृतीये कृच्छ्रातिकृच्छ्रम् । अत ऊर्ध्वं चांद्रायणम् ।' इति ।

चतुर्विंशतिमते—

"कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ।

कृच्छ्रे सांतापनाख्ये भवति षडधिका विंशतिः सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान्" ॥

अत्र संख्यान्वितमहरहःपदं भोजनान्वयि । तेन कृच्छ्रे प्रत्यहं पञ्च, अतिकृच्छ्रे प्रत्यहं पञ्चदश । एवमुत्तरत्रेति केचित् । युक्तं तु संख्या-वीप्सयोः परस्परानन्वितयोरेव क्रियान्वयः । तेन कृच्छ्रे पञ्चसु दिने-ष्वेकैको भोज्यः । अतिकृच्छ्रे नवस्वेकैकस्मिषु द्वौ द्वाविति पञ्चदशैव । तृतीये कृच्छ्रातिकृच्छ्रे त्रिंशद्दादशदिने विभज्य भोज्याः । सांतपने चान्द्रायणे च विंशतौ त्रैगुण्यमन्वेति ।

सौम्यकृच्छ्रे एका धेनुः, ब्रह्मकूर्चे द्वे, पराके तिस्रः, मासोपवासे सार्द्धसप्तेति निबन्धकृतः ।

शूलपाणिस्तु—पराके पञ्च, चांद्रायणे सार्द्धसप्त, शिशुचांद्रायणे तप्तकृच्छ्रे च पादोनचतुष्टयम् । कृच्छ्रातिकृच्छ्रे महासांतपने च षट्, मासोपवासे पञ्चदशेत्यूचे ।

अथ तीर्थप्रत्याम्नायाः ।

ब्रह्महत्याव्रतमुपक्रम्य भविष्यत्पुराणे—

' विन्ध्यादुत्तरतो यस्य निवासः परिकीर्त्तितः ।
पराशरमतं तस्य सेतुबन्धस्य दर्शनम् ॥ '

विन्ध्योत्तरवर्तिनमुक्त्वा तत्रैव—

' चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥ '

---

१ अस्यार्थः—अहरह इत्यस्य प्रत्येकं सम्बन्धात् कृच्छ्रे अहरहः पञ्च ब्राह्म-णान् भोजयेत, तेन षष्टिर्भवन्ति । अतिकृच्छ्रे प्रत्यहं पञ्चदश, द्वादशदिने मिलित्वा साशीतिशतं विप्रा भवन्ति । कृच्छ्रातिकृच्छ्रे प्रत्यहं त्रिंशत्, मिलित्वा षष्ट्युत्तरं त्रिशतम् । तप्तकृच्छ्रे प्रत्यहं चत्वारिंशत्, द्व्यहसाध्येऽशीतिः, चतुरहसाध्ये षष्ट्यधिकं शतम्, द्वादशाहसाध्येऽशीत्यधिकं शतचतुष्टयम् । पराके प्रत्यहं षष्टिः, विंशत्यधिकं सप्तशतम् । सान्तपने प्रत्यहं षड्विंशतिः । चान्द्रायणे प्रत्यहं चतु-र्विंशतिः, तत्र मासो यदि त्रिंशद्दिनस्तदा विंशत्यधिकसप्तशतं विप्रा भवन्ति । अधिकन्यूनदिनके तु संख्यासङ्कलनमूह्यम् । कृ. भ.

२ धरणीधरेण श्लोकोऽयं पराशरस्मृतावेव (१२।७९) पठितो व्याख्यातश्च ।

स्मृतिसंग्रहे स्मृत्यर्थसारे च–

'भागीरथ्यां स्नानं षष्टियोजनागतस्य षडब्दसमम्।

अत्र यात्रायोजनवृद्धावर्द्धकृच्छ्रवृद्धिः। एकयोजनागतस्य मध्ये पर्वतादिभिर्व्यवधाने कृच्छ्रत्रयम्। तृतीयांशाधिक्रक्रोशादागतस्य भागीरथ्यां विध्युक्तस्नानमेककृच्छ्रः, अशक्तस्य त्वर्द्धयोजनागतस्य। शक्तस्यापि मार्गस्य दुर्गमत्वे भागीरथीस्नानमर्द्धयोजनागतस्यैकः कृच्छ्र इत्यादि कल्पयन्ति। प्रयागस्नानं षष्टियोजनागतस्य द्वादशाब्दसमम्। गंगाद्वारे गङ्गासागरसङ्गमे चैवम्। यमुनास्नानं विंशतियोजनागतस्य द्वादशाब्दसमम्। मथुरायां द्विगुणम्। सरस्वत्यां चतुरब्दकृच्छ्रसमं चत्वारिंशद्योजनागतस्य। प्रभासे द्वारवत्यां च द्विगुणम्। अनयोर्नवद्योर्योजनवृद्धौ पादकृच्छ्रवृद्धिः। दृषद्वतीशतद्रूविपाशावितस्ताशरावतीमरुद्वृधादिषु स्नानं त्रिंशत्कृच्छ्रसमं पञ्चदशयोजनागतस्य। चंद्रभागावेत्रवतीशरयूगोमतीदेविकाकौशिकीगण्डक्यादिदेवनदीषु स्नानं षोडशकृच्छ्रसमं द्वादशयोजनागतस्य। एतासु महानदीषु परस्परसङ्गमे त्रिनदीफलम्। अन्यासु महानदीषु षट्कृच्छ्रसमम्। महानदेषु महानद्यर्द्धम्। शोणमहानदे गङ्गार्धफलम्। नदेषु नद्यर्द्धम्। वैरोचननदे महानद्यर्द्धम्। नर्मदायां चतुर्विंशतियोजनागतस्य चतुर्विंशतिकृच्छ्रसमम्। कुब्जिकासङ्गमे द्विगुणम्। शुक्लतीर्थे चतुर्गुणम्। ताप्यां दशकृच्छ्रसमं दशयोजनागतस्य। पयोष्ण्यास्त्वष्टयोजनागतस्याष्टकृच्छ्रसमम्। तत्र तत्र सङ्गमे द्विगुणम्। गोदावर्यां षष्टियोजनागतस्य द्वादशसमम्। त्रिंशद्योजनागतस्यैकाब्दम्। दशतीर्थेषु प्रतिलोमानुलोमस्नानं षष्टिकृच्छ्रसमम्। वञ्जरासङ्गमे प्रयागे तद्द्विगुणम्। सप्तगोदावर्यां भीमेश्वरे त्रिगुणम्। कुशतर्पणे गयासमम्। वञ्जरायां द्वादशयोजनागतस्य द्वादशकृच्छ्रसमम्। गोदावर्यां विश्लेषे समुद्रानं पङ्गुगम्। प्रणीतायां चतुःकृच्छ्रसमं चतुर्योजने। पूर्णायां तदर्द्धं योजने। कृष्णवेणायां पञ्चदशयोजने पञ्चदशकृच्छ्रसमम्। तुङ्गभद्रायां विंशतियोजनागतस्य विंशतिकृच्छ्रसमम्। मलापहारिण्यामष्टकृच्छ्रसममष्टयोजनागतस्य। निवृत्तायां षट्कृच्छ्रसमं षड्योजनागतस्य। गोदावर्यां यात्रायोजनवृद्धौ योजने पादकृच्छ्रः। सिंहस्थे गुरौ सर्वत्र जाह्नवीसमम्।

कन्यास्थे गुरौ कृष्णवेण्यां सर्वत्र जाह्नव्यर्द्धम् । तुङ्गभद्रायां तुलास्थे गुरौ[1] रवौ वा जाह्नव्यर्द्धम्, कर्कटे, रवौ च । कृष्णवेणायां मलापहारिणीसङ्गमे प्रयागे त्रिंशद्योजनागतस्य त्रिंशत्कृच्छ्रसमम् । भागीरथीसङ्गमे प्रयागे द्विगुणम् । तुङ्गभद्रासङ्गमे त्रिगुणम् । निवृत्तिसङ्गमे चतुर्गुणम् । ब्रह्मेश्वरे पञ्चगुणम् । पातालगङ्गायां मल्लिकार्जुने षड्गुणम् । ततः पूर्वे षष्टिकृच्छ्रसमम् । लिंगालये द्विगुणम् । समुद्रसङ्गमे चैवम् । कावेर्यां प्रतीचीमहानद्यां पञ्चदशकृच्छ्रसमं पञ्चदशयोजनगतस्य । ताम्रपर्णीकृतमालापयस्विनीषु द्वादशयोजने द्वादशकृच्छ्रसमम् ।

सह्यपादोद्भूता वेदाद्रिपादोद्भूताश्च नद्यः स्वदैर्ध्यानुसारेण एकद्वित्रिकृच्छ्रफलदाः । विंध्यशैलोद्भवा द्विगुणाः । हिमोद्भूतास्त्रिगुणाः ।

स्मृतौ पुराणे च यथाकथंचिदनुक्तौ कुल्याः त्रिरात्रफलदाः । अल्पनद्यः कृच्छ्रशः । नद्यो द्विकृच्छ्रशः । महानद्यस्त्रिकृच्छ्रशः । सर्वत्र यात्रानुक्तौ कृच्छ्रसंख्या योजनसंख्यया स्यात् ।

एकयोजनगादिषड्योजनगान्ताः स्रवंत्यः कुल्याः । ततो द्वादशयोजनगान्ता अल्पनद्यः । चतुर्विंशतियोजनगान्ता नद्यः । चतुर्विंशतियोजनाधिकगाः समुद्रगाश्च महानद्यः । यत्र महानदीसमाख्याऽस्ति ताश्च महानद्यः । उपवाससहितं नदीस्नानं कृच्छ्रसमं योजनादर्वागपि ।

शुनीगर्दभीचांडालीशूद्रीकष्टगादिनद्यः पापनद्यश्च वर्ज्याः ।

सर्वत्र समुद्रस्नानं दर्शे कार्यम् । देवतासमीपे सरःसरिन्नदीसंगमेषु सर्वदा कार्यम् । समुद्रस्नानं पञ्चदशयोजनगतस्य पञ्चदशकृच्छ्रसमम् । प्रख्यातदेवतासमीपे द्विगुणम्। तत्र स्नात्वा तद्देवतादर्शने त्रिगुणम् । सेतोर्गमनं त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनगतस्य । स्नात्वा रामेश्वरदर्शने षष्टिकृच्छ्रसमम् । विंध्यदेशीयानां सेतुरामेश्वरे जाह्नव्यां च त्रिगुणं फलम् । जाह्नवीकेदारयोश्च तथैव । दक्षिणदेशीयानां जाह्नव्यां षड्गुणम् । गङ्गादेशीयानां सेतुरामेश्वरे षड्गुणम् । स्कन्ददर्शने त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनगतस्य । यत्र गङ्गासंज्ञाऽस्ति तत्र चैवम् । श्रीरंगपद्मनाभपुरुषोत्तमचक्रकोटंमहालक्ष्मीदर्शने लवणार्णवस्नाने त्रिंशद्योजनगतस्य

---

१ गुरौ इति पाठ उत्तरेण सम्बन्धश्च । —स्मृ. सा.

२ चित्रकूट— पा.

त्रिंशत्कृच्छ्रसमम्। केदारे त्रिगुणम्। सर्ववैष्णवमाहेश्वरसौरशाक्तादि-पीठदर्शने पञ्चदशकृच्छ्रसमम्। प्रख्याते द्विगुणम्। अहोबलेऽपि तथैव। श्रीशैलप्रदक्षिणं षष्टिकृच्छ्रसमम्। श्रीशैले एकैकशृङ्गदर्शनं द्वादशकृच्छ्र-समम्। अन्येषु प्रख्याततीर्थदेवदर्शनेषु षट्कृच्छ्रफलम्। सिद्धक्षेत्रेऽन्य-क्षेत्रे स्वयंभूदर्शनं त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनागतस्य। सर्वत्र कृच्छ्र-सङ्ख्या योजनसङ्ख्यया ज्ञेया। इति तीर्थप्रत्याम्नायाः॥

अथ पातित्यहेतवः।

गौतमः-(३।३।१-२) 'ब्रह्महसुरापगुरुतल्पगमातृपितृयोनि-सम्बद्धागस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्यागयपतितत्यागिनः पतिताः। पातकसंयोजकाश्च।'

-मातापितृयोनिसम्बद्धागो मातृष्वसृपितृष्वस्रात्मभगिनीगामी। स्तेनः सुवर्णतत्समयोः। नास्तिको वेदाप्रामाण्यवादी। अपतितत्यागी गुरुमभिशप्य तत्त्यक्ता। पातकसंयोजकाः स्वसंसर्गेण दोषहेतव इति प्राच्यः। अपरार्के तु पातकसंयोजकाः प्रयोजकादयस्तेऽपि पतिता इति। एवं कल्पतरावपि।

यमः-'मातृष्वसा मातृसखी दुहिता च पितृष्वसा।
मातुलानी स्वसा श्वश्रूर्गत्वा सद्यः पतेन्नरः॥' इति।

मनुः-(१०।९२)
'सद्यः पतति मांसेन लाक्षया लवणेन च।'

स एव-(५।१९)
'छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेन्नरः॥'

यमः-(२२-२३ बृ. य. १।३-४)
'जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः।
विषप्रतपनप्रायशस्त्रघातहताश्च ये॥
नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः॥' इति।

१ सर्वत्र भाषाभेदपर्वतादिना यात्राह्रासो भवत्येव।- स्मृ. सा.। योजन-प्रमाणं तत्रैव— 'तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः। प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला॥ वितस्तिर्द्विगुणा रत्निस्ततः किष्कुस्ततो धनुः। धनुःसहस्रे द्वे क्रोशश्चतुष्क्रोश तु योजनम्॥' इति।

उपनयनमुख्यगौणकालातिक्रमेण व्रात्यानां पातित्यमाह याज्ञवल्क्यः—

'अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥' (१।३८)

आश्वलायनोऽपि (गृ. सू. १।१९।६–७)

'अत ऊर्ध्वं पतितसावित्रीका भवंति । नैतानुपनयनेन्नाध्यापयेन्न याजयेन्नैभिर्यवहरेयुः ।' इति

अत्रिः—आरूढपतितं विप्रं मण्डलाच्च विनिस्सृतम् ।
उद्बुद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् ॥'

—आरूढो गृहस्थव्यतिरिक्त आश्रमी ब्रह्मचर्यस्खलनाद्विजातिकर्मानधिकारी । मण्डलात्स्वसजातीयेभ्यो विनिस्सृतो बहिर्भूतः । उद्बुद्ध उद्बन्धनात् च्युत आत्महन्ता । कृमिदष्टः श्वादिदंशक्षते उत्पन्नकृमिः ॥

मनुः—(११।१७९)

'चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥'

गौतमः— (३।२।८–९) 'न स्त्रीष्वगुरुतल्पं पतन्तीत्येके । भ्रूणहनने हीनवर्णसेवायां च स्त्री पतति' इति ।

मातृपितृयोनिसम्बद्धागः पततीत्यस्यापवादः; तासु गुर्वङ्गनाव्यतिरिक्तासु गच्छन्नपि न पततीत्येके मन्यंते । किंतु प्रायश्चित्तीयते । गौतमस्तु पततीति मन्यते । 'सोऽयं बुद्धयबुद्धिपूर्वापेक्षोऽभ्यासाभ्यासापेक्षो वा व्यवस्थितो विकल्पः' इति भर्तृयज्ञः । भ्रूणहनने गर्भवधे । हीनसेवायां स्वापेक्षया हीनवर्णपुरुषगमने प्रतिलोमगमने च ।

याज्ञवल्क्यः—(३।२९८)

'नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् ।
विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम् ॥'

—अपिशब्दाद्ब्रह्महत्यादीन्युपपातकान्यप्यभ्यस्तानि । नीचो हीनवर्णः शूद्रः । तद्गमनं च गर्भोत्पत्त्यन्तम् ।

'ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण सङ्गताः ।
अप्रजाता विशुद्ध्यंति प्रायश्चित्तेन नेतराः ॥' (२१।१४)

इति वासिष्ठात् ।

अत एव—

'व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते।
गर्भभर्तृवधादौ च तथा महति पातके॥' (१।७१)

इति याज्ञवल्क्यवाक्ये 'शूद्रकृते गर्भे' इति प्राचां व्याख्यानम्।

यत्तु शौनकः—'पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव। ब्राह्मणी हीनवर्णसेवायामधिकं पतति' इति। तत्र हीनवर्णसेवा गर्भान्तं शूद्रगमनं प्रतिलोमगमनमात्रं च।

वसिष्ठः—(२८।७)

'त्रीणि स्त्रियाः पातकानि लोके धर्मविदो विदुः।
भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भस्य पातनम्॥'

भ्रूणहत्योक्तिर्दृष्टान्तार्था।

अत एव वासिष्ठे—(२१।१२)

'चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या॥'

इति शिष्यगमनादीनामपि पातित्यहेतुपतिवधसाहचर्यात्पातित्यहेतुत्वम्। जुङ्गितः प्रतिलोमजः। त्यागश्च वस्त्रान्नगृहवासादिजीवनहेतुविच्छेदेन। नीचाभिगमनादावपीदृगेव त्यागः।

प्रायश्चित्तं चिकीर्षन्तीनां त्वत्यागमाह याज्ञवल्क्यः—(३।२९६)

'पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः।
वासो गृहान्तिके देयमन्नं वासः सरक्षणम्॥'

मनुः—

'पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्।
पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते॥' इति। (परा.१०।२५)

द्विजातिभार्यायाः शूद्रायाः सुरापाननिषेधार्थमिदमिति विज्ञानेश्वरः (३।२५६)। माधवस्तु—ब्राह्मण्यादीनामप्ययं निषेधः। स्त्रिया भर्तुरसंसर्गेऽपि दोषार्थमुत्तरार्द्धम्। सहाधिकारात् स्त्रिया अर्द्धशरीरत्वम्। पतितमर्धशरीरं यस्येति बहुव्रीहिरित्यूचे। तन्न; ब्राह्मण्यादीन्प्रति प्रतिषेधे वचोवैयर्थ्यापत्तेः, बहुव्रीहौ लक्षणापत्तेश्च। अतो विज्ञानेश्वर एव सम्यगूचे।

१— त्रिवारं मैथुनं सान्तं गर्भोत्पत्तिवदुच्यते। (वि. र. ३५।५१)

अथ साधारणप्रायश्चित्तानि ।

संवर्तः– (२०४)

'हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥'

गौतमः–(३ । १ । १७–२०)

'संवत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाह षडहस्त्र्यहोऽहोरात्र इति कालाः । एतान्यनादेशे विकल्पेन क्रियेरन् । एनसि गुरुणि गुरूणि लघुनि लघूनि । कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति प्रायश्चित्तम् ।' इति ॥

विष्णुधर्मोत्तरे– (तृ. खं. ३४१ । ३१)

'सायंप्रातस्तथा कृत्वा वासुदेवस्य कीर्त्तनम् ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥'

प्रभासखंडे श्रीभगवद्वाक्यम्–

'नाम्नां मुख्यतरं नाम कृष्णाख्येयं परन्तप ।
प्रायश्चित्तमशेषाणां पापानां मोचकं परम् ॥'

वाराहे–

'वासुदेवस्य सङ्कीर्त्य सुरापो व्याधितोऽपि वा ।
मुक्तो जायेत नियतं महाविष्णुः प्रसीदति ॥
गोविन्देति तथा प्रोक्ते भक्त्या वा भक्तिवर्जितैः ।
दहते सर्वपापानि युगान्तेऽग्निरिवोत्थितः ॥'

विश्वामित्रः–

'कृच्छ्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणम् ।
प्रकाशे च रहस्येव अनुक्ते संशये स्फुटे ॥
प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराककः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोऽतिकृच्छ्रकः ॥
महासान्तपनः शुद्ध्यै तप्तकृच्छ्रस्तु पावनः ।
त्रयोपवासकृच्छ्रस्तु ब्रह्मकूर्चस्तु शोधकः ॥

एते व्यस्ताः समस्ता वा प्रत्येकं द्वयेकशोऽपि वा ।
पातकादिषु सर्वेषु उपवासेषु यत्नतः ॥
कार्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ।
उपवासस्त्रिरात्रं वा मासः पक्षस्तदर्द्धकम् ॥
षडहो द्वादशाहादि कार्यं शुद्धिफलार्थिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे वाऽप्रकाशे वा अभिसन्धाद्यपेक्षया ।
जातिशक्तिगुणान्दृष्ट्वा सकृद्द्विकृतं तथा ॥
अनुबन्धादिकं दृष्ट्वा सर्वं कार्य्यं यथाक्रमम् ।
प्रकाश उक्तं यत्किञ्चिद्विंशद्भागो रहस्यके ।
त्रिंशद्भागः षष्टिभागः कल्प्यो जात्याद्यपेक्षया ॥'

याज्ञवल्क्यः– (३ । ३२६)

'अनादिष्टेषु पापेषु शुद्धिश्चांद्रायणेन च ।
धर्मार्थं च चरेदेतद्व्रस्यैति सलोकताम् ॥'

षट्त्रिंशन्मते त्रयाणां समुच्चयः प्रतिपादितः–

'यानि कानि च पापानि गुरोर्गुरुतराणि च ।
कृच्छ्रातिकृच्छ्रचान्द्रैस्तु शोध्यन्ते मनुरब्रवीत् ॥'

केवलप्राजापत्यस्य तु नैरपेक्ष्यं चतुर्विंशतिमतेऽभिहितम्–

'लघुदोषे त्वनादिष्टे प्राजापत्यं समाचरेत् ।' इति ।

द्वयोः समुच्चयमाहोशनाः-

'दुरितानां दुरिष्टानां पापानां महतामपि ।
कृच्छ्रं चान्द्रायणं चैव सर्वपापप्रणाशनम् ॥' इति ।

—दुरितमुपपातकम् । दुरिष्टं पातकम् ।

मनुना तु पराकस्य नैरपेक्ष्यमुक्तम्– (११।२१५)

१ ग्रन्थोऽयमेकस्मिन्नेवादर्शे दृष्टः ।

'पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः।' इति।

गौतमोऽपि- (३ । ८ । २१-२३)

'प्रथमं चरित्वा शुचिः पूतः कर्मण्यो भवति। द्वितीयं चरित्वा यद् न्यन्महापातकेभ्यः पापं कुरुते तस्मात्पापात्प्रमुच्यते। तृतीयं चरित्वा सर्वस्मादेनसो मुच्यते।'

इति प्रथमादिपदैः कृच्छ्रेऽतिकृच्छ्रः कृच्छ्रातिकृच्छ्रश्चोच्यते।

हारीतः-

'चांद्रायणं पराकं च तुलापुरुष एव च।
गवां चैवानुगमनं सर्वपापप्रणाशनम्।' इति।

तथा—

'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च श्वपाकमपि शोधयेत्।' इति।

एतेषां सर्वेषां व्यवस्थोक्ता विष्णुपुराणे-(२।६।३६)

'पापे गुरुणि गुरूणि स्वल्पान्यल्पे च तद्विदः।
प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः॥'

भविष्यत्पुराणेऽपि—

'एवं विषयभेदेन व्यवस्थाप्यानि पुत्रक।
प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च॥
अन्यथा हि महाबाहो लघूनामुपदेशतः।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्।' इति॥

गौतमेनाप्युक्तं- (३ । १ । १९)

'एनसि गुरुणि गुरूणि लघुनि लघूनि।' इति।

एवमन्यान्यपि द्रष्टव्यानि। इति साधारणप्रायश्चितानि।

अथ महापापसाधारणप्रायश्चित्तानि।

शङ्खः- (१७ । १-३)

'नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने।
अधःशायी जटाधारी पर्णमूलफलाशनः॥

ग्रामं विशेद्वा भिक्षार्थी स्वकर्म परिकीर्त्तयेत् ।
एककालं समश्नानो वर्षं द्वादशमे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुद्ध्यन्ति महापातकिनस्त्विमे ॥'

शिववाक्यम्–(प. पु. सृ. खं. ३८।१४९)

'आराध्यमानं मां राम ! पश्येयुरिह सागरे ।
महापातकयुक्ता ये तेषां पापं विनश्यति ॥'

विष्णुः–(३५-६)

'अश्वमेधेन शुद्ध्येयुर्महापातकिनस्त्विमे ।
पृथिव्याः सर्वतीर्थानां तथाऽनुसरणेन वा ॥'

महापापानुवृत्तौ च्यवनः–'एतेषां प्रायश्चित्तं भवति पृथिवीप्रदक्षिणावर्त्तेत ।' स एव 'उभयशिरसं वा प्रदाय ब्राह्मणेभ्यः' इति।

–उभयशिरसमुभयतोमुखीम् ।

आपस्तंबः–(१।९।२५।१०।–११)

'अथाप्युदाहरन्ति ।

'स्तेयं कृत्वा सुरां पीत्वा गुरुदारान्गत्वा ब्रह्महत्यां च कृत्वा ।
चतुर्थकालमितभोजिनः स्युरपोभ्युपेयुः सवनानुकल्पम् ।
स्थानासनाभ्यां विरहन्त एते त्रिभिर्वर्षैरपपापं नुदन्ति ।'

महापापानुवृत्तौ कश्यपविश्वामित्रौ–(क. ८।६)

'वत्सरत्रितयं कुर्यान्नरः कृच्छ्रं विशुद्धये ।
आत्मतुल्यं सुवर्णं च दद्याद्वा विप्रतुष्टिकृत् ॥
हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥' इति।

इति सर्वपातकसाधारणप्रायश्चित्तानि ॥

---

१ द्वादशम इत्यार्षम्, 'धान्वन्तरं द्वादशमं त्रयोदशममेव च ॥(भाग १।३।१७) इतिवत्। २ आगत्य मानवा राजन्' इति मूले पाठः। कौर्मेऽपि—(पू.२१।४९,५०) यत्त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीदं द्विजातयः। महापातकसंयुक्तास्तेषां पापं विनङ्क्ष्यति ॥ अन्यानि चैव पापानि स्नातस्यात्र महोदधौ। दर्शनादेव लिङ्गस्य नाशं यान्ति न संशयः ॥' ३ ब्रह्महत्यामकृत्वा' इति पठित्वा 'ब्रह्महत्याव्यतिरिक्तानि स्तेयादीनि कृत्वा' इति व्याख्यातं हरदत्तेन ।

अथ पापभेदाः ।

विष्णुः–(३३।३–५)

'अतिपातकमहापातकानुपपातकोपपातकेषु प्रवर्तते । जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु च । मलावहेषु प्रकीर्णकेषु च ।'

तत्र महापापान्याह मनुः–(११।५४)

'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संयोगं चैव तैः सह ॥'

–ब्रह्महत्या साक्षाद्विप्रमारणम् ।

अकामकृते तस्मिन् प्रायश्चित्तमाह याज्ञवल्क्यः–(३।२४३)

'शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥'

–शिरःकपाली स्वहतविप्रशिरोस्थिधृक् । ध्वज आरोपितशवशिरा दण्डः ।

यत्तु मध्यमाङ्गिराः–(२।३६)

'गवां सहस्रं विधिवत्पात्रेभ्यः प्रतिपादयेत् ।
ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव च ॥' इति ।

तत्– 'द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत् ॥'(याज्ञ. ३।२९२) इत्येतद्वाक्यविहितद्विगुणव्रतवरणाशक्तविषयम् ।

यच्च शंखः– 'प्रमाप्य द्वादश संवत्सरान् षट् त्रीन् सार्द्धं संवत्सरं व्रतान्यादिशेत्तेषामंते गोसहस्रं तदर्धं तस्यार्द्धमर्द्धं च दद्यात्सर्वेषां वर्णानामानुपूर्व्येण' इति; तन्मातापितृभ्रातृगुर्वादिविषयम् । आनुपूर्व्येणेति तु द्वादशाब्दषडब्दत्र्यब्दसार्धाब्दानां गोसहस्रतदर्धतदर्धानां सर्वेषां वर्णानां शक्ताशक्तं बोधयति, न तु द्वादशाब्दादिव्रतचतुष्टयं गोसहस्रचतुष्टयसहितं ब्राह्मणादिवर्णचतुष्टयस्य ।'

'पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता ।
वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतम् ॥' इत्यङ्गिरसा (३।१६)

---

३ तदलाभे त्वन्यस्य । –

'शूद्रो वा ब्राह्मणं हत्वा प्रायश्चित्तचतुष्टयम्।'

इति भविष्यवचनेन च ब्राह्मणापेक्षयेतरवर्णानामधिकप्रायश्चित्तविधानात्। इदं च व्रतं यावज्जीवव्रताचरणाशक्तस्य।

शक्तस्य तु भविष्यपुराणे—

'मातरं पितरं हत्वा सोदरं भ्रातरं तथा।
गुरुं हत्वा श्रोत्रियं च आहिताग्निमथापि वा।
यावज्जीवं व्रतं चीर्त्वा प्रतिहन्ता विशुद्ध्यति।' इति।

एवं च यदापस्तम्बेनोक्तम्-(ध.सू.१।२४।११)

'विप्रहाऽरण्ये कुटीं कृत्वा वाग्यतः शवशिरोध्वजः। शाणीयतन्त्र्यामात्मन्युपरि जान्वाऽऽच्छादयेत्' इत्युपक्रम्य 'एतदेव व्रतमोत्तमादुच्छ्वासाच्चरेत्। (२४) नास्मिंल्लोके प्रत्यापत्तिर्विद्यते' (२५) इति; तन्मातापितृगुर्वादिवधविषयम्।

मनुः- (११।७४–७७)

'यजेत वाऽश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताऽग्निष्टुताऽपि वा॥
जपन्वाऽन्यतमं वेदं योजनानां शतं व्रजेत्।
ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः॥

सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वा सपरिच्छदम्॥
हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतः सरस्वतीम्।
जपेद्वा नियताहारस्त्रिः कृत्वो वेदसंहिताम्॥' इति।

'सर्वस्वं वा, धनं वा, गृहं वेति प्रायश्चित्तत्रयम्।'

इति विज्ञानेश्वरः (३।२५९)। 'उत्तरार्धं पूर्वार्द्धस्यैव शेषः, न स्वतन्त्रप्रायश्चित्तद्वयविधानार्थमिति मेधातिथिः। युक्तं चैतत्, कियत्सर्वस्वमित्याकांक्षापूरणात्। अन्यथा पणादिसर्वस्वदानेऽपि शुद्धिः स्यात्।

काश्यपः-(८।६)

'आत्मतुल्यं सुवर्णं च दद्याद्वा विप्रतुष्टिकृत्।' इति।

एतेषां च प्रायश्चित्तानां व्यवस्थोक्ता भविष्ये—

'जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकम् ।
वेदविच्चाग्निहोत्री च तदा तस्य भवेदिदम् ॥
'जपन्वाऽन्यतमं वेदं योजनानां शतं व्रजेत् ।' इति ।
तत्रैव–
'जातिमात्रं यदा हन्याद्ब्राह्मणं ब्राह्मणो गुरुः ।
वेदाभ्यासविहीनो वै धनवानग्निवर्जितः ॥
प्रायश्चित्तं तदा कुर्यादिति पापविशुद्धये ।
धनं वा जीवनायालं गृहं वा स्वपरिच्छदम् ॥' इति ।

एतस्मिन्नेव विषये पराशर आह–(१२।६५-७४)

'चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥
सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाहरेत् ।
वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः ॥
अहं दुष्कृतकर्मा वै महापातककारकः ।
गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः ।
गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु च ॥
तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च ।
एतेषु ख्यापयेदेनः पुण्यं गत्वा च सागरम् ॥
ब्रह्महा विप्रमुच्येत स्नात्वा तस्मिन्महोदधौ ॥
ततः पूतो गृहं प्राप्य कृत्वा ब्राह्मणभोजनम् ।
दत्त्वा वस्त्रं पवित्राणि पूतात्मा प्रविशेद्गृहम् ॥
गवां वाऽपि शतं दत्त्वा चातुर्विद्याय दक्षिणाम् ।
एवं शुद्धिमवाप्नोति चातुर्विद्यानुमोदितः ॥'

अत्र विशेष उक्तो भविष्ये–

'विंध्यादुत्तरतो यस्य निवासः परिकीर्त्तितः ।
पराशरमतं तस्य सेतुबंधनदर्शनम् ॥' (परा.१२।७५) इति ।

तत्रैव–

'तिरस्कृतो यदा विप्रो ह्रियमाणो मृतो यदि ।

---

१ इमानि पराशरवचनानि मिताक्षरात उद्धृतानि । मूलस्मृतौ तु भूयान् पाठभेदो दृश्यते ।

निर्गुणः सहसा क्रोधाद्दृहक्षेत्रादिकारणात् ॥
त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीम् ।
गच्छेद्वापि विशुद्ध्यर्थं तत्पापस्येति निश्चितम् ॥ '

तत्रैव–

' अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि ।
क्रोधाद्वै म्रियते यस्तु निर्निमित्तं तु भर्त्सितः ॥
वत्सरत्रितयं कुर्य्यान्नरः कृच्छ्रं विशुद्धये । ' इति ।

एतस्मिन्नेव विषये निमित्तिनो निर्गुणत्वे तत्रैव–

' केशश्मश्रुनखादीनां कृत्वा तु वपनं वने ।
ब्रह्मचर्यं चरन् विप्रो वर्षेणैकेन शुद्ध्यति ॥ ' इति ।

षट्त्रिंशन्मते -

' षंण्ढं वा ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् ।
चान्द्रायणं वा कुर्वीत पराकद्वयमेव वा ॥ ' इति ।

पतितविप्रवधे व्यासः–

'ब्रह्महाऽब्दत्रयं विप्र ! गायत्रीमभ्यसेत्सदा ।
प्राणायामशतं कुर्यात्प्रत्यहं नियतः शुचिः ॥
भिक्षाशी निर्जनेन्नित्यमरण्ये संयतेन्द्रियः ।
षोडश ब्राह्मणान्विप्रो भोजयित्वा समाहितः ॥
प्रयच्छेद्वस्त्रयुग्मानि हिरण्यं वाऽपि शक्तितः । ' इति ।

एतानि च प्रायश्चित्तान्यनुपेतब्राह्मणवधेऽपि ज्ञेयानि । ब्राह्मण्याविशेषात् । तत्तु षडब्दं निर्गुणविप्रवधे षडब्दस्य वक्ष्यमाणत्वात् । एतस्याप्युपनयनाभावेन निर्गुणत्वात् ।

कामतो विप्रवधे मनुः- ( )

' प्राणान्तिकं तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ।
तच्च कामकृते प्राप्य विज्ञेयं नात्र संशयः ॥ '

---

१ मध्यमाङ्गिरा इति मा.

कालिकापुराणे–

'इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे जीवतो नास्ति निष्कृतिः ॥'

कामानुवृत्तावङ्गिराः–

'शरीरं न दहेद्यावद्ब्रह्महा पापकृत्तमः ।
तावत्तस्य न शुद्धिः स्याद्भगवान् मनुरब्रवीत् ॥'

मरणेऽशक्तस्यापवाद उक्तस्तेनैव–

'स्यात्त्वकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके ।' इति ।

मध्यमाङ्गिराः–

'विहितं यदकामानां कामात्तद्द्विगुणं भवेत् ।' इति ।

कचित्तदपवादो भविष्ये–

'ब्राह्मणं जातिमात्रं तु कामतो विनिपात्य वै ।
चरेद्वादशवर्षाणि गुणी निर्गुणमेव हि ॥' इति ।

तत्रैव–

'हत्वा तु प्रहरंतं वै ब्राह्मणं वेदपारगम् ।
कामतोऽपि चरेद्वीर ! द्वादशाब्दाख्यमुत्तमम्' ॥

अकामतस्त्वर्द्धम् ।

क्षत्रियादीनां विशेषो भविष्ये–

'हत्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः ।
प्रायश्चित्तं चरेद्वीर ! विधिवत्कायशुद्धये ॥
लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयाऽऽत्मनः ।
प्रास्येद्दात्यालमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥'
(म. स्मृ. ११।७३) इति ।

अतिपातकेषु विशेषमाह कात्यायनः– (३।४।४–५)

'महापातककलंयुक्तो दैवात्स्यादग्निमान्यदि ।
पुत्रादिः पालयेदग्नीन्युक्त आ दोषसंक्षयात् ॥

---

१ 'निष्कृतिर्न विधीयते' (११।८९) इति चतुर्थपादे पाठभेदेन मानवीये दृश्यत इदम् ।

२ 'नेदं मरणान्तिकम्' त्रिरिति नियमात् । उत्थायोत्थाय हि त्रिः पतन् यदि दैवाज्जीवति, तथाप्यसौ शुद्ध एव । ह० द०

प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि ।
गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदम् ॥ ' इति ।

पालनविधानात्पुत्रोऽग्निहोत्रहोममपि कुर्यात् ।

उशनाः—

' आहिताग्निस्तु यो विप्रो महापातकवान्भवेत् ।
प्रायश्चित्तैर्न शुद्धयेत तदग्नीनां तु का गतिः ॥
वैतानं प्रक्षिपेत्तोये शालाग्निं शमयेद्बुधः । '

पतितेनापि प्रायश्चित्तांगत्वेन संध्यावदनं कार्यम् ।

' संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यत्किंचित्कुरुते कर्म न तस्य फलभाग्भवेत् ॥ '

इति (२।२७) दक्षोक्तेः ।

आरब्धप्रायश्चित्तमहापातकिनमुपक्रम्य

' सम्यक्संध्यामुपासीत त्रिकालं स्नानमाचरेत् ॥ '

इति स्मृतेश्च ।

ब्रह्मवधव्रतमन्यत्राप्यतिदिशति याज्ञवल्क्यः— (३ । २५१)

' यागस्थक्षत्रविट्घाती चरेद्ब्रह्महणि व्रतम् ।
गर्भहा च यथावर्णं तथात्रेयीनिषूदकः ॥ ' इति ।

व्रतपदात्तदेवातिदिश्यते,न मरणम् । गर्भश्च विन्नायां संभूतः । आरब्धे तु ब्राह्मण्यालाभात्स तद्वध इदं प्रायश्चित्तम्, किन्तु गोलकादिवधनिमित्तमिति निबंधकृतः । यद्यप्याचार्यमते कुंडगोलकादिषु ब्राह्मण्यमस्त्येव तथापि कुण्डगोलकादिवधप्रायश्चित्तमेव । अन्यथा तद्विधिर्व्यर्थः स्यात् ; एतच्च गर्भः स्त्रीपुन्नपुंसकविशेषत्वेनाज्ञातश्चेत् । स्त्रीत्वेन ज्ञाते उपपातकप्रायश्चित्तम् । ब्राह्मण्यादिस्त्रीमात्रवधस्योपपातकत्वमिति विज्ञानेश्वरादयः (३। २५१) । नपुंसकत्वेन ज्ञाते षंढवधप्रायश्चित्तं पूर्वमुक्तम् ।

आत्रेयीमाह वसिष्ठः—(२० । ४२–४३

' रजस्वलामृतुस्नातामात्रेयीमाहुः । अत्र ह्येष्यदपत्यं भवति । ' इति ।

रजस्वला त्रिदिनम् , तदूर्ध्वं त्रयोदशेति षोडश । अत्र ह्येष्यदिति हेतुना वंध्याव्युदासः ।

यमस्तु-

'जन्मप्रभृतिसंस्कारैः संस्कृता मंत्रवच्च या ।
गर्भिणी त्वथ वा या स्यात्तामात्रेयीं विदुर्बुधाः ॥ ' इति ।

विष्णुः-(५०।५-८) 'एतन्महाव्रतं ब्राह्मणं हत्वा द्वादशवत्सरं कुर्यात् । यागस्थं क्षत्रियं वैश्यं गर्भिणीं रजस्वलां वा अत्रिगोत्रां वा ॥ ' इति ।

यंत्रवगिराः-

'आहिताग्नेर्द्विजातेस्तु हत्वा पत्नीमनिंदिताम् ।
ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव च ॥ ' इति ।

तद्यागस्थपत्नीपरम् ।

'सवनस्थां स्त्रियं हत्वा चरेद्ब्रह्महणि व्रतम् ।'
(१२।७४)

इति पराशरोक्तेः ।

ब्रह्मवधव्रतं प्रक्रम्य मनुः-(११।८८)

'उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा ।
अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधम् ॥ ' इति ।

विप्रवधफलिकैव साक्ष्यनृतोक्तिः । स्त्री सवनस्था ।

'यथावर्णम्' इत्यनुवृत्तौ याज्ञवल्क्यः-(३।२५२)

'चरेद्व्रतमहत्वापि घातार्थं चेत्समाहितः ।'

—अत्रातिदेशिकत्वात्पादोनमिति मदनादयः ।

अथ सवनस्थक्षत्रियादिवधे मनुः-(११।१२७-१२८)

'अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ।
ऋषभैकसहस्रा गा दद्याच्छुध्यर्थमात्मनः ॥ '

'व्यहं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।'

गोसहस्रं सवनस्थवधेऽतिधनाढ्यस्य तपस्यशक्तस्येति मेधातिथिः ।

'वैश्यहाऽहं चरेदेतद्दद्याद्वैकशतं गवाम् ।
षण्मासान् शूद्रहाऽप्येतद्धेनूर्दद्याद्दशाथ वा ॥ ' इति ।

कामतस्तु हारीतः-

'ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत् ।

वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः ॥
शूद्रं हत्वा चरेद्वर्षं ऋषभैकादशाश्च गाः ॥ ' इति ।

श्रोत्रियवधे तु स एव—

' तुरीयोनं क्षत्रियस्य वधे ब्रह्महणि व्रतम् ।
अर्द्धं वैश्यवधे कुर्यात्तुरीयं वृषलस्य तु ॥ '

यमः— (५।५)

' कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथाचरेत् ।
दशसंख्याश्च गा दद्यादंगच्छेदो यदा भवेत् ॥ '

—अंगच्छेदं एतेषां समुच्चय इति शूलपाणिः ।

योगीश्वरः— (३।२९२)

' विप्रदंडोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने ।
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यंतरशोणिते ॥ '

—दंडः शस्त्रस्याप्युपलक्षकः ।

बृहस्पतिः— (१।४३)

' काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् ।
अस्थिभेदेऽतिकृच्छ्रं तु पराकं वांऽगकर्तने ॥ '

याज्ञवल्क्यः (३। २९१)

' गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः ।
बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् ॥ '

सुमंतुः — ' देवर्षिगोब्राह्मणाचार्यमातापितृनरेंद्राणां प्रतिषेधने आक्रोशने जिह्वां दहेत्सहिरण्यं दद्यात् ' इति । – एतदभ्यासविषयम् ।

यमः—

' आबध्य ब्राह्मणं कण्ठे प्रायश्चित्तं विधीयते ।
त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ॥ '

मिथ्याभिशंसने याज्ञवल्क्यः— (३।२८५)

' मिथ्याभिशंसने दोषो द्विःसमो भूतवादिनः ।
मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन् ॥ '

प्रायश्चित्तमाह वसिष्ठः— (२३।३३)

' ब्राह्मणमनृतेनाभिशप्य पतनीयेनापतनीयेन वा मासमब्भक्षः शुद्धवतीरावर्त्तयेत् ।' शुद्धवतीः ' एतोन्विन्द्रम् '(ऋक्सं.६।६।३१)इत्याद्याः ।

याज्ञवल्क्यः—(३।२८५)

'महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् ।
अब्भक्षो मासमासीत स जापी नियतेंद्रियः ॥ '

इदमुपपापाभिशापे आवृत्ते, सकृच्च महापापाभिशंसने । गुरुविषये कामतः तदावृत्तौ तु शंखलिखितौ – 'नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी चेत्येते षड्ब्राह्मणे ब्राह्मणगृहेषु भैक्षं चरेयुः । संवत्सरं भौतभैक्ष्यमश्नीयुः षण्मासान्वा गा अनुगच्छेयुः' इति। एतत्सजातीयेन सजातीयेऽभिशस्ते ।

विजातीये तु—

'प्रातिलोम्यापवादे तु द्विगुणस्त्रिगुणो दमः ।
वर्णानामानुलोम्ये तु तस्मादर्द्धार्द्धहानितः ॥ ' (२।२०७)

इति याज्ञवल्क्योक्तं दण्डानुरूपं बोध्यम् ।

अथ प्रसंगान्मिथ्याभिशस्तस्य याज्ञवल्क्यः–(३।२८६)

'अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा ।
निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव च ॥ '

एतदुपपातकविषयम् । अतिपातके तु 'एतेनाभिशस्तो व्याख्यातः' इति वासिष्ठं (२३।३१) मासमब्भक्षणम् । पापे महापापे च पैठीनसिः— 'अनृतेनाभिशस्यमानः कृच्छ्रं मासं चरेत् पातकेषु । महापातकेषु द्विमासं कृच्छ्रम् ' इति ।

जातिमात्रक्षत्रियादिवधे तु मनुः– (११।१२६)

'तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः ।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश ॥ ' इति ।
क्षत्रियस्य वधं कृत्वा चरेच्चान्द्रायणत्रयम् ।
वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैन्दवमेव तु ॥ '

अस्मिन्नेव विषये मनूक्तानि त्रैमासिकद्वैमासिकमासिकान्युपपातकसामान्यप्रायश्चित्तानि ज्ञेयानि । अकामतस्तु याज्ञवल्क्योयं त्रिगात्रो-

---

१ वृत्तशब्देन चात्र गुणादिकमुच्यते । 'गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते'॥ इति मनुस्मरणात् ।–मिताक्षरा।

पवाससहितमृषभैकादशगोदानम्, मासं पंचगव्याशनम्, कृच्छ्रातिकृच्छ्रौ चेति क्रमात् ज्ञेयम्। न चैषां सामान्यविहितत्वाद्विशेषविहितैः प्रायश्चित्तैर्बाधः। 'स्त्रीशूद्रविट्क्षत्रवध' इति क्षत्रियादिवधस्योपपातकत्वोक्तेरानर्थक्यापातात्। एवं सर्वेष्वप्युपपातकेषु सामान्यविशेषविहितानां व्यवस्था ज्ञेया।

पराशरः— (६।१८)

'वैश्यं शूद्रक्रियासक्तं विकर्मस्थं द्विजोत्तमम्।
हत्वा चांद्रायणं तस्य त्रिंशद्गाश्चैव दक्षिणा॥' इति।

—द्विजोत्तमः पतितो विप्रः क्षत्रियश्चेति माधवः।

अथ धनहर्तृप्रेतक्रियाया अकरणे शंखः— (१७।६१)

'प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः।
वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेत्॥'

अज्ञानाद्वृत्तक्षत्रियादिवधे तु संवर्त्तः— (१२९)

'निहत्य क्षत्रियं मोहात्त्रिभिः कृच्छ्रैर्विशुध्यति।'

तथा—

'कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैश्यघातकः।
कुर्याच्छूद्रवधे विप्रः कृच्छ्रं सांतपनं तथा॥' इति।

पराशरः— (६।१६)

'शिल्पिनं कारुकं शूद्रं स्त्रियं वा यस्तु घातयेत्।
प्राजापत्यद्वयं कृत्वा वृषैकादश दक्षिणा॥' इति।

एतानि तु प्रायश्चित्तानि क्षत्रियादिहन्तुर्विप्रस्यैव। क्षत्रियादेर्जातीयवधे तु पादपादन्यूनम्। वैश्यस्य क्षत्रियवधे द्विगुणम्। तस्य विट्शक्षत्रिययोर्वधे द्विगुणं त्रिगुणं वेत्युक्तं प्राक्।

व्यभिचारोत्पन्नवधे तु याज्ञवल्क्यः— (३।२६२)

'चांद्रायणं चरेत्सर्वानवकृष्टान्निहत्य तु।'

—अवकृष्टा व्यभिचारजाः।

---

१ चतुर्विंशतिमते- माध.

हारीतः— २०।७१)

'चंडालवधसंप्राप्तिर्ब्राह्मणस्य भवेद्यदि ।
कारयेद्द्वादशं कृच्छ्रं तप्तकृच्छ्रं ततो भवेत् ।' इति ।

अंगिराः— ।

'सर्वांत्यजानां गमने भोजने च प्रमापणे ।
पराकेण विशुद्धिः स्यादित्यांगिरसभाषितम् ॥' इति ।

—एतद्ज्ञानतो वधे । ज्ञानतस्तु चांद्रायणमिति विज्ञानेश्वरः । विपरीतमिति तु माधवः । '

तदाह लौगाक्षिः—

'हनने प्रतिलोमानां शूद्रजातां कथं भवेत् ।
ज्ञानपूर्वे पराकः स्यादज्ञानाद्द्वन्द्वं तथा ॥' इति ।

चांद्रायणं द्विविधमष्टधेनुकं त्रिधेनुकं च । पराकोऽपि पंचधेनुकस्त्रिधेनुकश्चेति द्विविधः । तत्र ज्ञाने महतोश्चान्द्रायणपराकयोर्निवेशः, अज्ञानतस्तु अल्पयोरिति अन्ययोरविरोधः ॥

यत्तु 'मासा' इत्यनुवृत्तौ ब्रह्मगर्भः - 'अन्तरप्रभवाणां तु सूतादीनां चतुर्द्विषट्' इति , तत्कामतोऽभ्यासविषयम् । तत्र सूतस्य वधाभ्यासे षण्मासाः । वैदेहकस्य चत्वारः । चण्डालस्य द्वौ । मागधस्य चत्वारः । क्षत्तुरायोगवस्य च द्वौ ति ॥

श्वपाकचण्डालयोश्चौरयोर्वधे तु देवलः—

'चौरः श्वपाकश्चण्डालो विप्रेणाभिहतो यदि ।
अहोरात्रोषितो भूत्वा घृतं प्राश्य विशुद्ध्यति ॥' इति ।

अथ स्त्रीवधे हारीतः-(२०।११-१५) 'षड्वर्षाणि राजन्ये, त्रीणि वैश्ये, अध्यर्द्धं शूद्रे, क्षत्रियवद्ब्राह्मणीषु, वैश्यवत् क्षत्रियासु, शूद्रवद्वैश्यासु, शूद्रार्द्धमितरासु ।'

शूद्रार्द्धं नवमासिकम् । इतरासु शूद्रासु । एतच्च श्रोत्रियपत्न्या गुणवत्याः कामतो वधविषयम्। सपत्नमातृभगिनीदुहितृस्नुषात्मपत्न्याद्यतिप्रत्यासन्नावध्य विषयं च । सपत्नभगिनीपितृष्वस्तृमातृष्वस्तृमातुलानी-

---

१ 'भगवानत्रिरब्रवीत्' इति तुर्यपादपाठोपेतमिदमत्रिसंहितायाम् (६।३९) ।

पितृव्यपत्नीभ्रातृभार्यार्श्वश्रूणां वधेऽप्येतान्येव पादोनानि । सपिण्डासगोत्राणां वधेऽर्द्धानि । आसामेव श्रोत्रियपत्नीत्वादिगुणविशेषे तत्तत्प्रायश्चित्तं द्विगुणं कल्प्यमिति निबन्धकृतः । आसामेवाकामतो वधे त्वेतदेवार्द्धं कल्प्यम् ।

यत्तु गौतमः— (३।४।१६-१७)

'शूद्रे संवत्सरं वृषभैकादशाश्च गा दद्यात् । अनात्रेय्यां चैवम्' इति, तद्गुणविप्रमात्रपत्नीवधविषयम् ।

यत्तु शातातपः— (२४)

'स्त्रीघाती कृच्छ्रं षण्मासम्' इति, तदत्रैवाकामतो द्रष्टव्यम् । प्रतिलोमात्प्रसूतानां ब्राह्मण्यादीनामकामतो वधे योगीश्वरः- (३।२६८)

'दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु ।
दृतिश्वनुर्बस्तमवि क्रमाद्द्याद्विशुद्धये ॥

—दृतिश्चर्मकोशः । बस्तः छागः । अविर्मेषः ।

व्याघ्रस्तु—

'चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः ।
शङ्खशुक्त्यजमेषांश्च क्रमाद्द्याद्विशुद्धये ॥' इति ।

अत्र शङ्खशुक्ती अजापेक्षयाऽधिकमूल्ये ज्ञेये । हत्यादिदाने सुवर्णमपि दक्षिणा देयेत्यपरार्के ।

कामतस्त्वाह ब्रह्मगर्भः—

'प्रतिलोमप्रसूतानां स्त्रीणां मासावधि स्मृताः ।
अन्तरप्रभवाणां च सूतानां तु चतुर्द्विषट् ॥'

ब्राह्मणीक्षत्रियावैश्यानां वधे क्रमेण षट्चतुर्द्विसङ्ख्था मासा इत्यर्थः, शूद्रायां त्वेकः । अन्तरप्रभवाणामिति व्याख्यातम् ।

वैश्यावधे किञ्चिद्देयम्, 'वैशिकेन[1] किंचित्' इति गौतमोक्तेः (३।४।२७) । किञ्चित् जलम् । 'शूद्रायामविकं वैश्यां हत्वा दद्याज्जलं नरः' इत्याङ्गिर उक्तेः । अपरार्के तु- गौतमीये वैश्ये किञ्चिन्न देयमित्यर्थं कृत्वा आङ्गिरसे 'वैश्यां हत्वा जलं स्पृशेत्' इति पठितम् ।

---

१ वैशिकेन वेश्याकर्मणा जीवन्त्यां ब्रह्मबन्ध्वां हतायां किञ्चिद्देयम् ; 'अष्टमुष्टि भवेत्किञ्चित –' इत्येतत् हरदत्तः ।

सकृव्यभिचारितविप्रादिवधे प्रचेताः– 'अनृतुमतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासान्वेति। क्षत्रियां हत्वा षण्मासान्मासत्रयं वेति। वैश्यां हत्वा मासत्रयं सार्द्धमासं वेति। शूद्रां हत्वा सार्द्धमासं विंशत्यहानि वेति'।

योगीश्वरोऽपि– (३।२६९)

'अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्यात्रतं चरेत्'।

शूद्रहत्यात्रतं योगीश्वरोक्तं (३।२६७) षाण्मासिकं, दशधेनुदानं वा। अत्र षाण्मासिकमज्ञानाद्ब्राह्मणीवधे ज्ञानात् क्षत्रियावधे च। ज्ञानाद्वैश्यावधे दशधेनुदानमिति विज्ञानेश्वरः(३।२६९)।

क्वचित्तु स्त्रीवधे प्रयोजकस्य प्रायश्चित्ताभावमभ्युदयं चाहापरार्के व्यासः—

'अकामतः स्त्रियं हत्वा ब्राह्मणीं वैश्यवच्चरेत्।
कामतो द्विगुणं प्रोक्तं प्रदुष्टायां न किंचन॥
पुण्यान् लोकानवाप्नोति शूद्रगां यस्तथा नयेत्।
पतिघ्नीमथ भर्तृघ्नीं ता हि सङ्करकारिणीः॥'

अथ गोवधे मनुः– (११।१०८–११६)

'उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः॥
चतुर्थकालमश्नीयादक्षारलवणं मितम्।[1]
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः॥

---

१ चतुर्थकालमिति– अन्नपानं प्रतिदिनं कालद्वये स्वीक्रियते। 'तस्माद्विरह्नो मनुष्येभ्य उपहियते प्रातश्च सायं च' इत्याम्नातत्वात्। तथा प्रातर्भुक्तवतः सायं द्वितीयः कालः; परेद्युः प्रातः कालस्तृतीयः, तत्रैव सायं चतुर्थः कालः। (तै. आ. टी. १।३२) एकाहं भुक्त्वा द्वितीयेऽह्नि सायं अश्नीयात्– इत्यर्थः। अपराह्णो वा चतुर्थकालः, 'लेखाप्रभृत्यथादित्ये त्रिमुहूर्तंगते रवौ। प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पञ्चमः॥ सङ्गवस्त्रिमुहूर्तस्तु मध्याह्नस्तत्समः स्मृतः। ततस्त्रयो मुहूर्तास्तु अपराह्णो विधीयते॥ पञ्चमो दिनभागो यः स सायाह्न इति स्मृतः।' इति सिन्धुटीकोदाहृतपराशरादिवचनात्॥ –प्रा. त.

दिवानुगच्छेत्तां गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् ।
शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत् ॥
तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत् ।
आसीनासु तथासीनो नियतो वीतमत्सरः ॥
आतुरामभिषिक्तां वा चौरव्याघ्रादिभिर्भयैः ।
पतितां पङ्कलग्नां वा सर्वप्राणैर्विमोचयेत् ॥
उष्णे वर्षति शीते वा मारुते वाति वा भृशम् ।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ॥
आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथ वा खले ।
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ॥
अनेन विधिना यस्तु गोघ्नो गा अनुगच्छति ।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ॥
वृषभैकादशा गास्तु दद्यात्सुचरितव्रती ।
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ॥' इति ॥

—यवान् गोमूत्रपक्वान् 'गोमूत्रेण यवागूं कृताम्' इति व्यासोक्तेः । कृतवापः सशिखं कृतवपनः । 'सशिखं वपनं कृत्वा' इति (८।३९बृ.प.८।१२४)पराशरोक्तेः ॥

अत्राद्येन श्लोकेनैकं व्रतमुक्तम्, द्वितीयेनापरम्, अवशिष्टश्लोकैस्तृतीयमिति व्रतत्रयं क्रमाच्छूद्रक्षत्रियविप्रस्वामिकगोवधेषु व्यवस्थाप्यम्। विप्रस्वामिकगोवध एवानुमन्त्रानुग्राहकसाक्षात्कर्तृषु वेति विज्ञानेश्वरादयः । उक्तावयवत्रयमेकमेव षाण्मासिकं व्रतमिति केचित् । युक्तं चेदम्।

'एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ।'(११।११७) इति ।

मनुनैकत्वेन परामर्शात् । तच्च कामतो गुणवद्विप्रस्वामिकगोवधविषयम् ।

याज्ञवल्क्यः— (३।२६३—३६४)

'पंचगव्यं पिबन् गोघ्नो मासमासीत संयतः ।
गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुध्यति ॥

---

१ वीरासनं भित्त्याद्यनाश्रित्योपवेशनम् । उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि । एतद्वीरासनं प्रोक्तं— (अ. पु. १७१।४) इति परिभाषितं त्वत्र न विवक्षितम्, रात्रिग्रहणात् ।

कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वाऽपि समाहितः ।
दद्यात्त्रिरात्रं वोपोष्य वृषभैकादशास्तु गाः ॥' इति ।

—एतच्च मनूक्तविषय एवाकामतो ज्ञेयम् ।

व्याघ्रः—

' गां चेद्धन्यान्नरः कामात्पणसप्तशतं तथा ।
श्रोत्रियाय दरिद्राय दद्याच्छुध्यर्थमात्मनः ॥' इति ।

यत्तु शङ्खः— (१७।९)

' पादं तु शूद्रहत्यायामुदक्यागमने तथा ।
गोवधे च तथा कुर्यादगम्यागमने तथा ॥' इति ।

तच्छ्रोत्रियकुटुम्बिविप्रस्वामिककपिलकर्माङ्गभूतगोवधपरम् ।

अत एव बृहस्पतिः— (३।६)

' गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रताम् ।
खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेत् ॥'

इति विशिष्टायां गवि प्रायश्चित्तविशेषमाह । अत एव प्रचेतसा 'स्त्रीगर्भिणीगोगर्भिणीबालवृद्धवधेषु भ्रूणहा भवति ' इति ब्रह्महत्याव्रत मतिदिष्टम् ।

अस्मिन्नेव विषये यमः— (५।१९)

' गोसहस्रं शतं वापि दद्यात्सुचरितव्रतः ।
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ॥ ' इति ।

गोगर्भवधे तु षट्त्रिंशन्मते विशेष उक्तः—

' पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते ।
पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥
अंगप्रत्यंगसम्पूर्णे गर्भे चेतःसमन्विते ।
द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिः ॥ ' इति ।

बृहत्प्रचेताः—

' एकवर्षे हते वत्से कृच्छ्रपादो विधीयते ।
अबुद्धिपूर्वे पुंसः स्याद्द्विपादस्तु द्विहायने ।
त्रिहायने त्रिपादः स्वात्प्राजापत्यमतः परम् ॥ ' इति ।

एतच्च प्रायश्चित्तमल्पत्वादबुद्धिपूर्वकाधमसंबंधिगोवधविषयम् ।

यमः— (४८-४९,६१)

' काष्ठलोष्टादिभिर्गावः शस्त्रैर्वा निहता यदि ।
प्रायश्चित्तं कथं तत्र शस्त्रे शस्त्रे विधीयते ॥
काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्टके ।
तप्तकृच्छ्रं तु पाषाणे शस्त्रे वाऽप्यतिकृच्छ्रकम् ॥
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
त्रिंशद्वा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणाम् ॥ ' इति ।

संवर्त्तः— (१३८× परा. ९।४९).

' एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता यदि ।
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक् ॥ ' इति ।

---

१ ' एका चेदित्युपलक्षणम् । अतो बहुभिर्द्वयोर्बहूनां च व्यापादने प्रतिपुरुषं पादद्वयं पादोनं वा कल्पनीयम् — इति मिताक्षरा ।

वस्तुतस्तु— एकाधिकानामेकैकपुरुषस्यैकप्रयत्नजन्यवधे ' व्यापन्नानां बहूनां' (सं. १३५) इति वचनात् एकैकपुरुषस्य द्विपादं कृत्वा प्रायश्चित्तम् , प्रयत्नभेदे तु ' गोघ्नद्विहितः कल्पश्चान्द्रायणमथापि वा । अभ्यासे तु तयोर्भूयः ' इत्यनेन तन्त्रताया अभावात् प्रत्येकं प्रतिपुरुषं द्विपादा वृत्तिरिति ।

एतच्चाकामतो वधे द्रष्टव्यम् , दैवादिति विशेषणोपादानात् । कामकारे बहूनामपि प्रत्येकं कृत्स्नदोषसम्बन्धात् पूर्णप्रायश्चित्तं युक्तम् सत्रिणां फलमिव । प्रतिपुरुषं कृत्स्नव्यापारसमवायात्; ' एकं व्रतां बहूनां च यथोक्ताद्विगुणो दमः । ' (या. २।२२१) इति प्रत्येकं दण्डे द्वैगुण्यदर्शनाच्चेति मिताक्षरा ।

वस्तुतस्तु— सर्वत्र पापे 'स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके ।' इत्यङ्गिरोवचनेनाज्ञानात् ज्ञाने द्वैगुण्यदर्शनादत्रापि ज्ञाने द्विपाद एव युक्तः , सत्रे तु ' सप्तादशावरा ऋद्धिकामाः सत्रमुपासीरन् ' इति श्रवणात्तथा । ' एवं व्रताम् ' इति वचनं तु गोवधातिरिक्तविषयम् । गोवधे ' एका चेत् ' इत्युपदेशेन ' दण्डवत् प्रायश्चित्तानि भवन्ति' इत्यतिदेशानवसरात् । तदवसरे तु प्रत्येकं पूर्णप्रायश्चित्तद्वैगुण्यं स्यात् , न पूर्णप्रायश्चित्तमात्रम् — प्रा. तत्त्वम् ।

हन्तृबहुत्वे यस्य प्रहारेण हता, तस्याधिकप्रायश्चित्तप्रकर्षणार्थमुपायमाह पराशरः— (९।४७) ' एको हतो यैर्बहुभिः समेतैर्न ज्ञायते यस्य हतोऽभिघातात् । दिव्येन तेषामुपलभ्य हन्ता निवर्तनीयो नृपसन्नियुक्तैः ॥ ' इति बहुजनप्रहारैर्मृतौ यदीयः प्रहारः प्राणवियोगनिमित्तं ज्ञातः, तत्र तुलाग्न्यादिदिव्येन तं निश्चित्य समूहात् पृथक्कृत्य संपूर्णं गोहत्याव्रतं कारयेत् ।— प्रा.मु.

—याद्दग्विधगोहत्यायां यद्व्रतमुपदिष्टं तस्य पादमित्यर्थः ।

आपस्तंबः— (१।१८)

' पाषाणैर्लकुटैर्वाऽपि शस्त्रेणान्येन वा बलात् ।
निपातयंति ये गास्तु कृत्स्नं कुर्युर्व्रतं हि ते ॥
तथैव बाहुजंघोरुपार्श्वग्रीवादिमोटनैः ॥ ' इति ।

—लकुटं दंडः ।

' अंगुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणतः ।
आर्द्रस्तु सपलाशश्च दंड इत्यभिधीयते ॥ '
(परा. ९।१० ल. अ. २।८)

इति पराशरोक्ताधिकप्रमाणेऽस्यापि स्थलविशेषे दोषविशेषहेतुत्वमस्त्येव ।

पराशरः— (९।२)

' दंडादूर्ध्वं यदन्येन प्रहाराद्यदि घातयेत् ।
प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधे चरेत् ॥ ' इति ।

स एव— (९।११–१२)

' मूर्च्छितः पतितो वाऽपि दंडेनाभिहतः स तु ।
उत्थितस्तु यदा गच्छेत्पंच सप्त दशैव वा ॥
ग्रासं वा यदि गृह्णीयात्तोयं वाऽपि पिबेद्यदि ।
पूर्वं व्याध्युपसृष्टश्चेत्प्रायश्चित्तं न विद्यते ॥' इति ।

पराशरः— (९।३)

[१] रोधबंधनयोक्त्राणि घातश्चेति चतुर्विधम् ' इति ।

स एव— (९।५–१०)

' गोवाटे वा गृहे वाऽपि दुर्गेष्वथ समस्थले ।
नदीष्वथ समुद्रेषु अन्येषु च नदीमुखे ॥
दग्धदेशे मृता गावः स्तंभनाद्रोध उच्यते ।
योक्त्रदामकदारैश्च कण्ठाभरणभूषणैः ॥
गृहे वाऽपि वने वाऽपि बद्धा स्याद्रौहिता यदि ।
तदेव बंधनं विद्यात्कामाकामकृतं च यत् ॥

---

१ वधनिमित्तमिति शेषः—प्रा.मु.

हले वा शकटे पंक्तौ पृष्ठे वा पीडितो नरैः ।
गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः ॥
मत्तः प्रमत्त उन्मत्तश्चेतनो वाऽप्यचेतनः ।
कामाकामकृतक्रोधो दण्डैर्हन्यादथोपलैः ॥
प्रहृता वा मृता वापि तद्धि हेतुर्निपातने ॥ ' इति ।

आपस्तंबः– (१।१८)

' दमने दामने चैव रोधे संघातयोजने ।
नस्तः सकलपाशैर्वा मृते पादोनमाचरेत् ॥ '

—दामनं मेढिबंधनम् ।

संवर्त्तः— (१३५)

' व्यापन्नानां बहूनां तु रोधने बंधनेऽपि वा ।
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत् ॥ ' इति ।

व्यासः–' औषधं लवणं चैव पुण्या(ष्ट्य)र्थमपि भोजनम् ।
अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत् ॥
अतिरिक्ते विपत्तिश्चेत्कृच्छ्र(मेव)पादो विधीयते ।'

अपवादमाह स एव— (आप.१।११-१२)

' औषधे तु न दोषोऽस्ति स्वेच्छया पिबतो यदि ।
अन्यथा दीयमाने तु प्रायश्चित्तं न संशयः ॥ ' इति ।

एतत्त्वनभिज्ञस्य । अभिज्ञस्य तु न दोषः ।

यथाह संवर्त्तः— (१३७ आप. १।३२ परा. ९।४४)

' यंत्रणे गोचिकित्सार्थे गूढगर्भविमोचने[1] ।
यत्ने कृते विपत्तिः स्यान्न स पापेन लिप्यते ॥ '

—यंत्रणं व्याध्यादिनिर्यातनार्थं संदंशादिप्रवेशनम् ।

तथा– (१३९)

' दाहच्छेदशिराच्छेदभेदनैरुपकुर्वताम् ।
द्विजानां गोहितार्थं तु प्रायश्चित्तं न विद्यते ॥ ' इति ।

पराशरोऽपि— (९।४३

' ग्रामघाते शरौघेण वेश्मभंगनिपातने ।
अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते ॥ ' इति ।

---

१ मूढगर्भः अन्तर्मृतगर्भः— प्रा. त.

तथा—

'कूपखाते च धर्मार्थे गृहदाहे च या मृताः ।
ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते ॥ ' इति ।

एतच्च बंधनादिरहितस्यैव कथंचिद्दहनादिविषयम् ।

इतरत्र त्वापस्तंबः— (३।१६)

'कांतारेष्वथ दुर्गेषु गृहदाहे खलेषु च ।
यदि तत्र विपत्तिः स्यात्पाद एको विधीयते ॥ ' इति ।

पराशरः— (९।३०)

'दहनात्तु विपद्येत अनड्वान् योक्त्रयंत्रितः ।
उक्तं पराशरेणैव ह्येकपादं यथाविधि ॥ ' इति ।

बलछलादिनाऽन्येन कारिते रोधादौ त्वापस्तंबः— (१।१६)

'पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत् ।
योजने पादहीनं स्याच्चरेत्सर्वं निपातने ॥ ' इति ।

पराशरः— (८।१)

'गवां बंधनयोक्त्रैस्तु भवेन्मृत्युरकामतः ।
अकामकृतपापस्य प्राजापत्यं विनिर्दिशेत् ॥
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
अनड्वत्सहितां गां च दद्याद्विप्राय दक्षिणाम् ॥ ' इति ।

व्यासः— (आप. १।१६)

'कंठाभरणदोषेण विपत्तिर्याऽत्र गोर्भवेत् ।
गोघ्नोऽर्द्धं तु चरेत्तत्र भूषणार्थं हि तत्स्मृतम् ॥ ' इति

आपस्तम्बेनातिदाहादौ विशेष उक्तः— (१।२४)

'अतिदाहातिवाहाभ्यां नासिकाभेदने तथा ।
नदीपर्वतसंरोधे मृते पादोनमाचरेत् ॥ '

---

१ एतद्वचनं यमस्येति भवदेवभट्टः— प्रा. त.

२ रोधः क्षीणाया गोराहारप्रचारनिर्गमविशेषः । बन्धनमयथाबन्धनमकाबन्धनं च । योजनं हलशकटादौ योजनम् , तत्रातिवाहादिनेति शेषः । निपातः कूपावटादिषु इति भवदेवः । प्रा. त.

अत्रापवादमाह पराशरः– (९।२७)

'अन्यत्राङ्कनलक्षभ्यां वाहने मोचनेऽपि वा ।
सायं सङ्गोपनार्थं च न दुष्येद्रोधबन्धने ॥' इति ।

स एव– (९।२९)

'अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत् ।
नासिक्ये पादहीनं तु चरेत्सर्वं निपातने ॥' इति ।

तथा– (हा.१९।१०)

'नासाभेदनदाहेषु कर्णच्छेदनबन्धने ।
अतिदोहातिवाहाभ्यां कृच्छ्रं चान्द्रायणं चरेत् ॥' इति ।

तत्कपिलत्वाद्यनेकगुणवद्विषयमिति ।

स्वामिनो गोरुपेक्षणे प्रायश्चित्तमाह व्यासः– (३।३९–४१)

'जलौघपल्वले मग्ना मेघविद्युद्धताऽपि वा ।
श्वभ्रे वा पतिताकस्माच्छ्वापदेनापि भक्षिता ॥
प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमम् ।
शीतवातहता वा स्यादुद्बन्धनमृताऽपि वा ।
शून्यागार उपेक्षायां प्राजापत्यं विनिर्दिशेत् ॥' इति ।

-स्वामीति पालस्याप्युपलक्षणम् । सत्कार्यान्तरवैय्यग्रादुपेक्षायां त्वर्धम् ।

अत एव विष्णुः—

'पल्वलौघमृगव्याघ्रश्वापदादिनिपातने ।
श्वभ्रप्रपातसर्पाद्यैर्मृते कृच्छ्रार्द्धमाचरेत् ॥' इति ॥

अत एव

'अपालनात्तु कृच्छ्रः स्याच्छून्यागार उपप्लवे ।'

इत्यनेनैवोपेक्षायां प्राजापत्य उक्तः ।

आपस्तम्बः—

'अस्थिभंगं गवां कृत्वा लांगूलछेदनं तथा ।
पाटनं दन्तशृङ्गाभ्यां मासार्द्धं तु यवान्पिबेत्' इति ॥

--एतत्कामतः ।

---

१ यम इति भवदेवभट्टः । –प्रा.त.

२ दाहादिना स्थिरचिह्नकरणमङ्कनम् । गोमयहरिद्रादिना तत्कालिकचिह्नकरणं लक्ष्म । —मा.

अकामतस्तु अङ्गिराः—(ल. अं. ३०)

'शृङ्गभङ्गेऽस्थिभङ्गे वा चर्मनिर्मोचनेऽपि वा।
दशरात्रं पिबेद्वज्रं[1] स्वस्थापि यदि गौर्भवेत् ॥ इति।

पराशरः–(९।१७,१८)

'पाषाणेनाथ दण्डेन गावो येनाभिघातिताः।
शृङ्गभङ्गे चरेत्पादं द्वौ पादौ नेत्रघातने ॥
लाङ्गूले पादकृच्छ्रं तु द्वौ पादावस्थिभञ्जने।
त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने ॥' इति।

स एव–(९।१९)

'शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च।
यदि जीवति षण्मासात्प्रायश्चित्तं न विद्यते ॥' इति।

व्यासः–

'यवसं चोपहर्त्तव्यं यावद्रोहेत तद्व्रणम्।
सम्पूर्णं दक्षिणां दद्यात्ततः पापात्प्रमुच्यते ॥'

पराशरः–(९।२२)

'यद्यसम्पूर्णसर्वाङ्गो हीनदेहो भवेत्तदा।
गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्दिशेत् ॥'

स एव–(९।३६)

'प्रेरयन् कूपवापीषु वृक्षछेदेषु पातयन्।
गवाशनेषु विक्रीणंस्ततः प्राप्नोति किल्बिषम् ॥' इति।

कूपवाप्यादिनिम्नेषु पानार्थं, वृक्षछेदनादिदुर्गमेषु भक्षणार्थं प्रेरणे, गोमांसाशनहस्ते गोविक्रये च गोवधपापमित्यर्थः।

स एव– (९।४७)

'गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः।
अनिवारयतां तेषां सर्वेषां पातकं भवेत् ॥'

---

१ वज्रं क्षीरादीति माधवविज्ञानेश्वरादयः। वस्तुतस्तु–'गोमूत्रेण तु सम्मिश्रं यावकं भक्षयेद्द्विजः। एतद्विमिश्रितं वज्रमुक्तं चोशनसा स्वयम् ॥' (१।२९) इत्यापस्तम्बपरिभाषितस्यैव ग्रहणं युक्तम्। अस्मिन्नेव प्रकरणे उक्तत्वात्।

सम्भावितगोपतनदेशे स्वोपभोगार्थकूपादिखननेदोषमाह स एव-(९।४१)

'वेश्मद्वारनिवासेषु यो नरः खातुमिच्छति ।
स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्दिशेत् ॥'

स्वकार्यपदाद्धर्मार्थं न दोषः ।

तथा स एव-(९।४०)

'कूपखाते तटाखाते दीर्घखाते तथैव च ।
अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते ॥' इति ।

—दीर्घखातं वाप्यादि ।

अत्र स्वयमेव जलार्थं गते मृते च न दोष इत्याह स एव- (९।३९)

'कूपखाते तटाबंधे नदीबंधे प्रपासु च ।
पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते ॥'

स एव— (९।४२)

'निशि बंधनिरुद्धेषु सर्पव्याघ्रहतेषु च ।
अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यते ॥'

एतच्च हितार्थं विहितरज्जुबंधे ज्ञेयम् ।

अपरार्कं व्यासः—

'अथात्र चेद्भवेच्छंका सायं गोर्गोपने मृते ।
गोमूत्रेण तु संमिश्रं त्रिरात्रं यावकं पिबेत् ॥' इति ।

एतन्निषिद्धरज्जुबंधनपरम् ।

रज्जुविधिनिषेधौ चोक्तौ पराशरेण—(९।३३-३४)

'न नारिकेलैर्न च शाणवालैर्न वाऽपि मौंजेन न वर्ध्रनस्रंखलैः ।
एतैस्तु गावो न निबंधनीया बद्ध्वा तु तिष्ठेत्परशुं गृहीत्वा ॥'

---

१ अगाधः कूपः कूपखातः । तटेन तीरेण आसमन्ताद्बध्यत इति तटाबन्धः प्रौढतटाकः । नदीबन्धः सेतुः । धर्मकाले गवामुदकपानार्थं निर्मिताः प्रौढाः पाषाणादिद्रोण्यः प्रपाः । — मा. २ अग्निर्ग्रामदाहः । ननु-'दहनात्तु विपद्येत-' (पृ.८६प.१०)इत्यनेन प्रायश्चित्ताभिधानेन इदं प्रायश्चित्तनिराकरणं विरुद्धमिति चेत्, सत्यम् ; 'यत्ने कृते' (पृ. ८५ प. २४) इत्यस्य सर्वशेषतयाभिहितत्वेन प्रायश्चित्तापवादस्याग्निनिर्वापणार्थकृतप्रयत्नविषयत्वात्, तत्रैवाकृतप्रयत्नविषयं प्रायश्चित्तमिति न विरोधः-वि. म. ३ 'शाणवाणैः' इति नन्दपण्डिताहतः पाठः । नारिकेलं नारिकेलवृक्षत्वङ्निर्मितम् । शाणं शणनिर्मितम् । वाणं बाणवृक्षत्वङ्निर्मितम् । मौञ्जं मुञ्जनिर्मितम् । वर्ध्रा चर्मरज्जुः, वल्केति पाठे पलाशादिवल्कल—

'कुशैः काशैश्च बध्नीयाद्रोपशुं दक्षिणामुखम् ।' इति ।
अन्यगोवधे विशेषमाह मनुः—(८।२८८)

'यो यस्य हिंस्याद्द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् ॥'

पराशरः—(९।२६)

'प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीद्यमः ॥'

ब्राह्मे—

'आदौ गोपतये दत्वा गोमूल्यं साधु कल्पितम् ।' इति ।

एतानि च सर्वाणि प्रायश्चित्तानि वृषवधेऽपि भवन्ति । निमित्तवाक्ये गवामनुवादेन तद्वतस्त्रीलिङ्गस्याविवक्षितत्वात् । दानं तु स्त्रीगवीनामेव, तद्वाक्ये गवां विधेयत्वेन तद्वतस्त्रीत्वस्य विवक्षितत्वात् । 'गोहस्रं शतं वापि' (यमः ५।१९) इत्यादौ लिंगविशेषनिर्देशाभावेऽपि स्त्रीगवीनामेव, तासां दुग्धादिद्वारा बहूपकारकत्वात् । अत एव 'गौश्चाश्वश्चाश्वतरश्च' इत्यत्र लिंगविशेषानिर्देशेऽपि 'तस्य द्वादशशतं दक्षिणा' इति तच्छब्देनाऽश्वादीस्तिरस्कृत्य गोपरामर्श इव स्त्रिया एवास्याग्रहणे बहूपकारकत्वमेव निदानमिति भाति । अन्यथा तत्र वृषाणामपि दानमापद्येतेति दिक् ।

याज्ञवल्क्यः—(३।२७१)

'गजे नीलवृषाः पंच शुके वत्सो द्विहायनः ।
खराजमेषेषु वृषो देयः क्रौंचे त्रिहायनः ॥'

मनुः—(११।१३६)

'वासो दद्याद्धयं हत्वा पंच नीलान् वृषान् गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम् ॥' इति ।

—निर्मितं दाम । अनेन दृढरज्जुमात्रमुपलक्ष्यते— इति तदीयं व्याख्यानं च । तत्र नारिकेलफलत्वद्विर्मितमेव नारिकेलं ज्ञेयम्, वृक्षत्वद्विर्मितमित्युक्तिस्तद्वृक्षादर्शनमूला ।

१ प्रतिरूपकं तत्तुल्यप्राण्यन्तरम् । प्रा. त, २ न चैतद्ग्रहणे दोषः, तद्ग्रहणस्य विक्रयत्वेन व्यवहाराभावात् । — प्रा. त. ३ 'भागित्वाद्वा गवां स्यात्' (मी. सू. १०।३।४७) गवां द्वादशशतं स्यात् । कुतः ? भागित्वात्, भागवत्यो हि गावो महाभागाः । महति उपकारे यतन्ते इत्यर्थः । ४ 'लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥'—प्रा. मु.

एतानि प्रायश्चित्तानि धनिकविषयाणि ।

निर्द्धनस्य तु जाबालिः –

'हस्तिनं तुरगं हत्वा महिषं गां तथैव च
कृच्छ्रं सान्तपनं कुर्याद्द्रोभूकन्यानृतेषु च ॥'

विष्णुः– (५०।२५-२९) 'गजं हत्वा पञ्चनीलान् वृषभान् दद्यात् । तुरगं वासः । एकहायनमनड्वाहं खरवधे । मेषाजवधे च । सुवर्णकृष्णलसमुष्ट्रवधे ।' इति ।

संवर्तः – (१४१)

'हस्तिनं तुरगं हत्वा महिषौष्ट्रौ कपिं तथा ।
एषु सर्वेषु कुर्वीत सप्तरात्रमभोजनम् ॥'

इदमभ्यासविषयम् ।

अस्मिन्नेव विषये जाबालिः–

'सिंहव्याघ्रतुरंगांश्च मृगखड्गरुरुद्विपान् ।
हत्त्वा सांतपनं कुर्याद्द्रोभूकन्यानृतेषु च ॥'

सुमंतुः– 'वानरसिंहमार्जारमंडूकाश्ववधे प्राजापत्यम् ।' इति ।

पराशरः– (६।९)

'हत्वा मूषकमार्जारसर्पाजगरडुंडुभान् ।
कृशरं भोजयेद्विप्रान् लोहदंडं च दक्षिणा ॥' इति ।

विष्णुः–(५०।३१) 'हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतमं(उपोषितः) कृसरान्नं भोजयित्वा लोहदंडदक्षिणां दद्यात् ।'

यत्तु शंखः– (१७।११)

'हत्वा द्विजस्तथा सर्पौ बिलेशयजलेशयौ ।
सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्मवधे तु यत् ॥' इति ।

तत्कामकृते ।

---

१ ललाटे शृङ्गवान् पशुः खड्गः— गदाधरः ।
विकटबहुविषाणः शम्बराकारदेहः सलिलतटचरत्वाच्छम्बरेभ्यो विचित्रः ।
त्यजति शरदि शृङ्गं रौत्यतोऽसौ रुरुः स्यात्पृथुलमृगविशेषः प्राग्यशश्चेदिदेशे ॥'

२ कृसरस्तिलमिश्र ओदनः । ओदनस्तिलमिश्रस्तु कृसरः परिकीर्तितः । तिलकल्कान्विनिक्षिप्य कृतो वा कृसरो भवेत् ॥' इति वृत्तिकृल्लिखितवचनात् ।–प्रा.मु.

यच्चोशनाः— ' खरमार्जारमंडूकसर्पाजगरमूषकान् । हत्वा कृच्छ्रं द्वादशरात्रं चरेत्किंचिदद्यात् ॥' इति । तदकामाभ्यासे ।

विष्णुः— (५०–३०) ' श्वानं हत्वा त्रिरात्रमुपवसेत् ।' इति ।

यत्तु माधवीये पैठीनसिः– 'काकोलूककङ्ककलासकैङ्खरवृकशृगाल-भांसवर्हिणमूषकचक्रवाकहंसप्लवनकुलमंडूकबिडालश्ववध एतेषामेकैकस्मिन् शूद्रवधवद्विहितम् ।' इति । तत्कामतोऽत्यंताभ्यासविषयम् ।

मनुः– (११।१३५;१३७)

' हत्वा हंसं बलाकां च बकं बर्हिणमेव च ।
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् ॥
क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम् ।
अक्रव्यादो वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम् ॥ '

स एव– (११।१३३)

' अग्निं काष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः ।
पलालभारकं षण्डे सैसकं चैव माषकम् ॥
तित्तिरौ तु तिलद्रोणं गवादीनामशक्नुवन् ।
दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये ॥ '

प्रत्येकं प्राजापत्यं कुर्यादिति केचित् । विज्ञानेश्वरस्तु कृच्छ्रपदं तपोमात्रपरम् । तपांसि च 'संवत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहोद्वादशाहः षडहस्त्र्यहोऽहोरात्रा इति कालाः । एतान्येवानादेशे विकल्पेन क्रियेरन् । एनसि गुरुणि गुरूणि लघुनि लघूनि' इति गौतमोक्तानि (३।१।१७–१२१) ।

---

१ ' कङ्कः स्यात् कङ्कमल्लाख्यो बाणपत्रार्हपक्षकः । लोहपृष्ठो दीर्घपादःपक्षाधः–पाण्डुवर्णभाक् ॥ ' मु. टी. ड.

२ भासः श्येनाकृतिः पीनतुण्डः– उज्वला । भस्मवर्णपक्षी शिक्षावान् प्रसहादः – । च. टी., च. द. । गोष्ठकुक्कुटः— शिवदासः । चक्रवाको द्वन्द्वचरो निशावियोगी.— मु. टी. ब्रह्मणः ।

३ प्लवो जलकुक्कुटः — स्मृ. चं. । महाप्रमाणः प्रसेवकगलः—मु. टी. ड.

४ श्येनः सिञ्चानो गरुडान्वयः— मु. टी. ड.

तानि दानतारतम्येन व्यवस्थाप्यानीत्याह याज्ञवल्क्यः—(प्रा.३।२७३)

'उरगेष्वायसो दंडः पंडके त्रपुसीसकम्।
कोले घृतघटो देय उष्ट्रे गुंजा हयेऽशुकम्॥'

—कोलः शूकरः। पंडकश्च मृगपक्षिसमभिव्याहारात्स एव, न तु गो-विप्रादिः। तत्र तु तद्वधनिमित्तमेव लघुप्रायश्चित्तमिति विज्ञानेश्वरः। मम तु यथा गोब्राह्मणवधनिषेधस्य जात्यवच्छेदेनैव प्रवृत्तेर्न तज्जातीयषंड-वधे इदं प्रायश्चित्तम्, तथा मृगादिविशेषजातिपुरस्कारेणापि प्रायश्चित्त-स्योक्तत्वात्तत्रापि न प्रवर्त्तते। अतो यत्र जातिविशेषपुरस्कारेण प्राय-श्चित्तं नोक्तम्, तज्जातीयषंडकवध एवैतत्प्रायश्चित्तमिति प्रतिभाति।

माधवीये कश्यपः—(३।१) 'मृगमहिषवराहकुंजरगंडकशरभतरक्षु-वानरसिंहव्याघ्रवृषवत्सशल्यकादीनामन्येषां च वधेऽहोरात्रोषितश्री-र्णांते घृतं दद्यात्।'

व्यासः—

'सर्वांश्च प्राणिनः स्थूलान्मंडूकनकुलेष्वहः।' इति।

—इदमज्ञानतः सकृद्वधे।

ज्ञानतस्तु याज्ञवल्क्यः—(प्रा. ३।२७०)

'मार्जारगोधानकुलमंडूकांश्च पतत्रिणः।
हत्वा व्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत्॥'

विष्णुः—(५०—३२) 'गोधोलूकचाषकाकवधे त्रिरात्रमुपवसेत्।'[1]

व्यासः—'शूकरोष्ट्रखरान्हत्वा व्यहमेतद्व्रतं चरेत्।'

यत्तु वसिष्ठः—(२१।२४) 'श्वमार्जारमंडूकनकुलसर्पदहरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत्' इति तदकामतोऽभ्यासविषयम्।

—दहरोऽल्पमूषकः।

यत्तु मनुः—(११।१३१—१३२)

'मार्जारनकुलौ हत्वा चाषं[2] मंडूकमेव च।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्॥'

---

१ शरभोऽष्टापद उष्ट्रप्रमाणो महाशृङ्गः पृष्ठगतचतुष्पादः काश्मीरे प्रसिद्धः—च.द. तरक्षुर्व्याघ्रभेदः—च. द.। २ शल्यकः शलाकासन्निभतनूरुहशाली मृगविशेषः—स्मृ. चं.। वृक्षशकलः बृहद्गोधानुकारी। सु. टी.।

३ चः—यः शकुनसूचकत्वेन प्रसिद्धो हरितवर्णः खर्वकायः पक्षिविशेषः स चाषः—स्मृ. चं.। इन्द्रनीलमणिसदृशपक्षः शस्तदर्शनः—सु. टी.

—शूद्रहत्याव्रतं षाण्मासिकम् ।

' पयः पिबेत्त्रिरात्रं वा योजनं वाऽध्वनो व्रजेत् ।
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाऽब्दैवतं जपेत् ॥ '

पराशरः— (६।४)

वृककाककपोतानां सारीतित्तिरघातकः ।
अंतर्जले उभे संध्ये प्राणायामेन शुध्यति ॥ '

—वृकः[1] पक्षिविशेषः । संध्ये इत्यत्यन्तसंयोगे द्वितीया । अतो यावद्भि. प्राणायामैः संध्याद्वयं समाप्यते तावतः कुर्यात् । 'प्राणायामेनेत्येकवचनमविवक्षितम् ' इति माधवः । इदमकामतः सकृद्वधे ।

स एव—(६।७,८)

' कारंडवचकोराणां पिंगलाकुररस्य च[2] ।
भारद्वाजादिकं हत्वा शिवं पूज्य विशुध्यति ॥
भारुंडचाषभासांश्च पारावतकपिंजलैः[3] ।
पक्षिणां चैव सर्वेषामहोरात्रमभोजनम् ॥ '

यत्तु संवर्तः— (१४५–१४६)

' चक्रवाकं तथा क्रौंचं तित्तिरिं शुकसारिके ।
गृध्रं श्येनमुलूकं च तथा पारावतानपि[4] ॥

---

१ वृको वृकरः, चरकेण— (सु. स्था. २७।४७) 'ककरो वृकरश्चैव वारटश्चेति विष्किराः ।' इति पठित एव भवितुमर्हति ।

२ कारण्डवः शुक्लहंसभेदोऽल्पः । अन्ये करहवमाहुः, उक्तं च— ' कारण्डवः काकवक्त्रो दीर्घाङ्घ्रिः कृष्णवर्णभाक् । ' – सु. टी.

चकोरो रक्ताक्षो विषसूचकः स्वनाम्ना ख्यातः— सु. टी.

कुररश्चीरल्लयाकारो नादोत्थापितमत्स्यः हस्तमत्स्यग्राही ' कुरल ' इति लोके प्रसिद्धः— सु. टी.

३ कपिञ्जलो गौरतित्तिरिः— डल्ह.; सजातीयैः सह कलहकारी पक्षिविशेषः— स्मृ. चं.

४ कौञ्चः ' कोञ्च ' इति ख्यातः— च. द.।

टिट्टिभं जालपादं च मद्गुं कुक्कुटमेव च ।
एवं पक्षिषु सर्वेषु दिनमेकमभोजनम् ॥ '

यदपि पराशरः- (६।२)

' क्रौंचसारसहंसांश्च चक्रवाकं च कुक्कुटम् ।
जलपादं च शरभमहोरात्रेण शुध्यति ॥ '

यदपि स एव (६।५)

' गृध्रश्येनशशादीनामुलूकस्य च घातकः ।
अपक्काशी दिनं तिष्ठेत्त्रिकालं मारुताशनः ॥ ' इति ।

तत्कामकृतवधपरम् ।

यत्तु संवर्तः- (१४४)

' हंसं बकं बलाकां च श्वाविधं बर्हिणं तथा ।
सारसं चाषभासं च हत्वा त्रीन्दिवसान् क्षिपेत् ॥' इति ।

तदभ्यासपरमिति माधवः ।

यत्त्वंगिराः-

' काके भासे च गृध्रे च टिट्टिभे खञ्जरीटके ।
यथा गवि तथा हत्या भगवानंगिराब्रवीत् ॥ ' इति ।

तत्कामतोऽत्यंताभ्यासविषयम् ।

---

१ टिट्टिभः 'टिट्टि' इति निष्ठुरशब्दभाषी पक्षिविशेषः ।— स्मृ. चं. । २ मद्गुः जलकाकः— सु. टी. ३ सारसः पुष्करः, स च दीर्घकलङ्घो नीलाङ्गः पक्षिविशेषः । — स्मृ.चं. । सारसो लक्ष्मणः रक्तशिराः प्रसिद्ध एव — सु. टी.

४ शशादी–शशघ्नी, शशघातीति चरकसुश्रुतयोः श्येनात्पृथगुपवर्णितः । शशघ्नी 'पाज्जिः' इति ख्याता — च. द. । चीरलयाकारो महाचरणनखः प्रहारेण शशकाहरणशीलः शशाभिरिति लोके प्रसिद्धः— सु. टी. । अत एव श्येनः कपोतादीन् पक्षिणो निहन्ति, न तु शशमत्ति । अतः श्येनशशादौ भिन्नजातीयौ– इति माधवः ।

५ श्वावित्– सूचीसदृशरोमयुक्तः 'सिंहा' इति लोके, — सु. टी. । श्वभक्षको व्यविशेषः– अप. । वराहविशेषः, यस्य नाराचाकाराणि लोमानि–उज्ज्वला ।

६ वायोर्मेघपर्यन्तमाकाशारोहणं लीलया करोति स खञ्जरीटः– स्मृ. चं. । सितासितवर्णो द्रुतललितगतिः । सु. टी.

अतिधनिकस्य तित्तिर्यादौ विशेषमाह मनुः– (११।१३४)

'घृतकुंभं वराहं तु तिलद्रोणं तु तित्तिरम् ।
शुकं द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनम् ॥'

धनिकस्य कामतो बलाकादिवधे माधवीये कश्यपः– (४।१–३)

'बकबलाकाहंससारसकारंडवचक्रवाककुररगृध्रश्येनखंजरीटटिट्टिभो-लूकशुकसारिकातित्तिरमयूरमद्गुमेचककलविंककपोतपारावतादीनां वधे प्रायश्चित्तमहोरात्रोषितः सर्वबीजानि च दद्यात् ।' इति ।

धनिकस्याकामतो वधाभ्यासे तु याज्ञवल्क्यः– (३।२७२)

'हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः ।
भासं हत्वा तु दद्याद्वामक्रव्यादस्तु वत्सिकाम् ॥'

जलशब्देन बकादयः । स्थलशब्देन बलाकादय इति मिताक्षरायाम् ।

याज्ञवल्क्यः (३।२७५)

'किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिके ।' इति ।

–किंचिदष्टमुष्टिधान्यम् ।

मनुः– (११।४०)

'अस्थन्वतां तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे वा नस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ॥' इति ।

शूद्रहत्याव्रतं षाण्मासिकम् ।

अथात्मघाते यमः (२२–२३ बृ.य. १।३–४)

'जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानाशकच्युताः ।
विषप्रपतनप्रायाः शस्त्रघातहताश्च ये ॥
नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः ।
चांद्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन च ॥' इति ।

आत्मघातिपुत्रादिर्मृतजातीयवधप्रायश्चित्तसमुचितमेतत्कुर्यात् ।

---

१ कलविङ्कः कालचटको भृङ्गराजाद्विनः, अपरे भृङ्गराजमाहुः, अन्ये तु रक्त-शिरसं कृष्णग्रीवं ग्रामचटकाकारमाहुः– सु.टी.

२ क्रव्याद्व्याघ्रसृगालादिर्मृगविशेषः, वानरसाहचर्यात् । हंसश्येनसमभि-व्याहारात्कङ्कगृध्रादिपक्षिविशेषाश्च गृह्यन्ते ।

३ अनस्थ्नां मत्कुणादीनाम् ।

मरणमध्यवस्य निवृत्ते तु वसिष्ठः–(२३।१८–१९) 'आत्महननाध्यवसाये त्रिरात्रं जीवन्नात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेन्निरात्रं चोपवसेत् ' इति ।–एतदल्पाध्यवसाये ।

अग्निपातादिवद्बह्वध्यवसाये तु पराशरः– (१२।५)

' जलाग्निपतने चैव प्रव्रज्यानाशकेषु च ।
प्रत्यावसितवर्णानां कथं शुद्धिर्विधीयते ॥
प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च ।
वृषैकादशदानेन वर्णाः शुध्यंति ते त्रयः ॥
ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे ।
सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत् ॥
गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत् ।
मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति ॥' इति ।

अध्यवसायावृत्तौ त्वंगिराः– (१४०–१४१ आप.९।७–८)

' यः प्रत्यवसितो विप्रः प्रव्रज्याग्निजलादिभिः ।
अनाशकनिवृत्तस्तु गृहस्थत्वं चिकीर्षति ॥
चारयेत्त्रीणि कृच्छ्राणि त्रीणि चांद्रायणानि तु ।
जातकर्मादिभिः प्रोक्तैः पुनः संस्कारमर्हति ॥'

[1]एवं मरणमध्यवसाय त्यजतां तु पराशरः–

जलाग्निपतने चैव प्रव्रज्यानशने तथा ।
अध्यवस्य निवृत्तानां प्रायश्चित्तं कथं भवेत् ॥
ब्राह्मणानां प्रसादेन तीर्थानुसरणेन च ।
गवां च शतदानेन वर्णाः शुद्ध्यंति ते त्रयः ॥
ब्राह्मणस्य प्रवक्ष्यामि गत्वाऽरण्यं चतुष्पथम् ।
सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनम् ॥
गायत्र्यष्टसहस्रं तु जपेच्चैव दिनेदिने ।
मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति ॥

---

१ प्रत्यावसित इति पठित्वा प्रत्या गृहीतव्रताः कृतसङ्कल्पा इति यावत् । ते च तेऽवसिताश्च प्रत्यावृत्ता इति यावत्– इति व्यवहारो नन्दपण्डितः ।

२ बृहत्पराशरः — का.

भिक्षार्थी प्रविशेद्ग्रामं गृहान्सप्त वने वसन् ।
औतभिक्षां समश्नीयाद्दण्डार्धेन विशुध्यति ॥' इति ।

अनुगमनान्निवृत्तौ त्वापस्तंबः—(अत्रिः ७।१)

' चितिभ्रष्टा तु या नारी मोहात्प्रचलिता ततः ।
प्राजापत्येन शुध्येत तस्माद्वै पापकर्मणः ॥ ' इति ।

आत्मघातिप्रेतक्रियायां तु वसिष्ठः—(२३।१४)

' य आत्मघातिनः कुर्यात्स्नेहात्प्रेतक्रियां नरः ।
स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम् ॥ '

उशनाः—

' प्रायोऽनाशकशस्त्राग्निविषोदन्धतृणोदकैः ।
काष्ठाद्यैश्चात्मनो हन्तुर्नृपब्रह्मसरीसृपैः ॥
शृङ्गिदंष्ट्रिश्वचाण्डालविद्युताऽभिहतस्य च ।
तथा सङ्करजातस्य नाशौचोदकवह्नयः ॥
तत्स्पर्शे यदि वाऽऽक्रोशे दिनमेकमभोजनम् ।
अज्ञानाद्दहनादौ तु कृच्छ्रं सान्तपनः स्मृतः ॥
बुद्धिपूर्वं पुनस्तस्य कृच्छ्रो गोमूत्रयावकः ।
तप्तकृच्छ्रोऽपि वाऽशक्तौ मांसभिक्षाशनोऽपि वा ॥
कृत्वा च दहनादीनि प्रायश्चित्तमकुर्वताम् ।
तप्तकृच्छ्रद्वयाच्छुद्धिरेक एवानुयायिनाम् ॥'

आत्मघातनिमित्तं प्रायश्चित्तमकुर्वतामात्मघातिपुत्रादीनामित्यर्थः ।

च्यवनः— 'आत्मघातकस्पर्शनवहनदहने तप्तकृच्छ्रं चरेद्विंशतिगावो दक्षिणा ब्राह्मणेषु' इति ।

पराशरः— (५।१०–१३)

' चाण्डालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि ।
आहिताग्निर्हतो विप्रो विषेणात्महतोऽपि वा ॥

---

१ ततः सहगमनसङ्कल्पोत्तरं सहगमनकर्मणः प्रचलिता परदत्ताग्निभयादिना, सा नारी चितिभ्रष्टेत्युच्यते । प्रा. मु.

२ तप्तकृच्छ्राभ्यां सहितमिति निर्णीय तप्तकृच्छ्रद्वययुतं चान्द्रायणमिति व्याख्यातं शम्भुभट्टेन ।

लौकिकाग्निना स दग्धव्यो मंत्रसंस्कारवर्जितः ।
स्पृष्टा वोढा च दग्धा च सपिंडेषु च तस्य यः ॥
प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनम् ।
दग्ध्वाऽस्थीनि पुनर्गृह्य क्षीरे प्रक्षालयेद्बुधः ।
साग्निभिश्च पुनर्दाहः स्वमंत्रेण पृथक् पृथक् ॥'

—एतच्च बुद्धिपूर्वक आत्महनने 'प्रायोनाशकशस्त्राग्निविषोदकोद्बंधन-प्रपतनैश्चेच्छताम्' इति गौतमोक्तेः (२।५।११) ।

अथापमृत्यौ तु भविष्यत्पुराणे—

'चंडालगोब्राह्मणाग्निपशुदंष्ट्रिसरीसृपैः ।
प्रमादान्मरणे चांद्रं तप्तकृच्छ्रमथापि वा ॥'

स्मृत्यर्थसारे तु—'तप्तकृच्छ्रद्वयं पंचपंचदशकृच्छ्राणि वा कृत्वा दाहादि कार्यम्' इति ।

अंगिराः—

'अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः ।
तस्याशौचं प्रकर्त्तव्यं कर्तव्या चोदकक्रिया ॥' इति ।

ऊर्ध्वोच्छिष्टादिमरणे पराशरांगिरसौ—(प. १२।६२)

'ऊर्ध्वोच्छिष्टे ह्यधोच्छिष्ट अंतरिक्षे मृतिर्यदि ।
कृच्छ्रत्रयं प्रकुर्वीत आशौचिमरणेऽपि च ॥'

---

१ क्वचिदात्मघातदोषो नास्तीत्युक्तमादित्यपुराणे— असाध्यव्याधिना युक्तः स्वव्यापाराक्षमः पुमान् । प्रविशत्यनलं दीप्तं करोत्यनशनं तु वा ॥ अगाधतोयराशिं वा भृगोः पतनमेव वा । गच्छेन्महापथं वापि तुषारगिरिमादरात् ॥ प्रयागवटशाखाग्रादेहत्यागं करोति वा । स्वयं देहविनाशं च प्राप्ते काले महामतिः । उत्तमानामुपाख्योकानात्मघाती भवेत्क्वचित् । एतेषामधिकारस्तु सर्वेषां सर्वजन्तुषु । नराणामथ नारीणां सर्ववर्णेषु सर्वदा ॥' इति । एतच्च कलिव्यतिरिक्तयुगविषयम्, 'भृग्वग्निपतनैश्चैव वृद्धस्य मरणं तथा' इति कलौ तन्निषेधात् । अनशनव्रतं भवत्येव, निषेधाभावात् । प्रा. मु.

२ वान्तादिकमूर्ध्वोच्छिष्टम्, मूत्रादिकमधोच्छिष्टम् । मज्जकादौ मरणमन्तरिक्षमृतिः । मा.

तथा—

'ऊर्ध्वोच्छिष्टे ह्यधोच्छिष्टोभयोच्छिष्टे तथैव च ।
अस्पृश्यस्पर्शमरणे खट्वादौ मरणे तथा ॥
श्वानकव्यादसंस्पर्शे कृमिकीटोद्भवेऽपि च ।
एतद्दोषानुसारेण प्रायश्चित्तं समाचरेत् ॥
कृच्छ्रांस्त्रिषट्पञ्चदशान् चान्द्रायणमथापि वा ।' इति ।

शक्त्या कृच्छ्रादिव्यवस्था ।

अथ पर्य्युषितशवदाहे गालवः—

'दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् ।
तत्पर्य्युषितमित्याहुर्दहने तस्य का गतिः ? ॥
पञ्चगव्येन संस्नाप्य प्राजापत्यत्रयं चरेत् ।'

द्विजस्य शूद्रप्रेतानुगमने विष्णुः—(२२।६२) 'द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवन्तीमासाद्य तन्निमग्नस्त्रिरघमर्षणं कृत्वोत्तीर्य्य गायत्र्यष्टसहस्रं जपेत् ।' इति ।

अथ सुरापाने—

'सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥'

---

१ मदनरत्ने स्मृत्यन्तरे । नि. सिं.

२ मरणे इत्यस्य प्रत्येकं सम्बन्धादूर्ध्वोच्छिष्टादेरस्पृश्यस्पृष्टस्यात्र मरणं कथ्यते । कृ. भ.

३ वस्तुतस्तूर्ध्वोच्छिष्टादीनां यथोत्तरं गौरवस्य स्पष्टत्वात्, पृथगुपादानस्वारस्याच्च त्रिषडादीनां प्रदर्शनमात्रत्वमभ्युपेत्य सन्दंशन्यायेन नवद्वादशानामपि ग्रहणेन यथासङ्ख्ययोजनैव युक्ता । ततश्च ऊर्ध्वोच्छिष्टे कृच्छ्रत्रयम्, अधरोच्छिष्टे षट्कम्, उभयोच्छिष्टे नवकम्, अस्पृश्यस्पर्शनेद्वादशकम्, खट्वादौ पञ्चदशकम्, श्वस्पर्शादौ च चान्द्रायणमित्यर्थः । तथा च गृह्यकारिकायाम्– 'ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे तथैव च । अस्पृश्यस्पर्शने चैव अन्तरालमृतौ तथा ॥ खट्वायां मरणे चैव त्रींस्त्रीन् कृच्छ्रान् प्रकल्पयेत् ।' इति । त्रींस्त्रीनित्यस्य पूर्वनिमित्तकादुत्तरनिमित्तके कृच्छ्रत्रयमधिकं कल्पयेदित्यर्थः । अन्तरालमृतिखट्वामरणयोरेकरूपत्वं ज्ञेयम् ।

इति मनूक्तेः (११।९३+सं. स्मृ. ११८) ।

—सुरा पैष्टयेव ।

'गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथैवान्या न पातव्या द्विजोत्तमैः ॥'

इति तु तदुक्तिः (११।९४) समदोषतयेतरनिन्दार्था ।

अत एव भविष्यत्पुराणे—

'सुरा तु पैष्टी विज्ञेया न तस्यास्त्विंतरे समे ।' इति ।

पुलस्त्योऽपि—(१।१२-१३)

'पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् ।
मधूत्थं सैरमारिष्टं मैरेयं नारिकेरजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम् ॥'

इति द्वादशापि मद्यानि विप्रस्य निषिद्धानि, 'नित्यं मद्यं ब्राह्मणो वर्जयेत्' (गौ. १।२।२५) इति स्मृतेः । सुरा तु क्षत्रियविशोरपि पूर्वोक्तमनूक्तेः ।

तत्र सुरापाने प्रायश्चित्तमाह याज्ञवल्क्यः—(३।२५४)

'बालवासा जटी वाऽपि ब्रह्महत्याव्रतं चरेत् ।' इति ।

नच द्वादशाब्दम् ।

प्रायश्चित्तान्तरमाह स एव- (३।२५४)

'पिण्याकं वा कणान् वाऽपि भक्षयेत्तु समां निशि ।'

—समामब्दम् ।

'कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ।'

इति मनूक्तेः (११।९२) ।

---

१ तदेतन्मद्यपानप्रायश्चित्तं ब्राह्मणस्यैव, न तु क्षत्रियवैश्ययोः ब्राह्मणं प्रत्येव मद्यपानस्य निषिद्धत्वादित्याहुः । वस्तुतस्तु— 'नराश्वमेधौ मद्यं च कलौ वर्ज्यौ द्विजातिभिः ।' इति माधवोदाहृतब्रह्मपुराणवचनेन कलौ सर्वान्प्रति तन्निषेधोऽस्त्वेवेत्यवधेयम् । प्रा.—कौ.

व्यवहारार्थमेव तन्न तु परलोकायेति चापरार्के । केचित्तु 'भक्षयेन्नि: समाः' इति पेठुः; मानवं तु व्रतान्तरमेवेत्याहुः, परे 'समा निशि' इति बहुवचनान्तं पेठुः; तत्र कपिञ्जलन्यायेनाऽऽवृत्तयं भवति । मानवीये एकवचनं तु जात्यभिप्रायेणेत्याहुः । इदं तु छर्दने सति ज्ञेयम् ।

'एतदेव व्रतं कुर्यान्मद्यपश्छर्दने कृते ।
पञ्चगव्यं तु तस्योक्तं पवित्रं कायशोधनम् ॥'

इति व्यासोक्तेः ।

गौडीमाध्व्योः सकृत्पानेऽप्येतदेवेति विज्ञानेश्वरः ।

यत्तु पञ्चमहापापिन उक्त्वा आपस्तम्बः-(१।२७।११)

'चतुर्थकालामितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पम् ।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरपपापं नुदन्तः ॥' इति ।

यच्च यमः—

'बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः ।
समत्वं ब्राह्मणैर्गच्छेदित्येषा वैदिकी श्रुतिः ॥
भूमिप्रदानं यः कुर्यात्सुरां पीत्वा द्विजोत्तमः ।
पुनर्नवं च पिबेत्तां तु संस्कृतः स विशुद्धयति ॥' इति ।

तानि याज्ञवल्कीयत्रैवार्षिकसमानविषयाणीति विज्ञानेश्वरः ।

यत्तु भविष्ये—(३।२५४)

'अकामतः सुरां पीत्वा पैष्टीं सत्कुलनन्दन ! ।
कृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनः संस्कारतः शुचिः ॥
कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ॥' इति ।

तत्सुरामात्रापनेयरोगार्थपानविषयम् ।

तथा च तत्रैव—

'तथाऽस्मिन्नेव विषये वासिष्ठं परिकीर्त्तितम् ।
यदि रोगैर्भवेद्दुष्टो नेतरस्य कदाचन ॥
कृच्छ्रश्चात्र सुरश्रेष्ठ तप्तश्चैव उदाहृतः ।'

---

१ 'कपिञ्जलेषु त्रित्वाद्याः पाक्षिकास्त्रित्वमेव वा ? आद्यो बहुत्वसाम्यात्; न, त्रित्वेनैव कृतत्वतः ॥'

२ अङ्गिराः । मा.

यत्तु मनुः—(११।१४६)

'अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ।
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥ ' इति ।

तत्र वारुणीपदं पैष्टीपरम्, उत्तरार्द्धे प्राणान्तिकनिर्देशात्। पूर्वार्द्धे तु रोगिपरमेव। अत्र संस्कारमात्रमेव प्रायश्चित्तमिति केचित्। तन्न;

'अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुद्ध्यति ।
तप्तकृच्छ्रान्वितेनेह केवलेन विशुद्ध्यति ॥ ' इति भविष्योक्तेः ।

—अज्ञानादौषधार्थम् ।

अत एव बृहस्पतिः—(४।६१)

'गौडीं माध्वीं तथा पैष्टीं पीत्वा विप्रः समाचरेत् ।
तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात् ॥ ' इति ।

ज्ञानादज्ञानतश्च पानसादिमद्यपानाभ्यासे क्रमाद्वयोर्व्रतयोरावृत्तिमाह यमः—

'गोघ्नवद्विहितः कल्पश्चान्द्रायणमथापि वा ।
अनभ्यासे त्रयोर्भूयस्ततः शुद्धिमवाप्नुयात् ॥'

---

१ पैष्टिकं तालजं कैरं माधूकं गुडसम्भवम् । क्रमाच्यूनतरं पापं तदर्धार्धं-तस्तथा ॥ (ब्रह्मा. उ. भा. ७।६४)

२ यद्यपि द्रवद्रव्यस्य कण्टदेशादधोनयनमात्रं पानम् ; तच्च एकस्मिन्नेव प्रयोगेऽनेकधैव भवति, तथापि न तथाविधोऽभ्यासोऽपेक्षितः । यतः 'पिबति' धात्वर्थस्याभ्यासो ह्यभ्यासः । एकफलोद्देशेन प्रवृत्तकृतिव्याप्यानां चैकोपक्रमाणां व्यापारनिचयानामप्येकधात्वर्थत्वम् । यथा – एकफलोद्देशेनैकप्रयत्नोपक्रमाणां स्थालीमार्जनादीनामोदनपरीक्षणपर्यन्तानां व्यापारनिचयानामेक 'पचि' धात्वर्थत्वम् ; यथा वा प्रहारलक्षणानां भिन्नत्वेऽपि एकफलोद्देश्यैकैकप्रयत्नोपक्रमत्वेनैकमेव 'हन्ति' धात्वर्थत्वम् । अन्यथा पशुयागे प्रतिप्रहारं 'प्रहर्तं रक्ष' इत्येवमादिमन्त्रावृत्तिप्रसङ्गात् ।

तेनात्रापि एकफलोद्देशेन एकप्रयत्नोपक्रमाणामपि व्यवहाराणामेकस्मिन् प्रयोगे सकृत्पानत्वम्, नाभ्यासः । प्रयोगभेदे त्वभ्यास एवेति सिद्धम् । इति भवदेवः । एतेन चाण्डालाद्यन्नभक्षणेऽपि सकृदभ्यासविचारो व्याख्यातः ।

कामतः सकृत्पाने पराशरः–(१२।७५)

'मद्यपश्च द्विजः कुर्य्यान्नदीं गत्वा समुद्रगाम् ।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
अनड्वत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ॥ '

इदं च गवाधिक्यं शक्तं प्रति ।

अज्ञानतः सकृत्पाने तु विष्णुबृहस्पती–(बृ. ४।२३)

'पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः ।
कारयेत्तस्य संस्कारं भक्त्या विप्रांश्च भोजयेत् ॥ '

पानसादीन्येकादशमद्यान्युक्त्वा अपर्युषिततत्पाने प्रायश्चित्तमाह पुलस्त्यः—(१।)

'द्राक्षेक्षुटङ्कं खर्जूरं पानसादेश्च यो रसः ।
सद्यो जातस्तु तं पीत्वा त्र्यहाच्छुध्येद्द्विजोत्तमः ॥ '

इदं तु त्रिरात्रं द्राक्षादिरसानां मादकत्व एव द्रष्टव्यम् । अन्यथा सद्योजातेक्षुरसादावपि स्यात् ।

सुरासंस्पृष्टद्रव्यस्याज्ञानतो भक्षणे आह मनुः—(११।१५०)

'अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ ' इति ।

पुनः संस्कारश्च पुनरुपनयनमिति निबन्धकृतः । तस्य विधिरुक्तः संस्कारमयूखे (पृ.३९) ।

यत्तु सुमन्तुः— 'ब्राह्मणस्य सुरापस्य षण्मासानुद्धृतसमुद्रोदकस्नानम् । सावित्र्यष्टसहस्रं जुहुयात्प्रत्यहम् । त्रिरात्रमुपवासः । तप्तकृच्छ्रेण पूतो भवति ' इति । तच्चैवार्षिकविषयम् ।

कामतः सकृत्सुरापाने याज्ञवल्क्यः–(३।२५३)

'सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम् ।
सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति ॥ ' इति ।

यत्तु वसिष्ठः–(२०।२५) 'अभ्यासे तु सुराया अग्निवर्णां सुरां पिबेत् ' इति तदकामपरम् ।

---

१ गोमूत्रसाहचर्याद्धव्ये एव घृतपयसी, घृतपयःसाहचर्याच्च स्त्रैणमेव गोमूत्रम् ।—विज्ञा.

गौडीमाध्व्योर्मत्याऽभ्यासेऽमत्या वाऽत्यन्ताभ्यासे तु माधवीये व्याघ्रः—

'मत्या मद्यममत्या वा पुनः पीत्वा द्विजोत्तमः।
ततोऽग्निवर्णां तां पीत्वा मृतः शुद्धयेत्स किल्बिषात् ॥'

अथाभक्ष्यभक्षणे विष्णुः—

'अभोज्यानामपेयानामभक्ष्याणां च भक्षणे।
कृच्छ्रपादं विशुद्ध्यर्थं चरेयुः क्षिप्रशोधनम् ॥'

इदं त्वज्ञानात्सकृद्भक्षणे।

ज्ञानतस्तु संवर्तः—

'अभोज्यभोजनं कृत्वा ब्रह्मक्षत्रविशां गणः।
गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति ॥'

अभ्यासे तु बृहस्पतिः—

'अलेह्यानामपेयानामभक्ष्याणां च भक्षणे।
रेतोमूत्रपुरीषाणां शुद्ध्यै चान्द्रायणं चरेत् ॥' इति।

शिष्टविगीतमात्रे तंमाखुभंगादिद्रव्यविशेषे तु अपरार्के भरद्वाजः—

'शिष्टा नाश्नन्ति यत्किञ्चिदन्नमूलफलादिकम्।
न तद्भोज्यं द्विजातीनां भुक्त्वा चोपवसेदहः ॥' इति।

अथ विशेषतः। तत्र जातितो दुष्टे पलाण्ड्वादौ अज्ञानात्सकृद्भुक्ते बृहस्पतिः—

'लशुनं कवकं चैव पलाण्डुं गृञ्जनं तथा।
वत्वार्य्यज्ञानतो जग्ध्वा तप्तकृच्छ्रं चरेद्द्विजः ॥' इति।

---

१ एतत्प्रायश्चित्तमार्द्रवासोवता कार्यम्, 'सुराप आर्द्रवासाश्च अग्निवर्णां सुरां पिबेत्' इति पैठीनसिवचनात्। तथा लोहपात्रेणापि, 'सुरापोऽग्निवर्णामायसेन पात्रेण ताम्रेण वा पिबेत्' इति प्रचेतःस्मृतेः। —प्रा. मु.

२ तच्च 'तमाखु' इति प्रसिद्धमिति भट्टोजिदीक्षिताः। 'गांजा' इति प्रसिद्धमेवेत्यस्माकं भाति। विशेषः श्राद्धमयूखे (पृ. ६४) द्रष्टव्यः।

ज्ञानतस्तु याज्ञवल्क्यः–(१।३७६)

'पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ।
लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत् ॥'

गृञ्जनं लशुनतुल्यः कन्द इति विज्ञानेश्वरः । यदीयं चूर्णं गायकाः कण्ठशुद्धयै विटाश्च मदार्थमश्नन्ति, स पत्रविशेष इति माधवः ।

'विषदिग्धेन शल्येन यो मृगः परिहन्यते ।
अभक्ष्यं तस्य तन्मांसं तद्धि गृञ्जनमिष्यते ॥'–इत्यपरार्कः । यत्तु–हेमाद्रिमाधवौ गाजराख्यं मूलमिति, तन्न;

हेमाद्रावेव–

'गृञ्जनं चुक्रिकां चुक्रं गाजरं पोतिका तथा ।'

इति ब्राह्मं पृथङ्निर्देशात् ।

शातातपः— (५।३)

'लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनीम् ।'
इत्युक्त्वा 'उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः ।' इति'

चान्द्रायणानुवृत्तौ विष्णुः–(५१।३–४) 'लशुनपलाण्डुगृञ्जन विड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तान्ते पुनः संस्कारं कुर्यात् ।' इति ।

यत्तु मनुः–(५।१९–२०)

'छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेन्नरः ॥
अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ।
यतिचान्द्रायणं वाऽपि शेषेषूपवसेदहः ॥' इति ।

---

१ पादमात्रमिदं दृश्यते ब्राह्मे (११२।१०६)'पलाण्डुस्तीक्ष्णकन्दश्च उल्ली च मुखदूषणः ।' —रा. नि.

२ शुनादिसाहचर्याच्छुन्यत्र शाकविशेषः, स च गोरक्षदुग्धेति प्रसिद्धः । 'गोरक्षदुग्धा गोरक्षी नान्नदुग्धा रसायणी । अपि स्याद्बहुपत्री च मृतसञ्जीवनी शुनी ॥' (१०।५८३) इति कल्पद्रुः । निर्णयसिन्धौ तु 'शुनः, शुनम्' इति वा पाठः, अग्रे च 'उष्ट्रमानुषकेभाश्वरासभक्षीरभोजनात् ।' इत्यर्धम् । तत्र 'शुनम्' इति पाठे जग्ध्वेत्यत्रान्वयः, 'शुन' इति पाठे क्षीरभोजनादित्यत्र । —इति कृष्णभट्टः ।

अत्र कामतोऽभ्यासे पतनम्। अज्ञानत औषधार्थं सकृद्भक्षणे सान्तपनम्। औषधार्थमेव ज्ञानतः सकृदज्ञानतोऽभ्यासे च चान्द्रम्। पलाण्ड्वाद्येकनाश्यरोगे तु नैव दोषः।

तथा च पलाण्ड्वाद्यनुवृत्तौ सुमन्तुः– 'एतान्येवातुरस्य भिषक्क्रियायामप्रतिषिद्धानि' इति।

चतुर्विंशतिमते—

'लशुनं गृञ्जनं चैव तृणराजफलं तथा।
उल्लीं चैव द्विजो भुक्त्वा चरेच्चान्द्रायणव्रतम्॥' इति।

तृणराजस्तालः। उल्ली पलाण्डुः।

पराशरः–(११।१०–११)

'पीयूषं श्वेतलशुनं वृन्ताकं फलगृञ्जनम्।
पलाण्डुं वृक्षनिर्यासं देवस्वं कवकानि च॥
उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुञ्जते द्विजः।
स त्रिरात्रोपवासेन पञ्चगव्येन शुद्ध्यति॥'

सुमन्तुः–'लशुनपलाण्डुगृञ्जनभक्षणे सावित्र्यष्टसहस्रेण मूर्द्धि सम्पातान्नयेत्' इति।

एतन्मुखप्रवेशमात्रपरम्।

मिताक्षरायां स्मृतिः–(१।१७५)

'नालिकाशणछत्राककुसुम्भालाबुविड्भवान्।
कुम्भीकम्बुकवृन्ताककोविदाराश्च वर्जयेत्॥

---

१ यद्यपि अन्नादीनां कण्ठादधोनयनसंभवे भक्षणम्, न तु निष्ठीवनाय शुण्ठ्यादेः कपोलधारणम्, तथाविधे प्रयोगाभावात्। तथापि पापविषये तथाविधानुबन्धेऽपि प्रायश्चित्तम्, ब्रह्मवधे तथा दर्शनात्।...

ततश्च 'विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने।' (या. ३।२९२) इति दण्डोद्यमे दण्डनिपातप्रायश्चित्तार्द्धवत् भक्षणोद्यमे कण्ठादधोनयनसम्भावनारहितेऽर्द्धं प्रायश्चित्तं ज्ञेयम्। —तत्त्वम्।

२ उशनाः।—मा.।

३ नालिका दीर्घनालाग्रगतालपत्रवा। कुम्भी श्रीपर्णिका। कम्बुकं वृत्तालाबु।–मा.। कोविदारो युगपत्रकवृक्षः, तस्य फलं वा पुष्पं वा कोविदारम्। तत् कोमलावस्थं शाकत्वेन प्रायं प्रतिषिद्धयते।— स्मृ. चं.

तथा कालप्ररूढानि पुष्पाणि च फलानि च।
विकारवच्च यत्किञ्चित्प्रयत्नेन विवर्जयेत् ॥' इति।
तथा 'वटप्लक्षाश्वत्थदधित्थनीपकदम्बमातुलिंगफलानि वर्जयेत्'।
(हा. स्मृ. १३।२१)।

यमः—

'तण्डुलीयककुम्भीकत्रश्चनप्रभवांस्तथा।
एतेषां भक्षणं कृत्वा प्राजापत्यव्रतं चरेत् ॥' इति

कामतोऽभ्यासे तु वृद्धयमः—(य. ३।४९)

'नालिकां नालिकेरीं च श्लेष्मातकफलानि च।
खट्वा वार्त्ताककुम्भीकत्रश्चनप्रभवांस्तथा ॥
'भूतृणं शिग्रुकं चैव कुसुम्भं कवकानि च।
एतेषां भक्षणं कृत्वा चरेच्चान्द्रायणं द्विजः ॥'

द्विजपदाच्छूद्रादेरनिषेधः।

आपस्तम्बः—(६।९)

'भक्षयेद्यदि नीलीं तु प्रमादाद्ब्राह्मणः क्वचित्।
चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥' इति।

षट्त्रिंशन्मते—

'शणपुष्पं शाल्मलं च करनिर्मथितं दधि।
बहिर्वेदिपुरोडाशं जग्ध्वा नाद्यादहर्निशम् ॥'

---

१ नालिका नालिकेरी च शाकविशेषौ, खट्वाख्यश्च।—मि. नारिकेलीं तद्रसभवं गुडमिति केचित्—भो. कु.। 'पर्यङ्कपालिका खट्वा खट्वाङ्गी दधिपुष्प्यपि।' (६।१४५) कल्पद्रुः। वार्ताकं क्षुद्रवार्ताकीसंज्ञकं बृहतीफलम्।—स्मृ. चं.

२ भूतृणो भूस्तृणः। मुडागमशून्यो निर्देशश्छान्दसः। यस्य नाग्रेऽन्ते (?) स्थानेषु परिमण्डलावयवा भवन्ति स भूस्तृणाख्यः शाकविशेषः स्मृ. चं.। भूस्तृणं काश्मीरदेशे प्रसिद्धम्—नि. सिं.। द्विविधस्यापि कुसुम्भस्य नवपत्राणि शाकत्वेनोपयुज्यन्ते स्मृ. चं.। विज्ञानेश्वरस्तु—'खुखण्डं कवकानि च' इति पठित्वा कवकं राजसर्षपाख्यं शाकम्, खुखण्डं तद्विशेषो गोबलीवर्दन्यायेन निर्दिष्टः' इति व्याचक्ष्यौ।

कूर्मे–(२।३३।२१)

'अलाबुं शिग्रुकं चैव जग्ध्वाऽप्येतद्व्रतं चरेत् ।
औदुम्बरं च कामेन तप्तकृच्छ्रेण शुद्धयति ॥' इति ।

शंखः– (१७।२९–३०)

'माहिषं गव्यमाजं च भक्ष्यं क्षीरेषु निर्दिशेत् ।
भुक्त्वा परस्य च क्षीरं मासं कुर्याद्व्रतं बुधः ॥
अनिर्दशाहं गोक्षीरं माहिषं वाऽजमेव च ।
गोश्च क्षीरं विवत्साया[1]: सन्धिन्याश्च तथा पयः ॥
सन्धिन्यमेध्यभक्षाया भुक्त्वा पक्षं व्रतं चरेत् ॥
क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रव्रतं कुर्याद्यतेस्तत्परिकीर्तितम् ॥' इति ।

अनभ्यासे तु संवर्तः—

'अवत्सैकशफास्त्रीणां क्षीरं प्राश्य द्विजोत्तमः ।
अनिर्दशाया गोश्चैव त्रिरात्रं यावकं पिबेत् ॥' इति ।

अकामतोऽनभ्यासे 'शेषेषूपवसेद्दहः' (५।२०) इति मनूक्त उपवासः।

उष्ट्र्यादिक्षीरं तु शातातपः–(१०,१५)

'उष्ट्रीक्षीरपाने मानुषीक्षीरपाने पुनरुपनयनं तप्तकृच्छ्रं च। सूतवत्सासन्धिन्यनिर्दशाया गोः क्षीरप्राशने वृथामांसभक्षणे च प्राजापत्यम् ।'

कपिलाक्षीरपाने विशेषमाहापस्तम्बः–

'क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः ।
यः पिबेत्कापिलं क्षीरं न ततोऽन्योऽस्त्यपुण्यकृत् ॥'

भविष्यपुराणे– (१।१७।५१)

'कापिलं यः पिबेच्छूद्रो नरके स विपच्यते ।
हुतशेषं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः ॥'

अन्यथा हुतशेषापाने ।

---

१ गौर्या वृषेण सन्धीयते, सा सन्धिनी । या चैकां वेलामतिक्रम्य दुह्यते, या च वत्सान्तरेण सन्धीयते, सापि सन्धिनी ।–मि. २ 'देवकार्यार्थनिर्मितम् । स पच्यते महाघोरे सुचिरं नरकार्णवे ॥' इति द्वितीयपादादिपाठो मूले ।

तत्र शूद्रस्य कपिलाक्षीरपाने च्यवनेन 'ब्रह्महा' इति तादृप्यातिदेशः कृतस्तेन तस्य तत्र नवाब्दम्। इतरयोश्चान्द्रायणम्, अनादिष्टत्वात्।

ब्रह्मपुराणे—

'घृतात्फेनं घृतान्माण्डं पीयूषमथ चार्द्रगोः।
दधिक्षीरमथाज्यं च दुष्टायाश्चैव गोः पयः॥
अनिर्दशायाश्च तथा सन्धिन्याश्च तथैव च।
सगुडं मरिचाक्तं च तथा पर्युषितं दधि॥
जीर्णतक्रमपेयं तु नष्टस्वादं च फेनवत्।
प्रमादाद्भक्षितैरेभिर्वृते पक्षत्रतं चरेत्॥' इति।

—आर्द्रगोः सद्यः प्रसूतायाः। दुष्टाया व्याध्यादिना।

अथ मांसभक्षणे मनुः—(५।४८)

'नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं न भक्षयेत्॥'

तत्र विशेषानुक्तावकामतः सकृद्भक्षणे 'शेषेष्वपवसेदहः'(५।२०) इति मनूक्तम्।

कामतस्तु 'अनुपाकृतमांसानि'(या. १।१७१) इत्याद्युपक्रम्य-

'मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्।'
(या. १।१७५) इति।

अकामाभ्यासे मनुः—(११।१५२)

'भुक्त्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत्।' इति।

कामतोऽभ्यासे विष्णुः—(५१।२०) 'अनर्चितं वृथामांसं भुक्त्वा मासं पयसा वर्त्तेत' इति।

नरमांसादिभक्षणे उशनाः—(९।२५)

'नरमांसं श्वमांसं च गोमांसं चाश्वमेव च।
भुक्त्वा पञ्चनखानां च महासान्तपनं चरेत्॥'

---

१ वृद्धादुद्धृत्य तत्फेनमात्रं न पेयम्, एवं मण्डं तदम्रं च।

२ भुक्त्वैत्यायनुवृत्तम् [५१।७) मूले 'सप्तरात्रं' इति।

स्मृत्यन्तरे–

'जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा।
गवाश्वकुञ्जरोष्ट्राणां सर्वं पाञ्चनखं तथा॥
क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतम्।'

यमः–

'मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च।
श्वगोमायुकपीनां च तप्तकृच्छ्रं विधीयते॥
उपोष्य वा द्वादशाहं कूष्माण्डैर्जुहुयाद् घृतम्।' इति।

अत्राद्यमकामतः, कामतोऽपरम्।

बृहद्यमः–

'शुष्कमांसाशने विप्रो व्रतं चान्द्रायणं चरेत्।' इति।

षट्त्रिंशन्मते–'अजाविमहिषमृगाणाममांसभक्षणे केशनखरुधिराशने मतिपूर्वं त्रिरात्रमज्ञानादुपवासः' इति।

क्वचिन्मांसभक्षणमनुजानाति याज्ञवल्क्यः–(१।१७९)

'प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया।
देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्।' इति।

यत्तु मनुः–(५।५६)

'न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला।' इति।

तदनुज्ञातपरम्, न तु निषिद्धपरम्; निषिद्धानाचरणस्य पुण्यजनकत्वादिति शूलपाणिः। तन्न; सत्यपि पुरुषार्थे 'नानृतं वदेत्' (तै.सं.२।५।५) इति निषेधे दार्शपूर्णमासिकेन तेन निषिद्धानाचरणस्यैव क्रतूपकाराख्यपुण्यजनकत्वदर्शनात्। तत्त्वतस्तु–नात्र निषिद्धानाचरणं पुण्यजनकम्, किन्तु प्रजापतिव्रत इव मांसनिवृत्तिसङ्कल्पः; यथा 'एकादश्यां न भुञ्जीत' इति निषेधसत्त्वेऽपि व्रतविधिना भोजनाभावसङ्कल्पः फलाय विधीयते। एतेन–

'गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात्।' (१।१८१)

इति याज्ञवल्कीयमपि व्याख्यातम्। एतच्च फलं सांवत्सरिकसङ्कल्पस्य।

'वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम्।' (५।५३)

इति मनूक्तेः।

योगीश्वरः–(१।१८०)

'वसेत्स नरके घोरे दिनानि पशुरोमभिः।
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्॥'

हन्तॄनाह मनुः–(५।५१)

'अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः॥'

अत्र च देवान्पितॄनिति सामान्यतोऽनुज्ञातमप्यजादिमांसं विप्रेण न भक्ष्यम्।

तथा च मनुः–(११।९५)

'यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः॥'

यत्तु मेधातिथिः– 'निषिद्धमांसपरमेतत्' इत्याह, तन्न, विशेषनिषेधवैयर्थ्यापत्तेः। न चायं दोषातिशयार्थः। यस्य हि निषेधस्य निषिद्धविषयत्वमेव नियतं, तत्र निषिद्धविषयालाभादगत्या दोषविशेषः कल्प्यते; यथा नन्दासु अभ्यङ्गनिषेधे सति पुनः षष्ठ्यां निषेधो दोषातिशयार्थः। केचित्तु मांसरसलोलुपा अपक्वमांसविषयत्वमस्याहुः। उपक्रमे 'यक्षरक्षःपिशाचान्नं' इत्युक्तेः। यक्षादीनां च क्रव्यात्त्वादपक्वमेव मांसमन्नम्। तथोपसंहारेऽपि 'देवानामश्नता हविः' (म. ११।९५) इत्युक्तेः। देवानां च हविः पक्वमेव भवति। अतः पक्वमेव विप्रैर्भक्ष्यं नापक्वमिति। तत्तुच्छं; न हि यक्षादयः पक्वं नाश्नन्ति, क्रव्यात्त्वं तु तेषां पक्वालाभेऽपक्वमप्यश्नन्तीत्यभिप्रायेण। देवानां हविश्चाममपि विहितं यथाऽग्निहोत्रे–'तण्डुलैर्जुहोति' इति, चित्रायां च–'दधिमधुघृतं धाना उदकं तण्डुलास्तत्संसृष्टप्राजापत्यम्' इति। तथा 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इत्यत्र पशुरूपाममांसस्यैव देवतासम्बन्ध उक्तः। तस्मादुपक्रमो

मांसमात्रनिन्दार्थ एव। उपसंहारोऽपि ब्राह्मणस्तुत्यर्थ एव। अत्र विशेषः श्रीपितृचरणकृते द्वैतनिर्णये द्रष्टव्यः।

अथ ब्रह्मचारिणो मधुमांसभक्षणे प्रायश्चित्तम्।

देवलः—

'मृतान्नं मधुमांसं च यद्यश्नाति व्रती क्वचित्।
त्रिरात्रोपोषितः सम्यक् रात्रिमेकां जले वसेत्॥'[1]

इदमज्ञानतः सकृद्भक्षणे।

ज्ञाने संवर्त्तः—(२५)

'ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथञ्चन।
प्राजापत्यं च कृत्वाऽसौ मौञ्जीहोमेन शुद्धयति॥'

—मौञ्जीहोमः पुनरुपनयनम्।

वसिष्ठः—(२३।८-९) 'ब्रह्मचारी चेन्मधुमांसमश्नीयाच्छिष्टभोजनीयं द्वादशरात्रं चरित्वा व्रतशेषं समापयेत्। श्राद्धसूतकभोजनेषु चैवम्' इति।

-शिष्टभोजनीयं शिष्टभोजनयोग्यम्। विहितमित्यर्थः। अभक्ष्यमांसादिभक्षणे प्रातिस्विकं तदपि कार्यम्।

अपवादमाह स एव—(२३।१०) 'अकामापन्नं वाजसनेये न दुष्यति' इति।

-अकामापन्नं अकामं भक्षितम्।

तथा ब्रह्मचार्य्यधिकारे बौधायनः—(२।५।३०-३३) 'स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भैषज्यार्थे सर्वं प्राश्नीयात्। येनेच्छेत्तेन चिकित्सेत्। स यदाऽगदः स्यात्तदादित्यमुपतिष्ठेत् 'हंसः शुचिषत्' (तै. सं. १।८।१५) इति।

लघुहारीतः—(४४)

'आमिषस्य तु यो भाण्डे पक्वमश्नाति सव्रतः।
कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्त्तयेत्॥' इति।

---

१ मृतान्नं मधु मांसं च यस्तु भुञ्जीत ब्राह्मणः। स त्रीण्यहान्युपवसेदेकाहं वोदके वसेत्॥ (भ. पु. १।१८४।५९)

अथ शरीरमलभक्षणप्रायश्चित्तम् ।

तत्र मलानाह मनुः—(५।१३४)

'वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः ।
श्लेष्माश्रुदूषिकास्वेदो द्वादशैते मला नृणाम् ॥'

प्रायश्चित्तमाह योगीश्वरः—(३।२५५)

'अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च ।
पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥'

—पुनःसंस्कारः पुनरुपनयनम् । इदं च प्रातिस्विकैः शारीरमलभक्षण-प्रायश्चित्तैः समुच्चीयत इति शूलपाणिः । स्वतन्त्रमेव प्रायश्चित्त-मित्यन्ये ।

अज्ञानतः सकृद्भक्षणे तु संवर्तः—(१८९)

'विण्मूत्रभक्षणे विप्रः प्राजापत्यं समाचरेत् ।'

ज्ञानतः सकृद्भक्षणे अङ्गिराः—

'प्राजापत्यं चरेद्वैश्योऽतिकृच्छ्रं क्षत्रियश्चरेत् ।
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रो विण्मूत्रभक्षणे ॥' इति ।

यत्तु वसिष्ठः—(२०।२२-२३) 'मत्या मद्यपाने सुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतप्राशनं पुनः संस्कारश्च । मूत्रशकृच्छुक्राभ्यवहारेषु चैवम्' इति; तदपि विप्रस्य ज्ञानतः सकृद्भक्षणे ।

अस्मिन्नेव विषये गौतमः—(३।५।२-३) 'अमत्या मद्यपाने पयोघृतमुदकं वायुः प्रतित्र्यहं तप्तानि स तप्तकृच्छ्रः, ततः संस्कारः मूत्रपुरीषरेतसां प्राशने चैवम्' इति ।

यत्तु बृहस्पतिः—

'रेतोमूत्रपुरीषाणां शुद्ध्यै चान्द्रायणं चरेत्' इति;

तदनतिपूर्वाभ्यासविषयम् ।

केशादिभक्षणे षट्त्रिंशन्मते—'केशनखरुधिरप्राशने मतिपूर्वं त्रिरात्रमज्ञानादुपवासः ।'

यत्तु स्मृत्यन्तरम्—

'केशकीटनखं प्राश्य मत्स्यकण्टकमेव च ।
हेमतप्तं घृतं पीत्वा तत्क्षणादेव शुध्यति ॥' इति;

तन्मुखमात्रप्रवेशविषयम् ।

प्रचेताः—

'अन्ने भोजनकाले तु मक्षिकाकेशदूषिते ।
अनन्तरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत् ॥'

अथ क्रियादुष्टभक्षणे ।

तत्रोच्छिष्टभक्षणे मनुः—(११।१५९)

'बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्चलाम् ॥'

पानं त्वेकस्मिन्नेव दिने । एतच्चाकामतः सकृद्भक्षणे ।

कामतस्तु विष्णुः—

'पक्षिश्वापदजग्धस्य रसस्यान्नस्य भूयसः ।
संस्काररहितस्यापि भोजने कृच्छ्रपादकम् ॥'

अकामतोऽभ्यासे शातातपः—'श्वकाकावलीढशूद्रोच्छेषणभोजने त्वतिकृच्छ्रं' इति ।

कामतोऽभ्यासे यावकं व्रतं प्रकृत्य शङ्खः—(१७।४६)

'शुनामुच्छिष्टकं भुक्त्वा मासमेकं व्रती भवेत् ।
काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेत् ॥'

वृद्धविष्णुः—(५१।५०-५३) 'ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पञ्चगव्यं पिबेत् । वैश्योच्छिष्टाशने पञ्चरात्रम् । राजन्योच्छिष्टाशने त्रिरात्रम् । ब्राह्मणोच्छिष्टाशने त्वेकाहम्' इति । अकामतो विप्रस्य विप्राद्युच्छिष्टभोजने मिताक्षरायां शङ्खः—'ब्राह्मणोच्छिष्टाशने महाव्याहृतिभिरभिमन्त्र्यापः पिबेत् । क्षत्रियोच्छिष्टाशने ब्राह्मीरसविपक्केन घृतेन क्षीरेण वर्तयेत् । वैश्योच्छिष्टाशने त्रिरात्रोपोषितो ब्राह्मीं सुवर्चलां पिबेत् । शूद्रोच्छिष्टभोजने षड्रात्रमभोजनम्' इति ।

अकामतोऽभ्यासे तु यमः—(६।१-२)

'भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शुद्ध्यति ।
भूभुजा सह भुक्त्वाऽन्नं तप्तकृच्छ्रेण शुध्यति ॥

---

१ ब्राह्मीं सुवर्चलां तत्कथितमुदकमित्यर्थः । ब्रह्मसुवर्चला चोक्ता कल्पद्रुकोशे (१०।६०१) 'सक्षीरा पद्मिनीप्रख्या देवी ब्रह्मसुवर्चला । अरत्निमात्रक्षुपका पत्रैर्व्यङ्गुलसम्मितैः ॥' इति ।

वैश्येन सह भुक्त्वाऽन्नमतिकृच्छ्रेण शुद्ध्यति ।
शूद्रेण सह भुक्त्वाऽन्नं चान्द्रायणमथाचरेत् ॥ ' इति ।

इदं कामाभ्यासाविषयमिति विज्ञानेश्वरः । कामतोऽभ्यासे त्वेतदेव द्विगुणं कल्प्यम् । विज्ञानेश्वरमते त्वकामतोऽभ्यासेऽर्द्धम् ।

अन्त्योच्छिष्टभोजने तु आपस्तम्बः–(५।९)

' अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ।
चान्द्रं कृच्छ्रं तदर्द्धं च ब्रह्मक्षत्रविशां विधिः ॥ ' इति ।

—चान्द्रं चान्द्रायणम् ।

अङ्गिराः–(२७)

' चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे ।
चान्द्रायणं चरेद्विप्रः क्षत्रः सान्तपनं चरेत् ॥
षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः । ' इति ।
' द्विजः शुद्ध्येत्पराकेण शूद्रः कृच्छ्रेण शुध्यति । '

इति तूत्तरार्द्धं पपाठ शूलपाणिः । सान्तपनं महत् । इदमज्ञानतः सकृद्भक्षणे । ज्ञानतस्तु द्वैगुण्यम् ।

पीतोच्छिष्टपाने वृद्धशातातपः–

' पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित् ।
त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ॥ ' इति ।

इदं चाकामतोऽभ्यासे । कामतश्च सकृत्पाने ।

कामतोऽभ्यासे तु वृद्धशातातपः–(४८)

' पीतशेषं तु यत्किञ्चिद्भोजने मुखनिःसृतम् ।
अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ॥ '

स्त्रीणामुच्छिष्टभोजने त्वापस्तम्बः (१।२६।४–५)– ' शूद्रोच्छिष्ट-भोजने सप्तरात्रमभोजनम् । स्त्रीणां च ' इति । इदं च कामतः, सकृ-

---

१ इदमेव मुद्रितस्मृतौ ।

२ पीतोच्छिष्टं भूमौ निहिते पात्रे जायते, न हस्तसंस्थापने; ' पानीयं च पिबेद्येन तत्पात्रं द्विजसत्तमः । अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत् ॥ ' इति वचनात् ।—प्रा. मु.

द्वक्षणे च। अकामतः षड्रात्रम्, एतत्सहचारिशूद्रोच्छिष्टभोजने दर्शनादिति केचित्। परेऽर्द्धमेवाहुः।

सहभोजने तु बृहद्यमः–(६।९)

'माता वा भगिनी वाऽपि भार्या वाऽन्याश्च योषितः।
न ताभिः सह भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत्॥' इति।

यत्त्वङ्गिराः–(आप. ५।७)

'ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन।
तत्र दोषं न मन्यन्ते सर्व एव मनीषिणः॥' इति।

तदापद्विषयं विवाहविषयं वा।

उच्छिष्टापवादमाहापस्तम्बः– (१।४।११) 'पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्।'

आपदि शूद्रगृहभोजने तु पराशरः—(११।२०)

'आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि।
मनस्तापेन शुद्ध्यर्थं द्रुपदां वा शतं जपेत्॥'

दीपोच्छिष्टभक्षणे षट्त्रिंशन्मते–

'दीपोच्छिष्टं तु यत्तैलं रात्रौ रथ्याहृतं च यत्।
अभ्यङ्गाचैव यच्छिष्टं भुक्त्वा नक्तेन शुध्यति॥'

तैलग्रहणाद्घृते न दोषः।

अथ श्राद्धभोजने शङ्खः–(ल. शं. ३३–३४)

'चान्द्रायणं नवश्राद्धे पराको मासिके मतः।
पक्षत्रयेऽतिकृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव च॥

---

१ कदाचनेति वचनात्– मा.। तथा च हेमाद्रौ गालवः–'एकयानसमारोहमेकपात्रे च भोजनम्। विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥' इति।

२ 'द्रुपदादिवेत्' (तै. ब्रा. २।६।६) 'द्रुपदादिव' (शु. य. २०।२०) इतीयं द्रुपदा।

३ पृथ्वीचन्द्रोदयेऽङ्गिराः—'प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमे तथा। नवमैकादशे चैव तन्नवश्राद्धमुच्यते॥' शिवस्वामी—'नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः। आपस्तम्बाः षडित्याहुर्विभाषा त्वितरेषु हि॥' नि. सि.

आब्दिके कृच्छ्रपादः स्यादेकाहः पुनराब्दिके ।
अत ऊर्ध्वं न दोषः स्याच्छङ्खस्य वचनं यथा ॥ ' इति ।

मासिके आद्ये । द्वितीयादिषु तु प्रायश्चित्ततारतम्यं कल्प्यम् । षण्मासिकशब्देन ऊनषाण्मासिकमपि गृह्यते । एवमाब्दिकपदेन ऊनाब्दिकमपि । न दोषः पूर्ववदिति शेषः । तृतीयाद्याब्दिकेऽपि ' त्रिरात्रं वाऽन्यमासेषु प्रत्यब्दं चेदहः स्मृतम् ' इति षट्त्रिंशन्मते प्रायश्चित्तोक्तेः ।

यत्तु भरद्वाजः—

' भुक्तं चेत्पावर्णश्राद्धे प्राणायामान्षडाचरेत् ।
उपवासस्त्रिमासादि वत्सरान्तं प्रकीर्त्तितम् ॥
प्राणायामत्रयं वृद्धावहोरात्रं सपिण्डने ।
असरूपे स्मृतं नक्तं व्रतपारणके तथा ॥
द्विगुणं क्षत्रियस्यैतत्त्रिगुणं वैश्यभोजने ।
साक्षाच्चतुर्गुणं ह्येतत्स्मृतं शूद्रस्य भोजने ॥ ' इति ।

तत्र त्रिमासादीत्यापद्विषयम् ।

यत्तु हारीतः—(५।३९)

' चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके ।
एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते ॥ ' इति ।

तच्छङ्खवाक्यसमानविषयम् । मिश्रकं संवत्सरान्तर्गतश्राद्धमित्यपरार्के । एकादशाहिकमित्यन्ये । " चान्द्रायणं नवश्राद्धे ' इत्येतदाद्यनवश्राद्धविषयम् । ' प्राजापत्यं तु मिश्रके ' इत्याद्यमासिकविषयम् ।

द्वितीयनवश्राद्धादिषु षट्त्रिंशन्मतोक्तम्— (य. स्मृ. २।२६–२७)

' प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके ।
त्रैपक्षिके तदर्द्धं स्याद्दौ पादौ मासिके तथा ॥
पादोनं कृच्छ्रमुद्दिष्टं षण्मासे च तथाब्दिके ।
त्रिरात्रं चान्त्यमासेषु प्रत्यब्दं तदहः स्मृतम् ॥ ' इति ।

क्षत्रियादिश्राद्धभोजने तु तत्रैव— (य. स्मृ. २।३१–३४)

' चान्द्रायणं नवश्राद्धे पराको मासिके स्मृतः ।
त्रैपक्षिके सान्तपनं कृच्छ्रं मासद्वये स्मृतम् ॥

क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतम् ।
वैश्यस्यार्द्धाधिकं प्रोक्तं क्षत्रियात्तु मनीषिणः ॥
शूद्रस्य तु नवश्राद्धे चरेच्चान्द्रायणद्वयम् ।
सार्द्धचान्द्रायणं मासि त्रिपक्षे त्वैन्दवं स्मृतम् ॥
मासद्वये पराकः स्यादूर्ध्वं सान्तपनं स्मृतम् ॥ ' इति ।

यत्तु हारीतः—

' त्र्यहमेकादशाहे तु भुक्त्वा सञ्चयने तथा ।
उपोष्य विधिवद्भुक्त्वा कूष्माण्डैर्जुहुयाद् घृतम् ॥ '

यदपि विष्णुः— (५१।५०)

' प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके ।
त्रैपक्षिके तदर्द्धं तु पञ्चगव्यं द्विमासिके ॥ ' इति ।

तदुभयमापद्विषयम् ।

भारद्वाजः—

' अपाङ्क्तेयान्यदुद्दिश्य श्राद्धमेकादशेऽहनि ।
ब्राह्मणस्तत्र भुक्त्वाऽन्नं शिशुचान्द्रायणं चरेत् ॥
आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुद्ध्यति ।
सङ्कल्पिते तथा भुक्त्वा त्रिरात्रं[1] अपणं भवेत् ॥ ' इति ।

आमश्राद्ध इति नवश्राद्धविषयम् । यत्तु तत्रैव विष्णुः— (५१।४९) ' आमश्राद्धाशने त्रिरात्रम् ' इति; तदापद्विषयम् ।

यत्तु शङ्खः— (१७।४३)

' आमश्राद्धाशने विद्वान्मासमेकं व्रतं चरेत् ।

इति, तदभ्यासविषयम् । सङ्कल्पित इति षाण्मासिकादिविषयम् ।

मनुः— (११।१५७)

' मासिकान्नं तु योऽश्नीयादसमावर्त्तिको द्विजः ।
स त्रीण्यहान्युपवसेदेकाहमुदके वसेत् ॥ ' इति ।

---

१ त्रिरात्रेणैव शुद्ध्यति—इति चतुर्थपादः मु. स्मृतौ ।

यत्तु संवर्त्तः–(२३, २५)

'मृतकान्नं नवश्राद्धं मासिकान्नं तथैव च ।
ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथञ्चन ॥
प्राजापत्यं तु कृत्वाऽसौ मौञ्जीहोमेन शुद्धयति ।' इति ।

तद्बुद्धिपूर्वविषयम् ।

अनुक्तप्रायश्चित्ते तु सर्वत्र उशनाः– (३।७)

'दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुद्द्विजः ।
ततः सन्ध्यामुपासीत शुद्धयेत्तु तदनन्तरम् ॥' इति ।

आमश्राद्धे तु सर्वत्रार्द्धम् ।

तथा च षट्त्रिंशन्मते–

'आमश्राद्धे भवेदर्द्धं प्राजापत्यादि सर्वदा ।' इति ।

अथ संस्कारान्नभोजने प्रायश्चित्तविवेकेऽङ्गिराः–

'जन्मप्रभृतिसंस्कारे बालस्यान्नस्य भोजने ।
असपिण्डैर्न भोक्तव्यं श्मशानान्ते विशेषतः ॥'

व्यासः– (२।२३–२४ +ल. अं. ६३+ आप. ९।२२)

'निवृत्ते व्रतहोमे तु प्राङ्नामकरणात्तथा ।
चरेत्सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
अतोऽन्येषु तु भुक्त्वाऽन्नं संस्कारेषु द्विजोत्तमः ।
नियोगादुपवासेन शुद्धयते निन्द्यभोजने ॥'

यौम्यः–

'ब्रह्मौदने[१] च सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे द्विजश्चान्द्रायणं चरेत् ॥'

आपस्तम्बः—(९।२२)

'याजकान्नं नवश्राद्धं सङ्गहे चैव भोजनम् ।
स्त्रीणां प्रथमगर्भे च द्विजश्चान्द्रायणं चरेत् ॥' इति ।

स्त्रीणां सङ्ग्रहो विवाहः ।

---

१ अत्र ब्रह्मौदनाख्यं कर्माधिनाङ्गभूतं सोमसाहचर्यात् । इति विज्ञानेश्वरः । अन्ये तु उपनयनाङ्गभूतोऽनुपवचनीयो ब्रह्मोदन इति व्याचक्षते । सोमे दीक्षोत्तरमग्निषोमीयपशायागात् पूर्वमित्यर्थः । भो. कु.

अथ हस्तदत्तादिभक्षणे प्रायश्चित्तमाह यमः—

'माक्षिकं फाणितं शाकं गोरसं लवणं घृतम्।
हस्तदत्तानि भुक्त्वा तु भोक्ता सान्तपनं चरेत्॥'

एतत्कामतः। सान्तपनं दिनत्रयसाध्यम्।

अकामतस्त्वाह पराशरः—

'माक्षिकं फाणितं शाकं गोरसं लवणं घृतम्।
हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनम्॥' इति।

—फाणितं इक्षुरसविकारविशेषः।

पर्यायदत्तान्नभोजने वृद्धयाज्ञवल्क्यः—

'ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्।
द्वयमेतदभोज्यं स्याद्भुक्त्वा तूपवसेदहः॥' इति।

शूद्रहस्तभोजनादौ तु क्रतुः—(सं. स्मृ. २९)

'शूद्रहस्तेन यो भुङ्क्ते पानीयं वा पिबेत्कचित्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति।'

एवं याज्ञवल्क्योक्तेषु— (१।१६८)

'गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः।'

इत्यादिष्वपि कल्प्यं प्रायश्चित्तम्।

मनुः—

'घृतहीनं तु यो भुङ्क्ते नरस्त्वाहुतिपञ्चकम्।
पश्चाद् घृतेन यो भुंक्ते भुक्त्वा चान्द्रायणं चरेत्॥'

वृथापाकान्नभक्षणे तु शातातपः—

'यत्र नाश्नन्ति देवाश्च पितरश्च यथाविधि।
वृथापाकः स विज्ञेयस्तस्य नाद्यात्कथञ्चन॥

---

१ 'हस्तदत्तभोजने... त्रिरात्रमभोजनम्' इति हारीतोक्तेः। भो. कु.

२ 'उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्'। इति शातातपस्मृतौ (६४) अत्रिस्मृतौ (९।१७) चोत्तरार्धम्।

३ अत्रिसंहितायां तु—(८।९) 'योऽग्रहीत्वा विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः'॥ इति वृथापाकं लक्षयित्वा 'वृथापाकस्य' (८।१०) इत्युक्तम्।

वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरेद्द्विजः ।
प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥ '

लिखितोऽपि—

' यस्य चाग्नौ न क्रियते यस्य चाग्रं न दीयते ।
न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसेदहः ॥ '

तथा—

' वृथाकृसरसंयावपायसापूपशष्कुलीः ।
आहिताग्निर्द्विजो भुक्त्वा प्राजापत्यं चरेदिति ॥ '

अनाहिताग्नेस्तूपवासः ।

पराशरः—(११।८)

' एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने ।
यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् ॥
मोहाद्भुञ्जीत यस्तत्र पंक्तावुच्छिष्टभोजनः ।
प्रायश्चित्तं चरेद्विप्रः कृच्छ्रसान्तपनं तथा ॥ '

एतच्च कामतः ।

यत्तु माधवीये स्मृत्यन्तरम्— (अं. स्मृ. ५।१)

' यस्तु भुङ्क्ते द्विजः पङ्क्त्यामुच्छिष्टायां कदाचन ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ' इति ।

तदकामतः ।

निन्दितपङ्क्तिभोजनेऽङ्गिराः—

' यस्तु पङ्क्तिषु भुञ्जीत कुत्सितानां विशेषतः ।
अहोरात्रोषितः स्नातः पञ्चगव्येन शुद्ध्यति ॥ '

---

१ यस्य अन्नस्य—अग्नौ न क्रियते, न हूयते । यस्य च ' अन्नाग्रं च समुद्धृत्य हन्तकारोपकल्पितम् । निर्वापभूतं भूपाल ! श्रोत्रियायोपकल्पयेत् ॥ ' (वि. पु. ३।१११।६२) इति विहितमग्रं न दीयते । 'अग्रं ग्रासचतुष्टयम् ।' इति मार्कण्डेयपुराणे (२९।५३) ।

२ कृसरा देवताद्देशमन्तरेण साधिताः ।... कृसरं तिलमुद्गसिद्ध ओदनः । संयावः क्षीरगुडघृतादिक्षेप उत्करिकाख्यः पाकविशेषः । पायसं पयसा घृतमन्नम् । अपूपोऽस्नेहपक्वगोधूमविकारः । शष्कुली स्नेहपक्वो गोधूमविकारः ।—मि.

क्षत्रियादिपङ्क्तिषु विष्णुः–'ब्राह्मणः क्षत्रियपङ्क्तावुपविश्यासंस्पृशन्यदा भुङ्क्ते तदा नक्तमाचरेद्वैश्यपङ्क्त्यामेकरात्रं शूद्रपङ्क्त्यां त्र्यहमाचरेत्' इति। इति क्रियादुष्टाशनप्रायश्चित्तम् ॥

अथाभोज्यान्नाः ।

व्यासः– (४।६५–६६)

'गृध्रो द्वादश जन्मानि दश जन्मानि शूकरः ।
श्वा चैव सप्तजन्मानीत्येवं मनुरुवाच ह ॥
शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः ।
स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले ॥'

आपस्तम्बः— (८।८)

'आहिताग्निस्तु यो विप्रः शूद्रान्नेन प्रवर्त्तते ।
पञ्च तस्य विनश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ॥'

किञ्चिदपवदति हारीतः–

'कन्दुपक्वं स्नेहपक्वं पायसं दधिसक्तवः ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥'

कन्दुर्भ्राष्ट्रम्[1]। 'क्लीबेऽम्बरीषं भ्राष्ट्रौना कन्दुर्ना स्वेदनी स्त्रियाम्।' इति कोशात् (अम. २।९।३०)।

याज्ञवल्क्यः— (१।१६६)

'शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥'

---

१ भ्राष्ट्रशाला...अपूपादिपचनार्थं परिमण्डलाकृत्या कृतमयोमयं पात्रम्। —स्मृ. चं. । विष्णुरहस्ये–(३५।९६) 'विनोदकेन यत्पक्वं यत्पक्वं तैलसर्पिषा। तदन्नं फलवद्ब्राह्मं नात्र कार्या विचारणा ॥

२ दासादीनां लक्षणमाह पराशरः– (११।२२–२४) 'शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। असंस्काराद्भवेद्दासः संस्कारादेव नापितः ॥ क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः। स गोपाल इति ख्यातो भोज्यो विप्रैर्न संशयः॥ वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः। स ह्यार्द्धिक इति ज्ञेयो भोज्यो विप्रैर्न संशयः ॥' इति। यद्यपि क्रमप्राप्तस्य कुलमित्रस्य लक्षणं नोक्तम्,—

एतेषां चान्नं सम्प्रोक्ष्य ग्राह्यम् ।

'सम्प्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम् ।'

इति विष्णुपुराणात् ।

आपस्तम्बः— (८।१७)

'आममन्नं मधु घृतं धानाः क्षीरं तथैव च ।
गुडमांसरसा ग्राह्या निवृत्तेनापि शूद्रतः ॥'

सुमन्तुः—

'गोरसश्चैव सक्तुं च तैलं पिण्याकमेव च ।
अपूपान् भक्षयेच्छूद्राद्यचान्यत्पयसा कृतम् ॥'

पराशरः— (११।१३)

'घृतं तैलं तथा क्षीरं गुडं तैलेन पाचितम् ।
गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजनम् ॥'

चतुर्विंशतिमते—

'आरनालं तथा क्षीरं काञ्जिकं दधिसक्तवः ।
स्नेहपक्वं तथा चान्नं शूद्रस्यापि न दुष्यति ॥'

लिखितः—

'भुक्त्वा वार्द्धुषिकस्यान्नमव्रतस्यासुतस्य च ।
शूद्रस्य च तथा भुक्त्वा त्रिरात्रं स्यादभोजनम् ॥'

इदमकामतः ।

—तथापि शब्दसामर्थ्यात् प्रक्रमबलाद्वा तल्लक्षणमुन्नेयम् ॥ शब्दसामर्थ्यतस्तावत् कुलस्य मित्रं कुलमित्रमिति व्युत्पत्त्या पितृपितामहादिक्रमादायातं आप्तः शूद्रः कुलमित्रमित्यभिधीयते । प्रक्रमानुसारेण तु वैश्यः शूद्रकन्यामूढ्वा तस्यां यं पुत्रमुत्पादयति, स कुलमित्रमिति ॥ यस्तु वाङ्मनःकायकर्मभिस्तवाहमित्यात्मानं निवेदयति, स आत्मनिवेदकः । यद्वा—आर्द्धिकसाहचर्यात् क्षत्रियायां ब्राह्मणेनोत्पादितः क्रमतः संस्कृत आत्मनि वेदकोऽस्तु । अस्मिन्पक्षे यद्यप्यशूद्रावार्द्धिकात्मनिवेदकौ, तथापि नीचजातित्वसामान्येनाभोज्यत्वशङ्कायां तदपनोदनायेदमभिधीयते— इत्यदोषः— मा. । अत्र चकारात् कुम्भकारश्च । —मि. । इदं च कलौ वर्ज्यम् , 'शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् । भोज्यान्नता—' इति माधवीयादौ आदित्यपुराणे तत्प्रकरणे पाठात् ।

१ तक्रमित्यत्रिसंहिता—(८—५) पाठः । 'तदेतत्सर्वमापद्विषयम्' ।—स्मृ. चं. ।

कामतस्तु शूद्रादीनुक्त्वा सुमन्तुः-

'भुञ्जानोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रमेव च ॥' इति ।

आवृत्तावधिकं कल्प्यम् ।

याज्ञवल्क्यः-

'यतिश्च ब्रह्मचारी च एकान्नस्वामिनावुभौ ।
तयोरन्नं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ॥'

अथ रजकाद्यन्ने आपस्तम्बः-(९।३२)

'रजकव्याधशैलूषवेणुचर्मोपजीविनाम् ।
यो भुङ्क्ते ब्राह्मणश्चान्नं शुद्धिश्चान्द्रायणेन तु ॥'

एतत्कामतः । अकामतोऽर्द्धम् ।

यत्तु रजकादीनभिधायाह यमः-(३४)

'भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानाद्वैन्दवद्वयम् ॥' इति ।

एतदभ्यासे ।

यत्तु संवर्तः-

'अन्त्यजान्नं यदा भुङ्क्ते शूद्रो मोहात्कथञ्चन ।
एकरात्रोषितो भूत्वा दानं दत्त्वा विशुध्यति ॥' इति;

तदापदि ।

---

१ व्याधः— 'नापितादुपकन्यायां सर्वस्वी तस्य योषिति । क्षत्राद्वभूव व्याधश्च बलवान्मृगहिंसकः ॥' (ब्र. वै. १।१०।११३) । शैलूषः- 'रथकारस्य दुहिता सायोगवसमागता । सूते यं तनयं सोऽपि सूत्रधार इतीरितः ॥ जायाजीवश्च शैलूषो नाट्यशास्त्रविशारदः ।' (शू. क.) । 'वृत्त्यन्वेषी नटानां तु स तु शैलूषिकः स्मृतः ।' (प्रा. त.) वेणुः— 'विप्रायां नापिताज्जातो वेणुकः परिकीर्तितः ।' (सू. सं. १।१२।३३) वेणुपदस्योपजीविपदेन सम्बन्धाभ्युपगमे तु 'चण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।' (१०।३७) इति मनूदितो ग्राह्यः । चर्मोपजीवी—'वैदेहिकात्तु विप्रायां जाताश्चर्मोपजीविनः ।' (औ. २१) इत्युक्तश्चर्मकारादन्य एव ।

२ कृच्छ्राब्दं अब्दं व्याप्य कृच्छ्रम् प्राजापत्यमित्यर्थः ।

अथ कापालिकान्ने—

आपस्तम्बः– (बृ. य. २।२)

'कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा ।
ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयम् ॥ '

कृच्छ्राब्दमभ्यासविषयम् ।

अथ चाण्डालान्ने–

अङ्गिराः– (३।१६)

'अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः ।
स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ॥ '

अत्र कामतश्चान्द्रायणमकामतस्तप्तकृच्छ्रम् ।

यत्तु कृच्छ्रपादानुवृत्तौ वसिष्ठः–(२०।१९) 'एतदेव चण्डालान्नभोजने, ततः पुनरुपनयनम् ' इति; तदपि चान्द्रायणसमानविषयम् ।

विष्णुः– (५१।५७–५८) 'चण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् । सिद्धं भुक्त्वा पराक ' इति; तदुलाद्धोजितविषयम् ।

यत्तु मनुसुमन्तू– (म. ११।१७५+ल. शा. १५९)

'चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ ' इति ।

---

१ कापालिकाः– 'सद्यः कृत्तद्विजशिरःपङ्कजार्चितभैरवैः । न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः ? ॥ ' (शं. दि. १।३७) इत्यादावुपवर्णिता नरबलिसुरोपहारादिभिर्महाभैरवपूजकाः । एतेषां धर्माचारादिवर्णनं प्रबोधचन्द्रोदये (३।१२–१३) द्रष्टव्यम् ।

२ अन्त्यावसायिनः मूले वक्ष्यन्ते (पृ.) । तद्भिन्नोऽप्युक्तो मनुना– निषादस्त्री तु चण्डालात्पुत्रमन्त्यावसायिनम् । श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥ ' (१०।३९) ।

३ चण्डालः 'ब्राह्मण्यां.... शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ।' (या. ३।९३) अङ्गिरसा त्वन्येऽपि चण्डाला उक्ताः– 'यस्तु प्रव्रजिताज्जातो ब्राह्मण्यां यश्च शूद्रजः । तावुभौ विद्धि चण्डालौ सगोत्रावथ जायते ॥ ' (शू. क.)

४ अन्ते भवा अन्त्याः यतोऽधमजातयो न सन्ति ।—दीपकलिका ।

तत्र ज्ञानतोऽत्यन्ताभ्यासे तु पातित्योक्तद्वादशाब्दम्। कामतस्तु चतुर्विंशत्यब्दम्।

म्लेच्छादिभिर्बलाद्भोजितस्य कारिताशुभकर्मणश्च प्रायश्चित्तमाहापस्तम्बः- (दे. स्मृ. १७-२२)

'बलादासीकृता ये तु म्लेच्छचाण्डालदस्युभिः।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम्॥
उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनम्।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम्॥
तत्स्त्रीणां च तथा सङ्गं ताभिश्च सह भोजनम्।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम्॥
चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथ वा भवेत्।
चान्द्रायणं पराकं च चरेत्संवत्सरोषितः॥
संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत्।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुद्ध्यति॥
ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः।
संवत्सरैस्त्रिभिश्चैव तद्भावं सन्निगच्छति॥'

शूलपाणिस्तु-

'संवत्सरैश्चतुर्भिश्च तद्भावं सोऽधिगच्छति।
म्लेच्छो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मनः॥'

---

१ म्लेच्छाः- 'क्षत्रवीर्येण शूद्रायामनुदोषेण पापतः। बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः॥' (ब्र. वै. १।१०।११९)। 'ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः। अस्यामनेन चौर्येण म्लेच्छो विप्राः! प्रजायते॥' (बृ. सं. १।१२।२२) इत्याद्यनेकविधाः।

दस्यवः- 'पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः। पारदा पह्लवाश्चीनाः किराता दरदाः खशाः॥ मुखबाहूरुपज्जानां या लोके जातयो बहिः। म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः॥' (१०।४४।४५) इति मनूक्ताः।

२ अशुभं कर्मोक्तं नारदेन- (५।६-७) 'गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्। गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम्॥ इष्टतः स्वामिनश्चाङ्गैरुपस्थानमथान्ततः। अशुभं कर्म विज्ञेयम्' इति।

इत्यन्ते पपाठ । प्राजापत्यचान्द्रायणादि मासं वाऽऽमात्रे । गवादि-हिंसायां तु प्रातिस्विकं तत्तत्प्रायश्चित्तमेवाकामतो विहितं ज्ञेयम् ।

आशौच्यत्रे छागलेयः—

'प्राणायामशतं कृत्वा शुद्ध्यते शूद्रसूतके ।
वैश्ये षष्टिर्भवेद्राज्ञि विंशतिर्ब्राह्मणे दश ॥
एकाहं च त्र्यहं पञ्च सप्तरात्रमभोजनम् ॥'

इदमकामतः ।

यत्तु मार्कण्डेयः—

'भुक्त्वा तु ब्राह्मणाशौचे चरेत्सान्तपनं द्विजः ।'

यच्च शङ्खः— (१७।४१)

'ब्राह्मणस्य तथा भुक्त्वाशौचे मासं व्रती भवेत् ।' इति; तदभ्यासविषयम् । अत्र सर्वत्र सूतकग्रहणं मृतकस्याप्युपलक्षणम् । अङ्गिराः (८१-८२)

'सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः ।
पिबेत्पानीयमज्ञानात्समश्नीयात्स्पृशेत्तथा ॥
पानीयपाने कुर्वीत पञ्चगव्यस्य भक्षणम् ।
त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा स्नानं विधीयते ॥'

ब्राह्मे—

'योगो मघात्रयोदश्याः कुञ्जरच्छायसंज्ञकः ।
भवेन्मघायां संस्थेन्दौ हंसश्चैव करे स्थितः ॥
सूतके मृतके वाऽथ प्रस्तयोः शशिसूर्ययोः ।
छायायां कुञ्जरस्याथ भुक्त्वा तु नरकं व्रजेत् ॥
भुक्त्वा प्रमादाद्विप्रस्तु सकृच्चान्द्रायणं चरेत् ।'

एतच्च प्रायश्चित्तं यज्जातीयस्याशौचिनोऽन्नं भुक्तं, तज्जात्युचितमाशौचं कृत्वा तदन्ते कार्यम् ।

तथा च विष्णुः—(२२।७-८)'ब्राह्मणादीनामाशौचे यः सकृदन्नमश्नाति तस्य तावदाशौचं यावत्तेषाम् । आशौचापगमे प्रायश्चित्तं कुर्यात्' इति ।

ब्राह्मे—'मत्तोन्मत्तातुराणां च मुमूर्षोर्वा कदाचन ।'

तथा—

'तद्गृहे नान्नमश्नीयात्प्रवसत्यग्निहोत्रिणि ।
एतेषां तु गृहे भुक्त्वा द्विजश्चान्द्रायणं चरेत् ॥' इति ।

आपस्तंबः—

'म्लेच्छादीनां पयः पीत्वा पुष्करिण्यां ह्रदेऽपि वा ।
जानुदघ्नं शुचि ज्ञेयमधस्तादशुचि स्मृतम् ॥
तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा ।
अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः ॥'

इति, तत् जानुदघ्नोनम् ।

अत एव शातातपः—

'अन्त्यैरपि कृते कूपे सेतौ वाप्यादिकेऽपि वा ।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते ॥'[1]

अथान्त्यजभाण्डजले—

पराशरः—(६।३०-३१)

'भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ॥
ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः ।
शूद्रस्य चोपवासेन तथा दानेन शक्तितः ॥' इति ।

इदमकामतः ।

कामतस्त्वापस्तम्बः—

'मदान्धो म्लेछभाण्डेभ्यो यस्त्वापः पिबते द्विजः ।
कृच्छ्रपादेन शुध्येत पुनः संस्कारमर्हति ॥'

शूद्रोदकपाने शातातपः—

'यदि विप्रः प्रमादेन शूद्रतोयं पिबेत्स्वयम्' ।

---

१ शूद्राणां नोपवासोऽस्ति दानेनैव विशुद्धयति । (प. पु. ब्र. खं. १९।१६)

इत्युपक्रम्य—

'उषोष्य बिल्वपत्राणां पलाशस्य कुशस्य च ।
एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात् ॥'

अपवादमाह जाबालः—

'नवभाण्डे तु पानीयं शूद्रविट्क्षत्रजन्मनाम् ।
पेयं तदपि विप्राणां पयो दधि तथैव च ॥'

शङ्खः—'घृतदधिपयस्तक्राणामाकरभाण्डस्थितानामदोषः' इति ।

शातातपः—

'घृतं तैलं दधि क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति ॥'

प्रपादिजलपाने लघुहारीतः—

'प्रपाजलं सीरघटस्य चैव द्रोणीजलं कोशविनिर्गतं च
पीत्वाऽवगाहेत जलं सवासा उपोषितः शुद्धिमवाप्नुते च ॥'

—सीरघटः सीरवृक्षनिर्यासाधारभूतं पात्रम् । द्रोणी नौकाजलनिःसारणपात्रम् । कोशविनिर्गतं कूपादेश्चर्मपुटकनिःसारितम् । एतत्कामतः ।

सकृत् आपदि तु न दोष इत्याह स एव—

'द्रोण्यामायसयुक्तायां छन्ने प्रावर्त्तके तथा ।
ग्रामप्रपाजलं चैव पीत्वाऽऽपत्सु न दुष्यति ॥'

छन्ने प्रावर्त्तके सेचके अज्ञात इति शूलपाणिः ।

यमः—

'प्रपास्वरण्ये घटके स्वकूपे द्रोणीजलं कोशगतास्तथापः ।
ऋतेऽपि शूद्रात्तदपेयमाहुरापद्गतो भूमिगताः पिबेच्च ॥'

---

१ अज्ञानात्पिबतो तोयं ब्राह्मणः शूद्रजातिषु । अहोरात्रोषितः स्नात्वा पञ्चगव्येन ॥ (अ. सं. ८।७) इति, तदस्तसम्बन्धमात्रेण । इदं तु तत्पात्रस्थपानविषयम् । भो. कु. ।

२ प्रपास्वरण्येषु जलेषु वै गिरौ द्रोण्यां जलं केशविनिःसृतं च । श्वपाकचाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः ॥' (२।२) इत्यापस्तम्बस्मृतौ। तत्र 'घटके च सौरे' इति मिताक्षरापाठः, 'कटके' इति माधवीये । अत्रिसंहितायां तु—'घटकस्य कूपे...कोशविनिर्गतं च' इति (७।२१) ।

आपदि तदेव जलं भूमिष्ठं कृत्वा पात्रान्तरेणोद्धृतं पेयमित्यर्थः ।

अथ संसर्गदुष्टे विष्णुः—

'मृद्वारिकुसुमादीश्च फलकन्देक्षुमूलकान् ।
विण्मूत्रदूषितान्प्राश्य चरेत्कृच्छ्रं च पादतः ॥
सन्निकृष्टेऽर्द्धमेव स्यात्कृच्छ्रोऽप्यशुचिभोजने ।'

दूषितत्वमीषत्संसर्गः सन्निकृष्टत्वं महान्संसर्गः । इदं चाज्ञानतः सकृद्भक्षणे रसानुपलब्धौ च, ज्ञानतस्तु द्विगुणम् , अभ्यासे त्वावृत्तिः ।

रसोपलब्धौ तु कामतो व्यासः—

संसर्गदुष्टं यच्चान्यत्क्रियादुष्टं च कामतः ।
भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ॥'

अज्ञानतो रसोपलम्भे त्वर्द्धम् ।

संवर्तः—

'केशकीटावपन्नं च नीलीलाक्षोपघातितम् ।
स्नाय्वस्थिचर्मसंसृष्टं भुक्त्वा तूपवसेद्दिनम् ॥' इति ।

शातातपोऽपि—'केशकीटावपन्नरुधिरमांसास्पृश्यस्पृष्टभ्रूणघ्न्यवेक्षित-पतत्र्यवलीढश्वशूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषां भोजने उपवासः पञ्चगव्याशनं च' इति । एतदुभयमापद्यकामतः ।

यत्तु शङ्खः— (१७।४६)

'दूषितं केशकीटैश्च मार्जारैर्मूषकैस्तथा ।
मक्षिकामशकैश्चैव त्रिरात्रं तु व्रतं चरेत् ॥' इति;

तदनापदि कामतः ।

रजस्वलादिसंस्पर्शे तु शङ्खः— 'अमेध्यपतितचाण्डालपुष्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानि भुक्त्वाऽतिकृच्छ्रं चरेत्' इति ।

-कुणिर्हस्तविकलः । एतत्कामतः, अकामतोऽर्द्धम् ।

श्वादिस्पृष्टभोजने तु लघुविष्णुः—

'शूद्रदृष्टं शुना वाऽपि संस्पृष्टं प्राश्य भोजनम् ।
तप्तकृच्छ्रेण शुध्येत प्राजापत्येन वा पुनः ॥
शक्त्या पराको दातव्य इति धर्मस्य निश्चयः ॥

क्षत्रवैश्यादिकैर्दृष्टं गर्दभैः शूकरैस्तथा ।
पादहीनं चरेत्कृच्छ्रं शक्त्या सर्वं चरेद्द्विजः ॥ '

पाकोत्तरं केशकीटादिपाते तु प्रचेताः—

' अन्नं भोजनकाले तु मक्षिकाकेशदूषितम् ।
अनंतरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत् ॥ '

तेन सह पक्वं तु त्याज्यम् ।

' विशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः ।
केशरोमनखैर्वाऽपि दूषितं परिवर्जयेत् ॥ '

इति हारीतोक्तेः ।

चण्डालादिदृष्टे तु ब्रह्मपुराणे—

' चण्डालपतितामेध्यैः कुनखैः कुष्ठिना तथा ।
ब्रह्मप्रसूतिकोदक्याकौलेयककुटुम्बिभिः ॥
दुष्टं वा केशकीटार्क्तं मृद्वस्मकनकाम्बुभिः ।
शुद्धमद्यात्सहल्लेखं प्रदुष्टं व्युष्टमेव च ॥ ' इति ।

—कौलेयकः श्वा । कुटुंबी प्राणिविशेषः । सहल्लेखं विष्ठादिस्मारकम्। व्युष्टं पर्युषितम् । एतत्स्पृष्टभक्षणे तु ब्रह्मपुराणे—

' चण्डालपतितामेध्यैः कुनखैः कुष्ठिना तथा ।
उदक्यासूतिकास्पृष्टं भुक्त्वा मासं वने वसेत् ॥ ' इति ।

क्लीवादिदृष्टे तु शातातपः—

' क्लीवाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ।
दृष्टं नाद्यात्तदन्नं तु तस्य निष्कृतिरुच्यते ॥
तद्भुक्त्वोपवसेद्रात्रिं तत्स्पृष्टे तु चतुर्गुणम् ।
विचिकित्से षड्गुणं प्रोक्तमभ्यासेऽष्टगुणं भवेत् ॥ ' इति ।

१ माधवीये तु देवलः ।

२ कौलेयककुटुम्बी श्वपाल इति भाति । कुटुम्बी कृषीवलो वा, ' कृषीवलः कुटुम्बी स्यात् । ' (६।९) इति कल्पद्रुः ।

३ विचिकित्सा तु हृदये यस्मिन्नन्ने प्रजायते । सहल्लेखं तु विज्ञेयं पुरीषं तु स्वभावतः ॥ '—अप. ।

काकादिस्पृष्टमपवदति प्रायश्चित्तविवेके यमः-(व.ध.सू.१४।२२)

'देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च ।
काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत् ॥
अन्नं तन्मात्रमुद्धृत्य शेषं संस्कारमर्हति ।
घृतानां प्रोक्षणाच्छुद्धिर्द्रवाणामभिपातनात् ॥
संस्पर्शाच्च भवेच्छुद्धिरपामग्नेर्घृतस्य च ।
छागेन मुखसंस्पृष्टं शुचि चैव हि तद्भवेत् ॥'

यमः-'गुडादिद्रव्यसंयुक्तं वर्ज्यं पर्युषितं दधि ।
तथैव यावकादीनि मन्थादिरचितान्यपि ॥'

अत्र प्रायश्चित्तं ब्रह्मपुराणे-

'सगुडं न विशुद्धं च तथा पर्युषितं दधि ।
दीर्णं[2]तक्रमपेयं च नष्टस्वादं च फेनवत् ॥
प्रमादाद्भक्षितैरेभिर्वने पक्षव्रतं चरेत् ।
भुक्त्वा तु क्षारलवणं त्रिरात्रं तु वने वसेत् ॥'
'सगुडं मरिचाक्तं च वर्ज्यं पर्युषितं दधि ।'

-इति मदनः पाठः ।

अस्थ्यादिदूषितान्नाशने ब्रह्मपुराणे-

'अस्थ्ना तु दूषितं चान्नं भुञ्जानस्तु यदा भवेत् ।
स्नात्वाऽर्कमर्चयित्वा तु घृतं प्राश्य विशुद्ध्यति ॥' इति

शवदूषितजलपाने पराशरः-(११।४१-४५)

'कूपे च पतितं दृष्ट्वा श्वशृगालौ च मर्कटम् ।
अस्थिचर्मादिपतितं पीत्वाऽमेध्या अपो द्विजः ॥
नारं तु कुणपं काकं विड्वराहं खरोष्ट्रकम् ।
गावयं सौप्रतीकं च मायूरं खाड्गकं तथा ॥

---

१ 'देवद्रोणी देवयात्रा । प्रकृतेष्ववश्यम्भाविपर्वोत्सवेषु' । —कृष्णभट्टः । देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम् । स्मृ. .

२ दीर्णं स्फुटितम् । मा.

वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति ।
तडागस्याथ दुष्टस्य पीतं स्यादुदकं यदि ।
प्रायश्चित्तं भवेत्पुंसां क्रमेणैतेन सर्वशः ॥
विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात् ।
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति ॥'

–सुप्रतीको गजः । खड्गो मृगविशेषः । ऋक्षो भल्लूकः ।

हारीतः–(२१।३)

'क्लिन्ने भिन्ने शवे तोयं तत्रस्थं यदि तत्पिबेत् ।
शुद्ध्यै चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ॥' इति ।

तत्कामतोऽत्यन्ताभ्यासे, कामतो मानुषशवोपहतजलपानाभ्यासे वा। चान्द्रायणतप्तकृच्छ्रयोः शक्त्या व्यवस्था ।

शवदूषिते स्नानमात्रेऽपि हारीतः– (२१।४)

'यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः ।
जपंस्त्रिषवणस्नानादहोरात्रेण शुद्ध्यति ॥'

कामतो द्वैगुण्यादि कल्प्यम् ।

बृहद्विष्णुः— (२३।४४)

'जलाशयेष्वल्पेषु स्थावरेषु महीतले ।
कूपवत्कथिता शुद्धिर्महत्सु न तु दूषणम् ॥'

हारीतः–(११।३)

'वापीकूपतडागेषु दूषितेषु विशोधनम् ।
घटानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ॥' इति ।

अङ्गिराः–(११)

'कूपे विण्मूत्रसंसृष्टे पीत्वा तोयं द्विजोत्तमः ।
त्रिरात्रेण विशुद्ध्येत्तु कुम्भे सांतपनं स्मृतम् ॥'

अत्र गुणदुष्टाशने ।

तत्र स्मृतिः– (११।१५३)

---

१ कृच्छ्रं सान्तपनं कृत्वा त्रिरात्रेण विशुद्ध्यति । इति मुद्रितस्मृतौ । त्रिरात्रेणेत्यादि तु अत्रिस्मृतौ (७।२२)।

'शुक्तानि च कषायांश्च पीत्वा मेध्यानपि द्विजः।
तावद्व्रत्यप्रयतो यावत्तन्न व्रजत्यधः॥'

—शुक्तं यत्कालपरिवासमात्रेण, द्रव्यान्तरसंसर्गकालपरिवासाभ्यां वा अम्लीभवति।

अत्राकामतः 'शेषेषूपवसेद्दहः' (५।२०) इति मनूक्त उपवासः।

विष्णुरपि—(५१।३५) 'यवगोधूमजं पयोविकारं स्नेहाक्तं चुक्कुषानवं वर्जयित्वा पर्य्युषितं प्राश्योपवसेत्।'

—चुक्कुषानवं सूपशास्त्रोक्तो व्यञ्जनविशेषः।

कामतस्तु शङ्खः—(१७।३१)

'लोहितान्वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा।
केवलानि च शुक्तानि तथा पर्य्युषितं तु यत्।
ऋजीषपक्वं भुक्त्वा च त्रिरात्रं तु व्रती भवेत्॥' इति।

—ऋजीषं पिष्टपचनम्। एतच्चामलकादिफलयुक्ताच्छिकादिव्यतिरेकेण।

'कुण्डिका सफला येषु गृहेषु स्थापिता भवेत्।
तस्यास्तु कच्छिका ग्राह्या नेतरस्याः कदाचन॥'

इति मिताक्षरायां स्मरणात्।

दधि भक्ष्यं तु शुक्तेषु सर्वं च दधिसम्भवम्।
यानि चैवाभिपूयन्ते पुष्पमूलफलैः शुभैः॥' इति।

उद्धृतस्नेहादिषु तु गौतमः—(१।१९।५८) 'उद्धृतस्नेहविलयनपिण्याकमथितप्रभृतीनि चाऽऽत्तवीर्य्याणि नाश्नीयात्' इत्युक्त्वा 'प्राक्पञ्चनखेभ्यश्छर्दनं घृतप्राशनं च' (३।५।२६) इति।

---

१ शुक्तस्वरूपं बृहस्पतिनोक्तम्—'अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः।' इति। अनम्लमीषदम्लं वा यद्वस्तु कालान्तरेण द्रव्यान्तरसंसर्गेण वात्यम्लं भवति तच्छुक्तम्। न तु स्वभावतोऽत्यम्लम्। प. मा.

२ शुष्कखाण्डवमिति मूले माधवीये च।

३ उद्धृतस्नेहे उद्धृताम्रमण्डे दधिपयसी। विलयनं नवनीतमलम्। यन्त्रे पीडितानां तिलानां कल्कः पिण्याकम्। यस्य मथनमात्रं नाम्बुसंसर्गः, तद्दधि मथितम्। तच्च द्विविधम्—आत्तनवनीतमितरच्च। तत्राद्यस्येह ग्रहणम्—हरदत्तः।

पर्य्युषितापवादमाह याज्ञवल्क्यः—(१।१६९)

'अन्नं पर्य्युषितं भोज्यं स्नेहाक्तं चिरसम्भृतम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥'

अहुतान्नभोजने तु लिखित आह—

'यस्य चाग्नौ न क्रियते यस्य चाग्नं न दीयते ।
न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसेद्दहः ॥'

संवर्त्तः—(२९)

'शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥'

भिन्नापवादमाह देवलः—'ताम्ररजतसुवर्णाश्मशङ्खशुक्तिस्फटिकानां भिन्नमभिन्नमिति ।'

—भिन्नभाजनं च कांस्यमेव ।

'भिन्नकांस्ये तु योऽश्नीयान्न्यां स्नात्वा जपेद्द्विजः ।
गायत्र्यष्टसहस्रं तु एकभक्तस्तदा शुचिः ॥'

इति बौधायनोक्तेः । एतच्च ज्ञानतः ।

अज्ञानतस्तु पराशरः—

'भिन्नभाण्डे तु भुञ्जानो ह्यज्ञानेन द्विजोत्तमः ।
सुवर्णोदकसंस्पृष्टं घृतं प्राश्य विशुध्यति ॥'

मिताक्षरायां स्मृत्यन्तरे—

'वटार्कश्वित्थपत्रेषु कुम्भीतिन्दुकपत्रयोः ।
कोविदारकदम्बेषु भुक्त्वा चांद्रायणं चरेत् ॥'

तथा—

'पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् ।
वानप्रस्थो यतिश्चैव लभते चांद्रकं फलम् ॥'

(व्या. स्मृ. ३।६३)

—पलाशो वल्लीपलाश इति स्मृत्यर्थसारे हेमाद्रौ च ।[1]

---

[1] पारिजाते—'वल्लीपलाशपत्रे च स्थलजे पौष्करे तथा । गृहस्थश्चेत्तु नाश्नीयाद्भुक्त्वा चान्द्रायणं चरेत्'—एतेन ब्रह्मचारियतीनां वल्लीपलाशस्थलपद्मपत्रेऽपि भोजनमनिषिद्धं भवति । भो. कु. ।

अथ कालदुष्टाशने ।

ब्रह्मपुराणे-

'सूतके मृतके वाऽपि ग्रस्तयोश्चन्द्रसूर्ययोः ।
छायायां कुञ्जरस्याथ भुक्त्वा तु नरकं व्रजेत् ॥
भुक्त्वा प्रमादाद्विप्रस्तु सम्यक् चांद्रायणं चरेत् ।'

यत्तु षट्त्रिंशन्मते-

'चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति ।'

इति; तदकामतः ।

बृहन्नारदीये- (२९।५६)

'अर्केऽह्नि पर्वरात्रौ च चतुर्दश्यष्टमी दिवा ।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥'

ग्रहणसन्निहितनिषिद्धकाले अज्ञानतो भोजने तु चंद्रसूर्यग्रहं प्रकृत्य षट्त्रिंशन्मते—

'तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्धयति ।' इति ।

प्रायश्चित्तविवेके संवर्तः—

'अपोशानमकृत्वा तु यो भुंक्तेऽनापदि द्विजः ।
भुञ्जानस्तु यदा ब्रूयाद्गायत्र्यष्टशतं जपेत् ॥'

—अष्टशतमष्टोत्तरशतम् ।

स एव- (१४)

'अनाचान्तः पिबेद्यस्तु भक्षयेद्वापि किञ्चन ।
गायत्र्यष्टसहस्रं तु जप्यं कृत्वा विशुध्यति ॥'

लघुहारीतः- (२१)

'विना यज्ञोपवीतेन भुंक्ते च ब्राह्मणो यदि ।
स्नानं कृत्वा जपं चैव उपवासेन शुद्धयति ॥'

ब्रह्मपुराणे—

'रेतोमूत्रपुरीषाणामुत्सर्गश्चेत्प्रमादतः ।
तदादौ तु प्रकर्तव्या तेन शुद्धिर्मृदंबुभिः ॥
पश्चादाचम्य तु जले जप्तव्यमघमर्षणम् ।'

—एतदनगीर्णग्रासेन ।

सकृन्निगीर्णग्रासे तु आपस्तंबः– (९।१–२)

'भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम् ।
उच्छिष्टमशुचित्वं च प्रायश्चित्तं कथं भवेत् ॥
आदौ कृत्वा तु वै शौचं ततः पश्चादुपस्पृशेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्धयति ॥ '

यत्तु शातातपः—(बृ. शा. १३)

' मूत्रोच्चारसमुत्सर्गं मोहाद्भुंक्तेऽथ वा पिबेत् ।
त्रिरात्रं तत्र कुर्वीत इति शातातपोऽब्रवीत् ॥ ' इति ।

तद्भूयो ग्रासाशने ।

आपस्तम्बः— (९।३७)

' मूत्रोचारं सकृत्कृत्वा अकृत्वा शौचमात्मनः ।
मोहाद्भुक्त्वा त्रिरात्रं तु यवान्पीत्वा विशुध्यति ॥ ' इति ।

–मूत्रपदं पुरीषादेरुपलक्षणम् ।

शातातपः– (बृ. शा. १६)

' अथ भोजनकाले चेदशुचिर्भवति द्विजः ।
भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुद्धयति ॥
भक्षयित्वा तु तं ग्रासमहोरात्रेण शुद्धयति ।
अशित्वा सर्वमन्नं तु त्रिरात्रेण विशुध्यति ॥ ' इति ।

तैलाभ्यङ्गादिना स्नाननिमित्ते अकृतस्नानस्य संवर्तः–

' समुत्पन्ने द्विजः स्नाने भुञ्जीताथ पिबेत्तथा ।
गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः ॥ '

अष्टसहस्रमष्टाधिकसहस्रम् । एतच्च सकृत् ।

अभ्यासे शङ्खः– (१७।९०)

' नीलं वस्त्रं परीधाय मुक्त्वा स्नानार्हको भवेत् ।
त्रिरात्रं तु व्रतं कुर्याच्छित्वा गुल्मलतां तथा ॥ ' इति ।

क्रतुः–' आसनारूढपादो वा वस्त्रार्द्धप्रावृतोऽपि वा ।
मुखेन धमितं भुक्त्वा कृच्छ्रं सांतपनं चरेत् ॥ ' इति ।

---

१ गव्यम् । मू. ' बुद्ध्वा सान्तपनं चरेत् ' (शा. स्मृ. २।६।४) ।

एवमेव स्थितप्रव्हगच्छच्छयानैरन्नभोजने एकाहत्र्यहादीन्यभक्ष्य-भक्षणप्रायश्चित्तानि योजनीयानि ।

पराशरः– (६।६५-६६)

' भुञ्जानश्चैव यो विप्रः पादं हस्तेन संस्पृशेत् ।
स्वमुच्छिष्टमसौ भुंक्ते यो भुंक्ते भुक्तभाजने ॥
पादुकास्थो न भुञ्जीत पर्यंकस्थः स्थितोऽपि वा ।
श्वानचंडालदृष्टौ च भोजनं परिवर्जयेत् ॥ ' इति ।

इति कर्तृदुष्टाशने प्रायश्चित्तम् ।

अथ वाग्दुष्टभावदुष्टाशने ।

ब्रह्मपुराणे–

' भक्ष्यं त्वभक्ष्यवाक्येन यो दद्याद्रोषधर्मतः ।
गुरोरपि न भोक्तव्यं वाग्दुष्टं तन्महाघकृत् ॥ ' इति ।

यत्र वर्णाकारादिनाऽभक्ष्यबुद्धिर्विषादिशंका वा जायते, तद्भावदुष्टम् ।

तत्राकामतः सकृद्भक्षणे भावदुष्टादि प्रकृत्य गौतमः–(३।५।२६) ' छर्दनं घृतप्राशनं च ' इति ।

कामतस्तु शंखः– (१७।९२)

' वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते ।
भुक्त्वाऽन्नं ब्राह्मणः पश्चात्त्रिरात्रं तु व्रती भवेत् ॥ ' इति ।

हारीतः– (१३।२-३)

' शंकितं प्रतिषिद्धान्नं विद्विष्टान्नमथापि वा ।
यदि भुंजीत विप्रो यः प्रायश्चित्तं कथं भवेत् ।
एकरात्रोपवासश्च गायत्र्यष्टशतं जपेत् ।
प्राशयेत्पंचभिर्मंत्रैः पंचगव्यं पृथक्पृथक् ॥ ' इति ।

इति सुरापानप्रसक्तानुप्रसक्तप्रायश्चित्तम् ।

---

१ प्रायश्चित्तं चोक्तं चतुर्विंशतिमते— ' स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते भुक्तभाजने । एवं वैवस्वते प्राह भुक्त्वा चान्द्रायणं चरेत् ॥ ' विद्वन्मनोहरा (६।६६) ।

अथ सुवर्णस्तेये ।

आपस्तंबः– 'ब्राह्मणसुवर्णापहरणं महापातकम् ।' इति ।

'ते सुवर्णस्तु षोडश' (१।३६३) इति याज्ञवल्क्योक्तेः सुवर्णशब्दः षोडशमाषोन्मितहेमवचनः। एवं चैतोन्यूनहरणे न महापातकम् ।

प्रायश्चित्तमाह याज्ञवल्क्यः–(३।२५८)

'अनिवेद्य नृपे शुद्ध्येत्सुरापव्रतमाचरन् ।' इति ।

—सुरापव्रतं द्वादशाब्दम् ।

सुवर्णस्तेयानुवृत्तौ 'महाव्रतं वा द्वादशाब्दानि कुर्यात्' इति कल्पतरौ विष्णूक्तेः (५२।३)। 'द्वादशभिर्वर्षैर्महापातकिनः पूयंते' इति हारीतोक्तेश्च ।

युगपदनेकसुवर्णहरणेऽप्येकमेव प्रायश्चित्तं नावृत्तिः; हरणक्रियाया एकत्वात् । ब्रह्मवधादौ तु हननक्रियाभेदादावृत्तमेव प्रायश्चित्तम् ।

प्रायश्चित्तांतरे आह स एव– (याज्ञ. ३।२५८ क. रघु. ८।६)

'आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत् ।'

अत्रात्मसमस्वर्णदानं धनवद्विषयम्, तत्राशक्तस्तु विप्रतुष्टिकृत्सुवर्णं दद्यात् ।

---

१ स्तेयं लक्षितं नारदेन-(१४।१६) 'उपायैर्विविधैरेषां छलयित्वापकर्षणम् । सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः ' ॥ इति ।

शूलपाणिस्तु– 'परस्वत्वेन विशेषतो ज्ञायमाने द्रव्ये परानुमतिमन्तरेण ममेदं यथेष्टं विनियोज्यमिति कृत्वा व्यवहारः स्तेयम् । एवं वस्त्रापहारे तदञ्चलबन्धस्याविज्ञातस्य सुवर्णस्य नापहारः, अज्ञातत्वात् । यत्रासुवर्णस्य सुवर्णबुद्ध्यापहारस्तत्र सुवर्णस्य नापहारः, सुवर्णस्य यथेष्टविनियोज्यत्वेन व्यवहारकर्मत्वाभावात् । यत्र सुवर्णमेव पारदरसोपलिप्तत्वेन सीसकबुद्ध्यापहरति, तत्र परस्येदमिति जानत एव पुरुषस्य सुवर्णं विनियोगसङ्कल्पविषयः, अतः स्तेयमिति; किन्तु सुवर्णजात्यज्ञानादज्ञानकृतं तत्, अतो न तत्र प्राणान्तिकमिति ॥

तथा–सुवर्णस्तेयपदे समस्ते समस्ते सत्यपि लिङ्गसन्देहे संज्ञाविधिसार्थक्वाय परिमितहेमधीः पुंलिङ्गधीरपि, अतः परिमितहेमापहारो महापातकं, न जातिमात्रापहार—इति प्रतिपादयामास ।

यत्तु व्यासः—

'एतदेव व्रतं स्तेनः पादन्यूनं समाचरेत्।'

इति; तन्निर्गुणस्वामिकसुवर्णापहारविषयमिति निबन्धकृतः। वयं तु—पादोनसुवर्णापहारविषयमिति प्रतीमः।

यदप्यपरार्के—

'त्रिः षडब्दं चरेत्कृच्छ्रं यजेद्वा क्रतुना द्विजः।
तीर्थानि वा भ्रमन् विप्रस्ततः स्तेयाद्विमुच्यते॥'

इति, तत् क्षुत्क्षामकुटुम्बभरणाय निर्गुणस्वामिकसुवर्णापहारविषयमिति केचित्। युक्तं तु—पूर्वरीत्याऽर्द्धसुवर्णापहारविषयत्वम्, साम्यादिदेशविषयीभूताश्वरत्नाद्यपहारविषयत्वं वा। क्रतुरत्र स्वर्जिदादिः। तीर्थभ्रमणं चाशीत्यधिकशतयोजनगमनं द्रष्टव्यम्।

यत्त्वापस्तम्बः—(१।२५।११)

'स्तेयं कृत्वा सुरां पीत्वा गुरुतल्पं च गत्वा ब्रह्महत्यामकृत्वा।
चतुर्थकालमितभोजनाः स्युरपोऽभ्युपेयुः सवनानुकल्पम्।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरपपापं नुदन्ति॥' इति;

यदप्यङ्गिराः—

'महापातकसंयुक्ता वर्षैः शुद्ध्यन्ति ते त्रिभिः।' इति;

तदुभयं यदापहारोत्तरमेवानुतापेन स्वामिने प्रत्यर्पयति तद्विषयमिति प्राञ्चः। अन्ये तु—सुवर्णचतुर्थांशापहारविषयत्वमाहुः। वस्तुतः—सगुणविप्रस्य निर्गुणविप्रस्वामिकसुवर्णापहारविषयत्वं युक्तम्।

तथा च भविष्ये—

'विप्रस्य गुणवान्विप्रो निर्गुणस्यापहृत्य च।
चतुर्थकाले भुञ्जानस्त्रिभिर्वर्षैर्व्यपोहति॥' इति।

विषयान्तरमप्युक्तं तत्रैव—

'यदा च निर्गुणः स्वामी क्षत्रियो वैश्य एव च।
हृत्वा च ब्राह्मणो वीर! तदापस्तम्बभाषितम्॥'

तत्रैव—'क्षत्रियस्य गुणाढ्यस्य हृत्वा विप्रस्तु निर्गुणः।
चतुर्थकाले भुञ्जानस्त्रिभिर्वर्षैर्व्यपोहति॥' इति।

इदं च वाक्यद्वयं न्यूनाधिकपरिमाणविषयत्वादविरुद्धम्।

यत्तु सुमन्तुः— 'सुवर्णस्तेयी मासं सावित्र्याऽष्टसहस्रमाज्याहुतीर्जुहुयात्प्रत्यहं त्रिरात्रमुपवासस्तप्तकृच्छ्रेण च पूतो भवति' इति;

यच्चापस्तम्बः– (१।२५) 'स्तेयं कृत्वा सुरां पीत्वा' 'संवत्सरं चरेत्' इति; तत्सुवर्णद्वादशभागापहारविषयम्।

यत्तु सुमन्तुः— 'सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवति' इति; तन्मानसापहारविषयमिति प्राञ्चः। निष्फलकामिकप्रवृत्तिविषयत्व तु सम्यक्।

मिताक्षरायाम्–(३।२।५८) 'इदं मनसि पापं ध्यात्वा प्रणवपूर्वा व्याहृतीर्मनसा जपेत्। व्याहृत्य प्राणायामं त्रिरात्रं चरेत्। प्रवृत्तौ कृच्छ्रं द्वादशरात्रं चरेत्' इति।

—व्याहृत्याभिलप्य।

षट्त्रिंशन्मते—

'यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयम्॥
सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः।
कुर्यात्सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तये॥
अपहृत्य सुवर्णस्य माषमात्रं द्विजाधमः।
गोमूत्रयावकाहारस्त्रिभिर्मासैर्व्यपोहति॥' इति।

'सुवर्णस्यापहरणे वत्सरं यावकी भवेत्।
ऊर्ध्वं प्राणान्तिकं ज्ञेयमथ वा ब्रह्महव्रतम्॥'

वत्सरमिति सुवर्णपरिमाणद्वादशांशमाषाधिकहेमविषयम्। प्राणान्तिकं तु ज्ञानपूर्वकापहारविषयम्। अज्ञानतस्तु द्वादशाब्दं विप्रस्य।

यत्तु भवदेवः—

'विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतम्।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते॥'

इति विष्णूक्तेः 'क्षत्रियादेः पादपादहानिः' इति; तदयुक्तम्, द्विविधं हि स्तेयम्–बलावष्टम्भेन क्रियमाणं साहसाख्यमेकम्, अपरं च चौर्यम्। तत्राद्ये पादोनादिबाधकेन चतुर्विधसाहसविषयेण 'षष्ठ्या ब्राह्मणानां' इत्यङ्गिरोवचसोक्तस्य द्वैगुण्यस्यैव न्याय्यत्वात्, द्वितीयेऽपि विप्रस्वामिकसुवर्णस्य 'देवब्राह्मणराज्ञां तु विज्ञेयं द्रव्यमुत्तमम्'(१४।१६)

इति नारदेनोत्तमद्रव्यतोक्तेस्तत्र च दण्डभूयस्त्वात्, तथा 'गोषु ब्राह्मणसंस्थासु' (मनुः ८।३२५) इत्यनेन विप्रस्वामिकगोवधे दण्डगौरवात्, 'विदुषोऽतिक्रमे दण्डभूयस्त्वम्' इति वचनाच्चात्रापि क्षत्रियादीनां प्रायश्चित्ताधिक्यमेवोचितं; न तु पादन्यूनमिति ।

कामतः सुवर्णस्तेये तु याज्ञवल्क्यः—(३।२५७)

'ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽथ वा शुचिः ॥'

—मुक्तः प्रहृतोऽपि जीवन्न त्वप्रहृत एवेत्यर्थः । 'अन्नेनस्वी राजा' (२।३।४२) इति गौतमेनाप्रहारे राज्ञो दोषोक्तेः ।

'ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयम् ।
यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यते ॥' (१२१)

इति संवर्ताच्च । एतेन 'स्तेनपोष्याणां बहूनां मृतिसम्भावनायाम-प्रहृतोऽपि जीवन् शुद्धः' इति माधवोक्तिरपास्ता । मानाभावाच्च ।

भविष्ये—

'महत्यपहृते पुत्र ! तथाल्पे वा हृते गुह ! ।
हृतद्रव्यविशेषाद्वै स्वामिनस्तस्करस्य च ॥
प्रयोजनविशेषाच्च विशेषाद्देशकालयोः ।
अनुबन्धविशेषाच्च प्रायश्चित्तं प्रकल्पयेत् ॥'

तत्रैव—

'यद्यस्यापहृतं द्रव्यं तत्तस्यैव विनिर्दिशेत् ।
प्रायश्चित्तं ततः कुर्यादेवं शुद्धिमवाप्नुयात् ॥'

विष्णुः—(५२।१४)

'दत्त्वैवापहृतं द्रव्यं धनिकस्याभ्युपायतः ।
प्रायश्चित्तं ततः कुर्यात्कलमषस्यापनुत्तये ॥'

---

१ क्षुद्रमध्यमहद्द्रव्याण्युक्तानि नारदेन—(१४।१३-१५) मृद्भाण्डासन-खट्वास्थिदारुचर्मतृणादि यत् । फलं चान्यकृतान्नं च क्षुद्रद्रव्यमुदाहृतम् । मध्यम-द्रव्यस्य वक्ष्यते । उत्तमस्य तूक्तमेव ।

अत्र विशेषमाह मनुः- (११।१६४)

'चरेत्सान्तपनं कृच्छ्रं तन्निर्य्यात्यात्मशुद्धये ।' इति ।

तद्द्रव्यं निर्यात्य स्वामिने दत्वा शुद्धये प्रायश्चित्तयोग्यत्वार्थमित्यर्थः ।

अत एव भविष्ये-

'तन्निर्य्यात्येति वाक्यं तु प्रवदन्ति मनीषिणः ।
तत्पूर्वं चैव योग्यस्य सूचकं नात्र संशयः ॥'

-तत्पूर्वं प्रातिस्विकप्रायश्चित्तात् पूर्वम् । योग्यस्येति भावप्रधानो निर्देशः, योग्यत्वस्येत्यर्थः । केचित्तु- सुवर्णपरिमाणादूनं चोरितं धनं स्वामिने दत्वा स्वशुद्धये सान्तपनकृच्छ्रं कुर्यादिति मानवीयस्यार्थः । तच्छब्देन सुवर्णमितं पूर्वं ततो न्यूनं योग्यस्य शुद्धेः कारकमिति तु भविष्यस्यार्थं इत्याहुः । सुवर्णस्तेये तु एकादशांशाधिकं चोरितं धनं स्वामिने देयम् ।

तथा च मिताक्षरायाम्-

'स्तेये ब्रह्मस्वभूतस्य सुवर्णादेः कृते पुनः ।
स्वामिनेऽपहृतं देयं हर्त्रा त्वेकादशाधिकम् ॥'

लघुविष्णुः—

'स्तेये ब्रह्मस्वभूते तु सुवर्णहरणे कृते ।
पश्चात्तेनैव दातव्यं तस्मै ह्येकादशाधिकम् ।
गुणसंशुद्धिभावाय ततश्चांद्रायणत्रयम् ।
संवत्सरेण दातव्यं निपुणां शुद्धिमिच्छता ॥
अभावे कांचनस्य स्याद्धृतमेतच्चतुर्गुणम् ।
चरेद्यतात्मा निःसंगः पूर्णे वर्षेचतुष्टयम् ॥
समाप्ते कांचनं गाश्च रजतं चापि शक्तितः ।
देयमेतद्द्विजाग्र्येभ्यः शुभं पापोपशांतये ॥' इति ।

-गुणसंशुद्धिरात्मशुद्धिः । चांद्रायणत्रयमिति यवमध्यादीनि त्रीणि चांद्रायणानि वत्सरमभ्यसेदित्यर्थः । इदं च दोषप्रायश्चित्तादिकं रसवेधापादितसुवर्णसादृश्ये ताम्रादौ न भवति; सुवर्णत्वजातिसमवायाभावात् ।

अथ सुवर्णस्तेयसमेषु मनुः—(११।५७)

'निक्षेपस्यापहरणं नराश्वरजतस्य च ।
भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम् ॥'

स्मृत्यंतरे– (मनुः ८।३२३)

'पुरुषाणां कुलीनानां नारीणां च विशेषतः ।
मुख्यानां चैव रत्नानां हरणे वधमर्हति ॥ '

याज्ञवल्क्यः– (३।२३०)

'अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निक्षेपस्य च सर्वस्य सुवर्णस्तेयसंमितम् ॥ '

मनुष्यग्रहणेनैव सिद्धे स्त्रीपदं षंढव्यावृत्यर्थम् ।

विष्णुः–(३६।३) 'ब्राह्मणभूहरणं सुवर्णस्तेयसमम् । ' इति ।

अत्र षडब्दमित्युक्तं परिभाषायाम् (पृ. १४) ।

अल्पमूल्यरत्नादौ तु चतुर्विंशतिमते–

'रत्नानां हरणे विप्रश्चरेच्चांद्रायणत्रयम् । ' इति ।

मनुरपि– (११।१६७)

'मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च ।
अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥ '

स एव— (११।१६३)

'मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च ।
वापीकूपतडागानां शुद्धिश्चांद्रायणं स्मृतम् ॥ ' इति ।

–मनुष्यो दासः । स्त्री दासी ।

स्मृत्यंतरे—

'रूप्यं हृत्वा द्विजो मोहाच्चरेच्चांद्रायणव्रतम् ।
गद्याणदशकादूर्ध्वमाशताद्द्विगुणं चरेत् ॥
आसहस्राच्च त्रिगुणमूर्ध्वं हेमविधिः स्मृतः । ' इति ।

–गद्याणो गुर्जरदेशे प्रसिद्धः । रत्नताम्रायःकांस्यमनुष्यापहारेष्वपि प्रायश्चित्तेयत्तार्थमियमेव मूल्येयत्ता ज्ञेया ।

मनुः—(११।१६२)

'धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः ।
सजातीयगृहादेव कृच्छ्राब्देन विशुद्ध्यति ॥ ' इति ।

---

१ चतुर्विंशतिमते. भि.

स्मृत्यंतरे–'अष्टापद्यं स्तेयकिल्बिषं शूद्रस्य, द्विगुणोत्तराणीतरेषाम्' इति ।

–किल्बिषं दंडः । स शूद्रस्यापह्रियमाणद्रव्याद्दष्टगुणः । विट्क्षत्रविप्राणां तु षोडशद्वात्रिंशचतुःषष्टिगुणं इत्यर्थः ।

अत एव मनुः—(८।३३८)

'अष्टापद्यं हि शूद्रस्य स्तेये भवति किल्बिषम् ।
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु ॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वाऽपि शतं भवेत् ।'

शंखः—(१७।१५)

'तथा धनस्यापहारे मणीनां रजतस्य च ।
धान्यापहरणे चैव कुर्यात्संवत्सरं व्रतम् ॥' इति ।

इदं च दशकुंभधान्ये तन्मूल्ये च धनादावपहृते ज्ञेयम् ।

'धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वधः ।'
(८।३२१) इति मनूक्तेः ।

कुंभमाह कात्यायनः—

'दशद्रोणा भवेत्खारी कुंभोऽपि द्रोणविंशतिः ।' इति ।

द्रोणस्तु—

'पलं च कुडवः प्रस्थ आढको द्रोण एव च
धान्यमानेषु विज्ञेयाः क्रमशोऽमी चतुर्गुणाः ॥'

इत्येवं क्रमाज्ज्ञेयः ।

यत्तु जाबालः—

'यवान्नमौषधं तैलं शय्यावास उपानहौ ।
कांस्यायस्ताम्रसीसं वा अर्द्धं कृच्छ्रार्द्धमेव च ॥
उदके फलमूलेषु पुष्पपर्णसुगंधिषु ।
मृद्भांडमधुमांसेषु संतोष्य स्वामिनं ततः ॥
पापं निवेद्य विप्रेभ्यः प्रायश्चित्तेन युज्यते ।' इति ।

कृच्छ्रार्द्धं पादमित्यर्थः । तदधिकपरिमाणगुडादिविषयम् ।

जाबालः—

'मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥' इति।

द्वादशगुणप्रायश्चित्तदर्शनात् तन्मूल्याद्द्वादशगुणमूल्यमणिमुक्ताद्यपहार इदम्।

यत्तु विष्णुः—'रजताश्वगोभूमिकन्यानां सकृद्धरणे चांद्रायणम्।' इति; तत्किंचिदधिकविषयम्।

मनुः—(११।१६८)

'कार्पासकीटजोर्णानां द्विशफैकशफस्य च।
पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ॥' इति।

—कीटजाः पट्टादयः।

देवद्रव्यापहारे सुमंतुः—'देवद्विजद्रव्यहृत्ताऽप्सु निमग्नोऽघमर्षणमावर्त्तयेत्' इति। अत्र संवत्सरप्रक्रमात्तावत्कालीनावृत्तिर्ज्ञेया।

स्तेयप्रसंगाद्वृत्युच्छेदे प्रायश्चित्तमाह शंखः—(१७।१३–१४)

'यस्य यस्य तु वर्णस्य वृत्युच्छेदं समाचरेत्।
तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं समाचरेत्॥
अपहृत्य तु वर्णानां विप्रो भूमिं प्रमादतः।
प्रायश्चित्तं वधे प्रोक्तं ब्राह्मणानुमते चरेत्॥' इति।

—एतच्च वृत्त्यर्हभूम्यपहारे ज्ञेयम्। अत्र चापहारशब्दस्य लाइज्ञानपूर्वं परस्वादानवाचित्वात्प्रमादत इति शास्त्रार्थपरिज्ञानपरम्। अत्रोभयत्र वधनिमित्तकप्रायश्चित्तातिदेशात्पादोनम्। तच्च[1] कामे कामोक्तस्य, अकामे त्वकामस्योक्तेति।

स्तेयापवादमाह शंखः—

'अस्तेयमग्नये काष्ठमस्तेयं च तृणं गवे।
कन्याहरणमस्तेयं यो हरत्यनलंकृताम्॥' इति।

कन्याहरणं राक्षसविवाहपरम्।

---

१ तच्च कलियुगातिरिक्तयुगे बोध्यम्, कलौ तन्निषेधात्। प्रा. मु.

मनुरपि– (८।३४२)

'द्विजोऽध्वगः क्षीणवृत्तिर्द्वौ विल्वे द्वे च मूलके ।
आददानः परक्षेत्रान्न दंडं दातुमर्हति ॥ '

तथा–

'चणकव्रीहिगोधूमयवानां मुद्गमाषयोः ।
अनिषिद्धैर्गृहीतव्यो मुष्टिरेकः पथि स्थितैः ॥
तथैव सप्तमे भक्ते भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्त्तव्यं हीनकर्मणः ॥' (म. ११।१६)इति ।

इति भट्टनीलकण्ठकृते प्रायश्चित्तमयूखे स्तेयप्रायश्चित्तानि ।

अथागम्यागमनप्रायश्चित्तानि ।

तत्र गुरुतल्पे शङ्खः– (१७।१–३)

'अधःशायी जटाधारी पर्णमूलफलाशनः ।
एककालं समश्नन्वै वर्षे तु द्वादशे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुद्ध्यन्ति महापातकिनस्त्विमे ॥ ' इति ।

–गुरुतल्पगो गुरुभार्यागामी । गुरुः पिता ।

अत एव संवर्त्तः– (१६५)

'पितृदारान्समारुह्य मातृवर्ज्जं नराधमः ।
भगिनीं च निजां गत्वा निष्कृतिर्न विधीयते ॥ ' इति ।

– निष्कृतिर्व्रतरूपा । मरणरूपा त्वस्त्येव,

'पितृभार्यां तु विज्ञाय मातृवर्ज्जं नराधमः ।
जननीं वाऽप्यविज्ञाय नामृतः शुद्धिमाप्नुयात् ' ॥

इति षट्त्रिंशन्मतात् ।

अत्र जननीगमनं न महापातकं किन्त्वतिपातकम् । 'मातृगमनं दुहितृगमनं स्नुषागमनम् ' इत्यतिपातकानि । इति विष्णूक्तेः (३४।१); ' मातृ-दुहितृ-भगिनी-स्नुषागमनान्यतिपातकानि ' इति भवदेवीये वृद्धहारीतोक्तेश्च ।

– एतेन गुरुश्चासावङ्गनेति कर्मधारयेण 'जननीगमनं महापापम् ' इति भवदेवोक्तिरपास्ता ।

यत्तु शूलपाणिः—

'आचार्यस्तु पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ ॥
वर्णश्रेष्ठः पितृव्यश्च पुंस्येते गुरवो मताः।'

इति देवलोक्तेः; 'आचार्यः श्रेष्ठो गुरूणाम्' इति गौतमोक्तेः (१।२।५६); 'त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिता आचार्यश्च' (३१।१–२) इति विष्णूक्तेश्चाचार्यादिपत्नीगमनमपि महापापमित्याह; तन्न;

'आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।' (याज्ञ.३।२३३)

इत्याचार्यादिपत्नीषु गुरुतल्पातिदेशविरोधात्। न चातिदेशो हीनवर्णपत्नीपरः, मानाभावात्। देवलादिवचांसि त्वाचार्यादीनां पूज्यत्वपराणि। कथं च 'गुरोश्चालीकनिर्बंधः' (म. ११।५५) इत्यत्र गुरुपदं केवलपितृपरम्, अत्र त्वाचार्यादिपरमिति विरुद्धं शूलपाणेर्वचः श्रद्धेयम्?

प्रायश्चित्तान्तरमाहाङ्गिराः– (६।१३)

'महाव्रतं चरेद्वाऽपि दद्यात्सर्वस्वमेव वा।' इति।

व्यभिचारितायां सवर्णायां मातरि सकृद्गमने तु योगी–(३।२६०)

'चान्द्रायणं वा त्रीन्मासानभ्यसन्वेदसंहिताम्।' इति।

गर्भोत्पत्तौ तु एतान्येव प्रायश्चित्तानि द्विगुणानि।

'गमने यद्व्रतं प्रोक्तं गर्भे तद्विगुणं भवेत्।' (१।३७)

इत्युशनोवाक्यात् गमनावृत्तावपि प्रायश्चित्तावृत्तिः।

कामतो जनन्यतिरिक्तगुरुभार्यागमने तु याज्ञवल्क्यः— (३।२५९)

'तप्तेऽयःशयने सार्द्धमायस्या योषिता स्वपेत्।'

–तप्ते शरीरदाहक्षमे।

मनुरपि—(११।१०४)

'स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ।
नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मगः॥' इति।

–आतिष्ठेदुच्छेत्। निपातो मरणम्। अयमेव च दंडः,

'आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्त्तनात्तत्र नान्यो दंडो विधीयते ॥'

(१२।७५) इति नारदोक्तेः ।

जनन्यामकामतोऽपि गमने एतदेव मरणांतं प्रायश्चित्तद्वयं बोध्यम् ।

जनन्यां कामतस्तु वसिष्ठः—(२०।४६) 'निष्कालको[1] वा घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेत्' इति । अभ्यासे गर्भोत्पत्तौ चेदमेव, अन्यानुक्तेः । एतानि च प्रायश्चित्तान्यौरसपुत्रस्यैव । दत्तकादीनां न्यूनं कल्प्यमिति निबंधकृतः । जनन्यां कामतः प्रवृत्तस्य रेतःसेकादर्वाङ्निवृत्तौ द्वादशाब्दम् । अकामतः षडब्दम् । तत्सपत्न्यां कामतः षडब्दम् । अकामतस्तदर्द्धमित्यादि कल्प्यम् ।

शूद्रस्य विप्रागमने तु प्रचेताः—

'शूद्रस्य ब्राह्मणीं मोहाद्गच्छतः शुद्धिमिच्छतः ।
पूर्णमेव व्रतं देयं माता यस्माद्धि तस्य सा ॥'

इति गुरूपभुक्तास्वपि साधारणस्त्रीषु गमने गुरुतल्पदोषो नास्तीत्याह व्याघ्रपादः—

'जात्युक्तं पारदार्य्यं च कन्यादूषणमेव च ।
साधारणस्त्रियो नास्ति गुरुतल्पत्वमेव च ॥' इति ।

—साधारणस्त्री वेश्या ।

अथ भगिन्यादिगमने मनुः—(११।५८)

'रेतःसेकः कुमारीषु स्वयोनिष्वंत्यजासु च ।
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥' इति ।

—स्वयोनिर्भगिनी । कुमारी उत्तमजातीया कन्या ।

'सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः ।
दूषणे तु करच्छेद उत्तमायां वधस्तथा ॥' (या.२।२८८)

इति तत्रैव दंडविशेषोक्तेः ।

---

१ के शिरस्यवस्थिता अलकाः केशाः कालकाः । निर्गताः कालकाः यस्मादसौ निष्कालकः, मुण्डितशिरा इत्यर्थः—मा. । निष्कालक इति निर्गतकेशश्मश्रुलोमाभिधीयते ।—मि. ।

याज्ञवल्क्यः—(३।२३१)

'सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च ।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ॥' इति ।

अन्त्यावसायिन आह मध्यमांगिराः—

'चंडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मगधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ॥' इति ।

चंडालादीनाह याज्ञवल्क्यः—(१।९३–९४)

'ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ।
शूद्राज्जातस्तु चांडालः सर्वधर्मबहिष्कृतः ॥
क्षत्रिया मागधं वैश्या शूद्रात्क्षत्तारमेव च ।
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥' इति ।

विष्णुः—(३६।४–६) 'पितृव्यमातामहमातुलपत्न्यभिगमनं गुरुदारगमनसमम् । पितृष्वसृमातृष्वसृस्वसृगमनं श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च' इति । अत्र साम्यातिदेशादर्द्धं प्रायश्चित्तमित्युक्तं परिभाषायाम् (पृ. १४ पं. ४) ।

याज्ञवल्क्यः (३।२३२,२३३)

'पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि ।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।' इति ।

मातुः सपत्नी हीनवर्णा; समोत्तमवर्णागमनस्य गुरुतल्पत्वोक्तेः ।

नारदः—(१२।७३–७५)

'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता ।

---

१ श्वपचस्तूक्तः सूतसंहितायाम्—'द्विजोत्तमायां चण्डालाद्यः पुमाञ्जायते भुवि । श्वपचः स तु विज्ञेयः सर्वशास्त्रविशारदैः ॥' (१।१२।३६) इति

राज्ञी प्रव्रजिता साध्वी धात्री वर्णोत्तमा च या ॥
आसामन्यतमा गच्छन्गुरुतल्पग उच्यते ।' इति ।

—राज्ञी अभिषिक्तक्षत्रियपत्नी । क्षत्रियांतरपत्न्यां लघुप्रायश्चित्तस्य वक्ष्यमाणत्वात् । मातृग्रहणं दृष्टान्तार्थम् । अत्र च तादृप्यातिदेशेऽतिदिश्यमानं प्रायश्चित्तं पादोनं भवतीति व्युदपादि परिभाषायामेव (पृ. १४ पं. ४) । तच्चाकामत एकरात्रादूर्ध्वं अत्यन्ताभ्यासविषयम् ।

अत्रैव कामतोऽत्यन्ताभ्यासे तु बृहद्यमः— (५।४१)

'रेतः सिक्त्वा कुमारीषु स्वयोनिष्वन्त्यजासु च ।
सपिण्डापत्यदारेषु प्राणत्यागो विधीयते ॥' इति ।

चण्डाल्यादीनां कामाकामयोः सकृद्गमने यमः— (२९)

'चण्डालपुक्कसानां तु भुक्त्वा गत्वा च योषितम् ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥' इति ।

इदमेव च कुमार्यादिगमनेऽपि ज्ञेयम् । बृहद्यमयाज्ञवल्क्याद्यनेकवचनोपात्तत्वेन तुल्यधर्मत्वात् ।

'बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥'

इत्युशनःस्मृतेरिति विज्ञानेश्वरादयः ।

अकामत एकरात्राभ्यासे तु त्रैवार्षिकम् ।

तथा च मनुः— (११।१७८)

'यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ।
तद्वैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥' इति ।

वृषली चात्र चण्डालीत्यपरार्कमिताक्षराकल्पतरुभवदेवीयादिषु ।

तथा च मिताक्षरायां स्मृत्यन्तरम्—

'चण्डाली बन्धकी वेश्या रजःस्था या च कन्यका ।
ऊढा या च सगोत्रा स्याद्वृषल्यः पञ्च कीर्त्तिताः ॥' इति ।

---

१ साध्वीति वर्णोत्तमाविशेषणम्—भवस्वामी ।

२ 'जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।' (म. १०।१८)

शूद्रीति शूलपाणिः, स्मृत्यन्तरवाक्यं त्वनाकरमिति मेने। अत्र चैकरात्रेणेत्यत्यन्तसंयोगवाचिन्या तृतीययाऽभ्यासोऽवगम्यते। कामत एकरात्राभ्यासे तु द्विगुणम्।

माधवीये व्याघ्रः—

'आश्रितस्यापि विदुष आहिताग्नेश्च योषितः।
आचार्यस्य च राज्ञश्च भार्यां प्रव्रजितां तथा॥
धात्रीं पुत्रीं च पौत्रीं च सखीं मातुस्तथैव च।
पितुः सखीं तथा गत्वा गुरुतल्पव्रतं चरेत्॥'

एकरात्रादूर्ध्वं कामतोऽत्यन्ताभ्यासपरमिदम्।

अस्मिन्नेव विषये मनुः—(२१।१७५)

'चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥' इति।

अत्राज्ञानान्नवाब्दम्। ज्ञानतो मरणम्।

'जनन्यां च भगिन्यां च स्वसुतायां तथैव च।
स्नुषायां गमनं चैव विज्ञेयमतिपातकम्॥
अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम्।
न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथञ्चन॥'
(विष्णुः ३४।२)

इति कात्यायनोक्तेः।

बृहद्धारीतोऽपि—'मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानि। सद्योऽग्निप्रवेशोऽतिपातकिनाम्' इति।

यत्तु संवर्त्तः—(१६५)

'मातरं यदि गच्छेत्तु स्वस्नुषां पुरुषाधमः।
न तस्य निष्कृतिं विद्यात्स्वकां दुहितरं तथा॥' इति।

भ्रातृभार्यागमने संवर्त्तः—(१६२)

'पितृव्यदारगमने भ्रातृभार्यागमे तथा।
गुरुतल्पव्रतं कुर्यान्नान्या निष्कृतिरुच्यते॥' इति।

—एतच्चाकामतो बहुकालाभ्यासविषयम्। कामतस्तु मरणान्तिकमेव।

यत्तु याज्ञवल्क्यः—(३।२८७)

'अनियुक्तो भ्रातृजायां गच्छन् चान्द्रायणं चरेत्।' इति।

तदसवर्णव्यभिचरितभ्रातृजायाविषयमिति।

कनिष्ठभ्रातुर्भार्यागमने चतुर्विंशतिमते—

'भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः।
कृच्छ्रद्वयं सान्तपनं प्रकुर्वीताथवाऽपि वा॥' इति।

आचार्यादिभार्यागमने जातूकर्ण्यः—

'आचार्यादिस्तु भार्यासु गुरुतल्पव्रतं चरेत।' इति।

आदिपदादुपाध्यायादीनां ग्रहणम्।

यत्तु चतुर्विंशतिमते—

'चरेच्चान्द्रायणं विप्रो गत्वोपाध्याययोषितम्।
आचार्यस्य पराकं तु बौधायनवचो यथा॥' इति।

तव्यभिचरितोपाध्यायादिपत्नीगमनपरम्।

यत्तु बृहद्यमः—(अग्निपु. १७३।५३-५४)

'चाण्डालीं पुष्कसीं म्लेच्छीं स्नुषां च भगिनीं सखीम्।
मातापित्रोः स्वसारं च निक्षिप्तां शरणागताम्॥
मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितम्।
शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेत्॥' इति।

यत्तु सुमन्तुः—'मातृष्वसृस्नुषाभागिनेयीगोचाण्डालीगमनेषु तप्तकृच्छ्रत्रयं सान्तपनं च' इति।

यच्चाङ्गिराः—(२८)

'पतितोंऽत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
मासोपवासं कुर्वीत चांद्रायणमथापि वा॥' इति।

यच्च संवर्तः—(१७२)

'चांडालीं पुष्कसीं म्लेच्छीं श्वपाकीं पतितां तथा।
एता गत्वा द्विजो मोहाच्चरेच्चांद्रायणव्रतम्॥'

यच्च हारीतः—'गुरुतल्पगो मृन्मयीं स्त्रीप्रतिकृतिमग्निवर्णां कृत्वा तामालिंग्य मृत्युना पूतो भवेत्। एवमेव पितृव्यस्त्रीगमने स्वसृमातृ-

पितृष्वसृगमने कन्यासगोत्रास्वस्रीयाभगिनीगमने चांद्रायणं वा ' इति; तत्र चांद्रायणं रेतःसेकादर्वाङ्निवृत्तौ ज्ञेयम् ।

यदपि संवर्त्तः-(१६२)

' भगिनीं मातुराप्तां च स्वसारं चान्यमातृजाम् ।
एता गत्वा स्त्रियो मोहात्तप्तकृच्छ्रं समाचरेत् ॥
कुमारीगमने चैव व्रतमेतद्विनिर्दिशेत् । '

तथा—(१६०-१५९)

' गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च ।
तस्या दुहितरं चैव चरेच्चान्द्रायणव्रतम् ॥
मातुलस्य सुतां गत्वा मातुलानीं सनाभिनीम् ।
एता गत्वा स्त्रियो मोहात्परांकेण विशुद्धयति ॥ ' इति ।

तदूर्ध्वरेतःपतिताभगिन्यादिगमनविषयम् ।

यत्तु विष्णुः— (५३।५) ' चांण्डालीगमने तत्साम्यमाप्नुयात् । अज्ञानाच्चान्द्रायणम् । '

यच्च गौतमः —(३।५।३२-३३) ' चाण्डालीगमने कृच्छ्राब्दः, अमत्या द्वादशरात्रः ' इति ।

तत्र साम्यकृच्छ्राब्दयोर्विषय उक्तः, चांद्रायणस्यापि । अज्ञानतः सकृदारोहणमात्रे तु द्वादशरात्रः ।

बौधायनः— ' मातृष्वसापितृष्वसाभागिनेयीस्नुषामातुलानीत्यगम्यागमने कृच्छ्रातिकृच्छ्रौ चांद्रायणम् ' इति ।

संवर्त्तः-(१६४)

' स्वसृभार्यां समारुह्य श्वश्रूं चैव हि मानवः ।
अहोरात्रोषितो भूत्वा तप्तकृच्छ्रद्वयं चरेत् ॥ '

चतुर्विंशमते—

' मातुश्च स्वस्रियां गत्वा पितृव्यतनयां तथा ।
तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तत्सुतासु च ॥

---

१ ' अन्त्यावसायिनी ' इति मूले ।

गुरोर्दुहितरं गत्वा पराकं च समाचरेत् ।
भागिनेयीं द्विजो गत्वा चरेच्चांद्रायणव्रतम् ॥
मातुलस्य सुतां गत्वा पितुश्च स्वस्रियां तथा ।
प्राजापत्यं प्रकुर्वीत हारीतवचनं यथा ॥
मातुश्च स्वस्रियां गत्वा भार्यां गत्वा तु कामतः ।
पितृव्यतनयां चैव सपादं कृच्छ्रमाचरेत् ॥
दौहित्रीं पुत्रतनयां चरेच्चांद्रायणव्रतम् ।
तत्सुतां तत्सुतां गत्वा पराकं तु समाचरेत् ॥
संबंधिनः स्त्रियं गत्वा पादकृच्छ्रं समाचरेत् ।
विधवागमने कृच्छ्रमहोरात्रसमन्वितम् ॥
चरेच्चान्द्रायणं विप्रो गत्वोपाध्याययोषितम् ।
आचार्यस्य पराकं तु बौधायनवचो यथा ॥
सखिभार्यां समारुह्य जातिस्वजनयोषितम् ।
स कृत्वा प्राकृतं कृच्छ्रपादं कुर्यात्ततः पुनः ॥
कुमारीगमने विप्रश्चरेच्चांद्रायणव्रतम् ।
पतितां तद्विजो गत्वा तदेव व्रतमाचरेत् ॥ ' इति ।

बृहन्मनुः—

' स्वमातुर्मातृगमने पितृमातृगमे तथा ।
एतास्त्वकामतो गत्वा द्विजश्चांद्रायणं चरेत् ॥ '

संवर्त्तः— (१५९)

' असतीं मातुलानीं च स्वसारं चान्यमातृजाम् ।
एता द्विजः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत् ॥ '

इत्याद्यनेकस्मृतिवचनानि संबंधसन्निकर्षविप्रकर्षापेक्षया योजनीयानि ।

वर्षाणीत्यनुवृत्तौ गौतमः—(३।४।२९–३२) ' द्वे परदारे । त्रीणि श्रोत्रियस्य । द्रव्यलाभे वोत्सर्गः । यथास्थानं वा गमयेत् ' इति । तया यद्दत्तं धनं तदुत्सृष्टव्यम् , तदीयं तत्रैव वा प्रत्यर्पणीयमित्यर्थः ।

वार्षिकप्राकृतव्रतमुक्त्वा स एव–(३।४।३४)'उपपातकेषु चैवम्' इति।

यमः–'द्वे वर्षे परभार्यासु त्रीणि श्रोत्रियपत्नीषु' इति।

तत्रेयं व्यवस्था–ऋतुकाले कामतो जातिमात्रब्राह्मणीगमने वार्षिकम्। तत्रैव गुणविशेषशालिन्यां द्वे वर्षे। तादृश्या एव श्रोत्रियभार्याया गमने त्रीणि वर्षाणीति। अथवा–श्रोत्रियगुणवद्ब्राह्मणक्षत्रियादिभार्याविषयत्वेनैतानि व्यवस्थापनीयानि।

अत एव शंखः–'वैश्यायामवकीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं वाऽनुतिष्ठेत्। क्षत्रियायां द्वे वर्षे, त्रीणि ब्राह्मण्याम्, वैश्यायाच्च शूद्रायाम्;' इति।

वैश्यायाश्चेति ब्राह्मणपरिणीतायाम्। शूद्रपरिणीतायां तु षण्मासिकमेव।

शूलपाणिस्तु–'सच्छूद्र्यां वैश्यवत्, असच्छूद्र्यां षाण्मासिकम्' इत्याह। तेन क्षत्रियागमने द्विवार्षिकमेव।

तदाह प्रजापतिः— (३।६९)

'विप्रो नृपस्य भार्यायां यत्करोति समागमे।
तदेव क्षत्रियस्यापि कुर्यादत्रैव सङ्गमे॥' इति।

एवं क्षत्रियस्य वैश्यादिस्त्रीषु क्रमेण वार्षिकं षाण्मासिकं च। एवं वैश्यस्यापि वैश्याशूद्र्योर्वार्षिकषाण्मासिके। शूद्रस्य शूद्र्यां षाण्मासिकमेव।

अनुपभुक्तागमन आपस्तम्बः– (२।२७।११–१३) 'सवर्णायामनन्यपूर्वायां सकृत्सन्निपाते पादः पतति। एवमभ्यासे पादः पादश्चतुर्थे सर्वम्' इति।

अनुपभुक्तायां एकस्यां श्रोत्रियपत्न्यां द्वादशाब्दम्। अनन्यपूर्वायामित्युक्तेरेकस्यामेव चतुरभ्यासे नेदं प्रायश्चित्तं, किन्तु पादपादन्यूनं कल्प्यमिति शूलपाणिविज्ञानेश्वरौ।

व्यभिचरितक्षत्रियावैश्यागमने संवर्तः— (१५५)

'क्षत्रियां वाऽथ वैश्यां वा गच्छेद्यः काममोहितः।
तस्य सान्तपनं कृच्छ्रं भवेत्तत्पापमोचकम्॥'

तत्सवर्णानुलोमविषयम्।

यत्तु स एव– (१५७)

'विप्रामस्वजनां गत्वा प्राजापत्यं समाचरेत्।' इति;

तद्व्यभिचरितब्राह्मणीविषये ब्राह्मणस्य।

यत्तु वसिष्ठः—(२१।१७) 'ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेन्निवृत्तधर्मकर्मणः कृच्छ्रोऽनिवृत्तधर्मकर्मणोऽतिकृच्छ्रः' इति।

—अप्रेक्षा अज्ञानम्। निवृत्तधर्मकर्मणो दारानित्यन्वयः।

ब्राह्मणस्य स्वैरिण्यां प्रायश्चित्तमाह यमः—

'ब्राह्मणो ब्राह्मणीं गत्वा द्विजे दद्यान्मृगाजिनम्।
क्षत्रियायां धनुर्दद्याद्वैश्यायामायसीं शिलाम्॥
शूद्रां गत्वा तथा विप्र उदकुम्भं द्विजातये।
त्रिरात्रोपोषितः स्नात्वा दद्यात्सम्मार्जनीं तथा॥' इति।

अत्र 'त्रिरात्रोपोषितः स्नात्वा' इति प्रत्येकं सम्बध्यते। एतच्च बन्धकीविषयमित्यन्ये।

स्वैरिण्यां प्रायश्चित्तान्तरमाहतुः शङ्खलिखितौ—'स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नात उदकुंभं ब्राह्मणाय दद्यात्। वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्। क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्यात्। ब्राह्मण्यां त्र्यहमुपोषितो घृतपात्रं दद्यात्' इति।

कल्पतरुकारस्तु 'प्रकीर्णास्वेवमस्वतंत्रासु' इति वाक्यशेषं पपाठ। —प्रकीर्णा केनचिदनवरुद्धा, अस्वतंत्रा त्ववरुद्धा। तदेवं द्विविधस्वैरिणीगमनेऽप्येतदेव प्रायश्चित्तमित्यर्थः।

शूलपाणिस्तु—'स्वैरिण्यां वृषल्यामवकीर्ण' इत्यत्र 'प्रसूत' इति पठित्वा प्रसूत इत्यनेन स्वैरिण्यामपत्योत्पादनेऽप्येतदेव प्रायश्चित्तमित्याह। तन्न; तादृशपाठस्य कल्पतरुप्रभृतिष्वदृष्टत्वात्, गर्भोत्पादने द्विगुणप्रायश्चित्तस्य वक्ष्यमाणत्वाच्च (पृ. १५९)।

बन्धकीगमने तु षट्त्रिंशन्मते—

'ब्राह्मणीं बन्धकीं गत्वा किञ्चिद्दद्याद्द्विजातये।
राजन्यां च धनुर्दद्याद्वैश्यां गत्वा तु चैलकम्॥'
शूद्रां गत्वा तु वै विप्र उदकुम्भं द्विजातये।
दिवसोपोषितो वा स्याद्दद्याद्विप्राय भोजनम्॥' इति।

—किञ्चिदष्टमुष्ट्यात्मकं धान्यम्, 'अष्टमुष्टि भवेत्किञ्चित्' इति स्मृतेः।

प्रायश्चित्तान्तरमाह प्रचेताः—'बन्धकीगमने उपस्पृश्य प्राणायामं कुर्यात्। ब्राह्मणबन्धकीं गत्वा कमण्डलुं दद्यात्, क्षत्रियबन्धकी-मायुधम्, वैश्यबन्धकीं प्रतोदम्' इति। अत्र त्रिषु वर्णत्रयोपादानात्प्रथमं शूद्रबन्धकीपरम्।

स्वैरिणीबंधक्योर्लक्षणमुक्तं स्मृत्यंतरे—(यमः ५।३७)

'चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंधकी मता।' इति।

महाभारतेऽपि—(१।१२३।७७)

'अतःपरं स्वैरिणी स्यात्पंचमे बंधकी तथा।' इति।

यत्तु मनुः—(३।१७)

'शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥'

इति; तत्पापगौरवपरम्। एतानि च प्रायश्चित्तानि गर्भानुत्पत्ति-विषयाणि। तदुत्पत्तौ तु यद्विशेषे यत्प्रायश्चित्तमुक्तं, तदेव तत्र द्विगुणं कर्त्तव्यम्।

तथा चोशनाः—(१।३७)

'गमने तु व्रतं यत्स्याद्गर्भे तु द्विगुणं भवेत्।' इति।

आपस्तंबः—

'चांडालमेदैश्चपचकपालव्रतधारिणाम्।
अकामतः स्त्रियं गत्वा पराकव्रतमाचरेत्॥
कामतस्तु प्रसूतो वा तत्समो नात्र संशयः।
स एव पुरुषस्तस्यां गर्भो भूत्वाऽभिजायते॥' इति।

कामतः प्रसूतो वेति—यथा कामतो द्विगुणमुक्तम्, तथा गर्भेऽपीत्यर्थः।

चतुर्विंशतिमते तु जातिभेदेन गर्भप्रायश्चित्तविशेष उक्तः

'ब्राह्मणीगमने कृच्छ्रं गर्भे सांतपनं स्मृतम्।
राज्ञीगर्भे पराकः स्याद्विगर्भे तु त्र्यहाधिकम्॥
शूद्रगर्भे द्विजः कुर्यात्तद्वच्चान्द्रायणं स्मृतम्।
चांडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेत्॥' इति।

---

१ विप्रायां वैश्यजो वैदेहः। तस्मात् निषाद्यां मेदः—मेधातिथिः (१०।३६)

तत्रैव–'वृषल्यामभिजातस्तु त्रीणि वर्षाणि चतुर्थकालसमये नक्तं भुंजीत' इति। एतच्च कामतोऽत्यन्ताभ्यासेन गर्भोत्पत्तौ।

–अभिजातः उत्पादितगर्भः।

यत्तु हारीतः—

'ब्राह्मणो वृषलीं गत्वा त्र्यहं भवति सूतकी।
अथास्यां गर्भमाधत्ते ब्राह्मण्यादवकीर्य्यते॥' इति।

तथा—

'ब्राह्मणो वृषलीं गत्वा सद्यो गच्छेदधोगतिम्।
अथास्यां गर्भमाधत्ते पतत्याशु न संशयः॥' इति।

तदेतानि पापगौरवख्यापनपराणि।

कण्वः—

'प्रसूतो यस्तु वेश्यायां भैक्षभुङ्नियतेन्द्रियः।
शतं सहस्रमभ्यस्य सावित्रीमेति शुद्धताम्॥' इति।

अत्र—

'कैवर्तीं रजकीं चापि वेश्यां चापि गतो नरः।
प्राजापत्यविधानेन कृच्छ्रेणैकेन शुद्ध्यति॥' (३।११)

इति शातातपवाक्ये वेश्यासमभिव्याहृतकैवर्त्यादिषु गर्भोत्पादेऽपीदमेव प्रायश्चित्तमिति।

प्रातिलोम्यव्यवाये तु शंखः–

'प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्त्तनम्।' इति।

–वधः प्रायश्चित्तं दंडश्च। नार्याः कर्णादिकर्त्तनं तु यथोक्तप्रायश्चित्तमनिच्छंत्याः।

वधे प्रकारविशेषमाह वसिष्ठः–(२१।१) 'शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वीरणवेष्टयित्वा शूद्रमग्नौ प्रास्येत्। ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाऽभ्यज्य नग्नां कृष्णखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते। वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत्। ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाऽभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते। राजन्य-

श्रेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ प्रास्येत् । ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाऽभ्यज्य नग्नां श्वेतखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते । एवं वैश्यो राजन्यायां शूद्रश्च राजन्यवैश्ययोः ' इति ।

—महापथव्राजनं दंडः प्रायश्चित्तं च । पूतत्वोक्तेरिति मिताक्षरायाम् । अपरार्के तु प्रायश्चित्तयोग्येति व्याख्यातम् । एतच्च कामतः, अकामतस्तु शूद्रस्य मरणवैकल्पिकचतुर्विंशत्यब्दार्द्धं द्वादशाब्दम् । शूद्रस्यैव क्षत्रियावैश्ययोर्नववार्षिकषड्वार्षिके वा

यत्तु वृद्धप्रचेताः—

' शूद्रस्य ब्राह्मणीं मोहाद्गच्छतः शुद्धिमिच्छतः ।
पूर्णमेतद्व्रतं देयं माता यस्माद्धि तस्य सा ॥
पादहान्यान्यवर्णासु गच्छतः सार्ववर्णिकम् ।
प्रायश्चित्तमिदं देयमगम्यागमने क्रमात् ॥ '

एतद्दिशा वैश्यस्याज्ञानतो विप्रागमने नवाब्दम् । क्षत्रियस्य तु षडब्दम् । एवमेव शूलपाणिरपि ।

यत्तु माधवीये संवर्त्तः—(१६९)

' कथंचिद्ब्राह्मणीं गच्छेत् क्षत्रियो वैश्य एव वा ।
गोमूत्रयावकाहारो मासेनैकेन शुद्धयति ॥ '

इति; तदत्यंतव्यभिचारितायामकामतो गमने ज्ञेयम् ।

मिताक्षरायां त्वाद्यश्लोकोत्तरार्द्धमेवम्—

' कृच्छ्रं सांतपनं वा स्यात्प्रायश्चित्तं विशुद्धये । ' इति ।

रजस्वलागमने प्रायश्चित्तमाह योगी— (३।२८७)

' त्रिरात्रांते घृतं प्राश्य गत्वोदक्यां विशुद्धयति । '

त्रिरात्रोपवासांत इत्यर्थः । इदमकामतः सकृद्गतौ ।

अत्रैव कल्पतरौ शंखलिखितौ—' रजस्वलावधूताभिगमने त्रिरात्रोपवासो गुडप्राशनं च । '

---

१ पूता प्रायश्चित्तयोग्या भवतीत्यर्थः । इति ।

कामतः सकृद्गमने शातातपः–(२६) 'रजस्वलागमने सप्तरात्रम्' इति।

यत्तु वसिष्ठः–(२३।३) 'रजस्वलान्यवाये शुक्लमृषभं दद्यात्कृष्णपिङ्गलम्' इति।

यदप्यापस्तंबः–(९।३८)

'उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः।
प्राजापत्येन शुद्ध्येच्च ब्राह्मणानां च भोजनात्॥'

इति; तदकामतोऽभ्यासे, कामतः सकृद्गतौ च।

कामतोऽत्यंतानवच्छिन्नाभ्यासे तु शंखः– (१७।९)

'पादं तु शूद्रहत्यायामुदक्यागमने तथा।' इति।

कामतोऽभ्यासमात्रे तु संवर्त्तः–(१६७)

'रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा।
तस्य पापस्य शुद्ध्यर्थमतिकृच्छ्रं विशोधनम्॥' इति।

दिनभेदात्प्रायश्चित्तविशेषश्चतुर्विंशतिमते—

'रजस्वलां तु यो गच्छेत्पराकं तु समाचरेत्।
सांतापनं द्वितीयेऽह्नि प्राजापत्यं परेऽहनि॥' इति।

–'सांतापनो महासांतपन' इति मदनपारिजाते।

यत्तु माधवीये शातातपः–(१३)'अनुदकमूत्रपुरीषकरणे श्वपाकस्पर्शे सचैलस्नानं महाव्याहृतिहोमश्च। रजस्वलागमने चैतदेव।' इति; तदकामतः प्रवृत्तस्य रेतःसेकादर्वाङ्निवृत्तौ बोध्यम्। कामतस्त्वेतदेव द्विगुणम्।

यत्तु विष्णुना–(३६।७) 'स्वसुः सख्याः सगोत्राया उत्तमवर्णाया रजस्वलायाः शरणागतायाः प्रव्रजिताया निक्षिप्तायाश्च गमनमित्येतान्यनुपातकानि' इत्यनेन रजस्वलागमने अनुपातकप्रायश्चित्तमुक्तम्; तच्छ्रोत्रियपत्न्यां कामतोऽत्यंतानवच्छिन्नाभ्यासविषयम्। एतानि च रजस्वलान्तर्वत्न्यादिगमनप्रायश्चित्तानि स्वपत्न्यामेव। परपत्न्यां तु

---

१ चान्द्रायणेन।— मू. पा.

२ 'क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते।' (म. १०।१९)

तादृश्यां पारदार्य्यप्रायश्चित्तैर्विजातीयैः समुच्चीयंते। साजात्ये तु अधिकेन न्यूनस्य प्रसंगसिद्धिः। साम्ये तु तंत्रमिति। एवं विधवादिगमनेऽपि योज्यम्।

तत्र प्रायश्चित्तं चतुर्विंशतिमते—

'विधवागमने कृच्छ्रमहोरात्रसमन्वितम्।
व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत्॥'

अथान्त्यजागमनप्रायश्चित्तम्।

आपस्तंबः—(अत्रिः ६।१६—यमः ३३)

'रजकश्चर्मकारश्च नटो बुरुड एव च
कैवर्त्तमेदभिल्लाश्च सप्तैते त्वंत्यजाः स्मृताः॥'

बृहत्संवर्त्तः—(१।२७)

'रजकव्याधशैलूषवेणुचर्मोपजीविनीः।
एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रायणद्वयम्॥' इति।

आपस्तंबः—(२।२६)

'म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा।
एतासु गमनं कृत्वा चरेच्चांद्रायणद्वयम्॥' इति।

---

१ 'तीवरेण च चाण्डाल्यां चर्मकारो बभूव ह।' (ब्र.वै. ३।१०।१०३) इति, 'आयोगवेन ब्राह्मण्यां चर्मकारः प्रजायते।' (सू. सं. १।१२।४०) इति चोक्तश्चर्मकारः। 'मल्लात्तु पिच्छलस्तेन नटाख्यो जायते भुवि।'(सू.सं.१।१२।४२) इत्येषो नटः। मनुस्तु—(१०।२२) 'झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड एव च॥' इत्यन्यथा नटमाह। 'एतान्येकस्यैव नामानि' इति कुल्लूकः। बुरुडः—'कर्मचण्डालकात्पुत्रं वैदेही पाण्डुशोपकम्। लेभे बुरुडजातित्वं सदा वंशविदारणम्॥' (शू. क.) इति वर्णितः। शूलपाणिस्तु-बरुड इति पठित्वा कोष्टभूर इति प्रसिद्ध इति व्याचख्यौ। कैवर्तः—'क्षत्रबीर्येण वैश्यायां कैवर्तः परिकीर्तितः।' (ब्र. वै. ३।१०।१११) इति, 'निषादो मार्गवं सूते दासं नौकर्मजीविनम्। कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः॥' (म. १०।३४) इति चोक्तः। भिल्लः—'कारावारी यदा नारी धीवराज्जनयेत्सुतम्। स भिल्लसंज्ञः कथितः कन्दमूलादिजीवनः॥' (जा. भा.) भिल्लो गण्डवारः—शू. पा.

इदं च विप्रस्य कामतः सकृद्गमने । क्षत्रियादेस्तु पादपादहीनं कल्प्यम् ।

यत्तु संवर्त्तः—(१५४)

'रजकव्याधशैलूषवेणुचर्मोपजीविनाम् ।
स्त्रियो विप्रो यदा गच्छेत्कृच्छ्रं चांद्रायणं चरेत् ॥ '

इति; तदकामतः ।

अत्रैवाहापस्तंबः—

'चंडालमेदश्वपचकपालव्रतचारिणाम् ।
अकामतः स्त्रियो गत्वा पराकव्रतमाचरेत् ॥ ' इति ।

यत्तूशनाः—(यमः ५।१२)

'कापालिकान्नभोक्तृणां तन्नारीगामिनां तथा ।
ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानाद्दैवद्वयम् ॥ '

तत्कामतोऽभ्यासे ।

यत्तु शातातपः—(३।११)

'कैवर्त्तीं रजकीं चैव वेणुचर्मोपजीविनीम् ।
प्राजापत्यविधानेन कृच्छ्रेणैकेन शुद्ध्यति ॥ '

इति; तच्छूद्रपरम् ।

अस्मिन्नेव विषये द्विस्त्रिगमनाभ्यासे हारीतः—

'कैवर्त्तीं ध्वजिनीं चैव याश्चान्या अन्त्यसंभवाः ।
कामतस्तु वसन्विप्र एतानेव समाचरेत् ॥
द्वौ मासौ भैक्ष्यभक्षेण द्वौ मासौ यवयावकैः ।
द्वौ मासौ पंचगव्येन षण्मासांश्चरितव्रतः ॥
एवं शुद्धिमवाप्नोति प्रायश्चित्तानुरोधतः ।' इति ॥

---

१ गच्छन्निति शेषः ।—मा.

२ तद्रेतः सेकात्प्राङ्निवृत्तिविषयम् ।—मा.

३ ध्वजी ध्वजनिर्माणोपजीवी अम्बष्ठः, 'वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते । कूट्याजीवो भवेत्तस्य तथैवाग्नेयनर्तकः ॥ ध्वजविश्राविका वापि अम्बष्ठाः शस्त्रजीविनः ' (औ. ३१–३२) इत्युक्तेः । तत्स्त्री ध्वजिनी । 'ध्वजी सुराविक्रयी ' (अप. १।४१) तस्य स्त्री वा ।

ये त्वन्त्यावसायिनश्चांडालादयस्तेषां स्त्रीगमने गुरुप्रायश्चित्तमुक्तं गुरुतल्पातिदेशे। एतासां च रजकाद्यंत्यजस्त्रीणां मध्ये यदेकस्या व्यवाये प्रायश्चित्तमभिहितं, तत्सदृशत्वात्सर्वासु भवति।

तथा चोशनाः—

'बहूनामेकधर्माणामेकस्यापि यदुच्यते।
सर्वेषां तद्भवेत्कार्य्यमेकरूपा हि ते स्मृताः॥' इति।

एतासु गर्भोत्पत्तौ तु विशेष उक्त उशनसा—

'चांडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेत्।' इति।

एतच्च व्रतातिदेशान्नवाब्दम्। तच्चाकामतः।

कामतः पुनरापस्तंबः—

'अंत्यजायां प्रसूतस्य निष्कृतिर्न विधीयते।
निर्वासनं कृतांकस्य तस्य कार्य्यमसंशयम्॥' इति।

अथ स्त्रीणां व्यभिचारे प्रायश्चित्तम्।

मनुः—(११।१७६)

'यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्।' इति।

एतच्च वाचनिकातिदेशात्पादोनमिति केचित्। पूर्णमेव तु युक्तम्।

तथा च बृहस्पतिः—

'यत्पुंसः परदारेषु समानेषु विधीयते।
व्यभिचारेऽपि भर्त्तुः स्त्री तदशेषं समापयेत्॥' इति।

समानेष्वित्यनुलोमानामप्युपलक्षणार्थम्। तच्च प्रातिलोम्यव्यवायव्यावृत्त्यर्थम्, तत्र गुरुप्रायश्चित्तोक्तेः। भर्त्तुः पुंसः। अव्यवस्थितकल्पनात्वन्याय्यैवेति। अतश्च सवर्णानुलोमव्यवाये स्त्रीपुंसयोरौत्सर्गिकं तुल्यं प्रायश्चित्तम्।

तस्य क्वचिदपवादः, तथा च संवर्त्तः—

'बलात्प्रमथ्य भुक्ता चेद्दह्यमानेन चेतसा।
प्राजापत्येन शुद्धिः स्यात्तत्तस्याः पावनं परम्॥' इति।

पराशरोऽपि–(१०।२६–अत्रिः ६।१८)

'सकृद्भुक्ता तु या नारी नेच्छंती पापकर्मभिः ।
प्राजापत्येन शुद्ध्येत ऋतुप्रस्रवणेन वा ॥ ' इति ।

बृहस्पतिरपि–

'अनिच्छती तु या भुक्ता गुप्तां तां कारयेद्गृहे ।
मलिनांगीमधः शय्यां पिंडमात्रोजीविनीम् ॥

कारयेन्निष्कृतिं कृच्छ्रं पराकं वा समं गताम् ।
हीनवर्णोपभुक्ता या त्याज्या वंध्याऽपि वा भवेत् ॥ ' इति ।

–समं समानजातीयम् । अत्र सकृदुपगमे कृच्छ्रः, द्विरभ्यासे पराकः, अभ्यासे तु चांद्रायणम् ।

तदाहोशनाः–' व्यभिचारिणीं भार्यां कुचैलपिंडगुप्तां निवृत्ताधिकारां चांद्रायणं पराकं प्राजापत्यं (वा) चारयेत् । ' इति ।

मनुः–(११।१७७)

'सा चेत्पुनः प्रदुष्येत्तु सदृशेनोपयंत्रिता ।
कृच्छ्रं चांद्रायणं चैव तदाऽस्याः पापशोधनम् ॥ ' इति ।

इदं चाकामतः, कामतस्तु द्विगुणम् ।

यत्तु ऋष्यशृंगः–

'बलेन कामिता नारी सवर्णेन कथंचन ।
प्रायश्चित्तं त्रिरात्रं वै तस्याः शुद्ध्यर्थमादिशेत् ॥ ' इति ।

तद्रेतःसेकात्प्राङ्निवृत्तौ द्रष्टव्यम् ।

पराशरोऽपि–(१०।२४)

'बंदिग्राहेण या भुक्ता हत्वा बध्वा बलाद्व्रजेत् ।
कृत्वा सांतपनं कृच्छ्रं शुद्ध्येत्पाराशरोऽब्रवीत् ॥ '

इच्छया प्रवृत्तौ तु तस्याः पुंतुल्यमेव प्रायश्चित्तम् ।

---

१ वधोऽत्र नासाकर्णच्छेदो न तु देहात्मवियोगः, तादृशवधस्य निषेधात् ।–प्रा.मु.

२ प्रासादमारुह्य प्रेक्षते, इत्यस्मिन्नर्थे ' प्रासादात्प्रेक्षते ' इति यथा पञ्चमी; तथा भयमुत्पादयेत्यस्मिन्नर्थे ' भयात् ' इति पञ्चमी द्रष्टव्या ।—मा.

तदाहतुः शंखलिखितौ–'इच्छया व्यभिचारिणीं परदारेषु पुंसो विहितमेनां चारयेत्' इति ।

अंगिराः–

'व्रतं यच्चोदितं पुंसां पतितस्त्रीनिषेवणात् ।
तच्चापि कारयेन्मूढां पतितासेवनात्स्त्रियम् ॥' इति ।

आसेवनादिति छेदः । एतच्च कामतः ।

अकामतस्त्वाह संवर्त्तः–(१६८–६९)

'ब्राह्मण्यकामाद्गच्छेच्चेत्क्षत्रियं वैश्यमेव च ।
गोमूत्रयावकैर्मासात्तदर्द्धाच्च विशुद्ध्यति ॥
ब्राह्मण्याः शूद्रसंपर्के कथंचित्तमुपागते ।
चांद्रायणेन शुद्धिः स्यात्तत्स्याः पावनं स्मृतम् ॥' इति ।

शूलपाणिस्तु –'अनिच्छतीविषयमेतदिति । मासादिति वैश्ये, क्षत्रिये त्वर्द्धम्' इति ।

षट्त्रिंशन्मतेऽपि–'ब्राह्मणीक्षत्रियवैश्यसेवायामतिकृच्छ्रं कृच्छ्रातिकृच्छ्रौ चरेत् । क्षत्रियायोषितो ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रार्द्धं प्राजापत्यमतिकृच्छ्रं च । वैश्ययोषितो ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रपादं कृच्छ्रार्द्धं प्राजापत्यं च । शूद्रायाः शूद्रसेवने प्राजापत्यम् , ब्राह्मणराजन्यवैश्यसेवायां त्वहोरात्रं त्रिरात्रं कृच्छ्रार्द्धम्' इति ।

बृहत्प्रचेताः–

'विप्रा शूद्रेण संयुक्ता न चेत्तस्मात्प्रसूयते ।
प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चान्द्रायणत्रयम् ॥
चान्द्रायणे द्वे कृच्छ्रश्च विप्रायां वैश्यसङ्गमे ।
कृच्छ्रचान्द्रायणे स्यातां तस्याः क्षत्रियसङ्गमे ॥
क्षत्रियाशूद्रसम्पर्के कृच्छ्रं चान्द्रायणद्वयम् ।
चांद्रायणं सकृच्छ्रं तु चरेद्वैश्येन सङ्गता ॥
शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चान्द्रायणोत्तरम् ।
आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितम् ॥' इति ।

'न चेत्तस्मात्प्रसूयते' इति सर्वत्र सम्बध्यते।

'ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण सङ्गताः।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः॥'(२१।१४)।

इति वसिष्ठोक्तेः।

—पादावरोपितं पादहान्या। शूद्र्याः शूद्रगमने यत्प्रायश्चित्तम्, तद्विप्रक्षत्रियवैश्यगमने पादार्द्धत्रिपादोनं भवति। एवं वैश्याया यद्वैश्यगमन उक्तं, तत्क्षत्रियविप्रगमने पादोनमर्द्धं च भवति। क्षत्रियाया यत्क्षत्रियगमने तद्विप्रगमने पादोनमित्यर्थः।

गर्भोत्पत्तौ तु चतुर्विंशतिमते—

'विप्रगर्भे पराकः स्यात् क्षत्रियस्य तथैन्दवम्।
ऐन्दवं च पराकं च वैश्यस्याकामकारतः॥
शूद्रगर्भे भवेत् त्यागश्चाण्डालो जायते यतः।
गर्भस्रावे धातुदोषैश्चरेच्चान्द्रायणत्रयम्॥'

एतच्च—'अकामकारतः' इति विशेषणादकामतः। कामतः पुनः पराकादिद्विगुणं कुर्यात्। गर्भस्राव इति शूद्रगर्भस्रावे। यदा तु सम्पूर्णशूद्रगर्भस्य प्रसवस्तदा प्रायश्चित्ताभावः।

'अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः।' (२१।१४) इति वसिष्ठोक्तेः।

यदा त्वाहितगर्भैव व्यभिचरति, तदा गर्भपातशङ्कया प्रसवोत्तरकालमेव प्रायश्चित्तं कार्यम्।

तदुक्तं मिताक्षरायां स्मृत्यन्तरे—(शा. स्मृ. ३।७—८)

'अन्तर्वत्नी तु या नारी समेनोल्क्रम्य कामिता।
प्रायश्चित्तं न कुर्यात्सा यावद्गर्भो न निस्सृतः॥
जाते गर्भे व्रतं कुर्यात्पश्चान्मासं तु यावकम्।
न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधि॥' इति।

अन्त्यजगमनेऽपि स्त्रीणां प्रायश्चित्तमुक्तं स्मृत्यन्तरे—(सं.१६७-१६८)

'चाण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा।
ब्राह्मण्यकामतो गत्वा चान्द्रायणचतुष्टयम्॥'

तथा—

'रजकव्याधशैलूषवेणुचर्मोपजीविनः।
ब्राह्मण्येतान्यदा गच्छेदकामादैन्दवद्वयम् ॥' इति।

अङ्गिराः—(९।२१–१७–२२)

'चण्डालेन तु सम्पर्कं यदि गच्छेत्कथञ्चन।
सशिखं वपनं कुर्याद्भुञ्जीयाद्यावकौदनम् ॥
त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्।
आत्मना सम्मिते कूपे गोमयोदककर्दमे ॥
तत्र स्थित्वा निराहारा सा त्रिरात्रं ततः क्षिपेत्।
शङ्खपुष्पीलतामूलं पत्रं वा कुसुमं फलम् ॥
क्षीरं सुवर्णसम्मिश्रं काथयित्वा ततः पिबेत्।
एकभक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ॥
बहिस्तावच्च निवसेद्यावच्चरति तद्व्रतम्।
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥
गोद्वयं दक्षिणां दद्याच्छुद्ध्यै स्वायम्भुवोऽब्रवीत्।' इति।

एतच्चाज्ञानविषयम्।

कामतः सकृद्गमने तु ऋष्यशृङ्गः—

'सम्पृक्ता स्यादथान्त्यैर्या सा कृच्छ्राब्दं समाचरेत्।' इति।

कामतोऽत्यन्तसम्पर्के तूशनाः—(२।६)

'अन्त्यजेन तु सम्पर्कं भोजने मैथुने कृते।
प्रविशेत्सम्प्रदीप्ताग्नौ मृत्युना सा विशुद्ध्यति ॥' इति।

यत्तु शातातपः—

'म्लेच्छेनाधिगता शूद्रा अकामा वा कथञ्चन।
कृच्छ्रत्रयं प्रकुर्वीत ज्ञाने तु द्विगुणं भवेत् ॥' इति।

अत्र च म्लेच्छग्रहणमेकवाक्योपात्तानां चाण्डालादीनामप्युपलक्षणम्, 'बहूनामेकधर्माणां' इत्युशनसो वाक्यात्।

---

१ पराशरसंहितायामपि (१०।३९–२२) इमानि वचनानि किञ्चिदिव भेदेन दृश्यन्ते।

यत्तु संवर्त्तः– (१७२)

'चाण्डालं पुष्कसं म्लेच्छं श्वपाकं पतितं तथा।
एतान् गत्वा स्त्रियः श्रेष्ठाः कुर्य्युश्चान्द्रायणं परम् ॥'

इति; तत्कामतोऽप्रवृत्तस्य रेतःसेकात्प्राङ्निवृत्तौ द्रष्टव्यम्।

आहितगर्भायाश्चाण्डालादिव्यवाये तु ऋष्यशृङ्गः–

'अन्तर्वत्नी तु युवतिः सम्पृक्ता चान्त्ययोनिना।
प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निस्सृतः ॥
न प्रचारं गृहे कुर्यान्न चाङ्गेषु प्रसाधनम्।
न शयीत समं भर्त्रा न वा भुञ्जीत बान्धवैः ॥
प्रायश्चित्तं गते गर्भे विधिं कृत्वाऽऽब्दिकं चरेत्।
हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणाम् ॥' इति।

मानसिकवाचिकव्यभिचारयोः प्रायश्चित्तमाह वसिष्ठः– (२१।७८) 'मनसा भर्तुरतिचारे त्रिरात्रं यावकं क्षीरोदनं वा भुञ्जाना अधःशयीत ऊर्ध्वं त्रिरात्रादप्सु निमग्नायाः सावित्र्या चतुर्भिरष्टशतैः शिरोभिर्जुहुयात् पूता भवतीति विज्ञायते। वाक्सम्बन्धे एतदेव मासं चरित्वा ऊर्ध्वं मासादप्सु निमग्नायाः सावित्र्या चतुर्भिरष्टशतैः शिरोभिर्जुहुयात्' इति।

–अष्टाधिकं शतमष्टशतम्, तैश्चतुर्भिः शिरोऽभि शिरसीत्यर्थः।

इदं च मानसिकव्यभिचारे प्रायश्चित्तं रजोदर्शनादर्वाग्व्यवहार्य्यत्वसिद्धये। रजोदर्शने तु सति तेनैव शुद्धिः।

तथा च मनुः– (५।१०७)

'मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुद्ध्यति।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः॥' इति।

अन्त्यजादिव्यवाये तु पराशरः—

'हीनवर्णोपभुक्ता या साऽङ्क्या वध्याऽपि वा भवेत्।' इति।

अङ्कनपक्षे त्याग एव

'चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या॥' (२१।१२)।

इति वसिष्ठोक्तेः।

---

१ चान्द्रायणत्रयमिति–मू.

—जुङ्गितः प्रतिलोमजः । अत्र च विशेषविधानात् परित्यागो गृहान्निर्वासनमेव । अन्यत्र तु—

'विप्रदुष्टां स्त्रियं भर्त्ता निरुध्यादेकवेश्मनि ।' (२१।१७६)

इति मनूक्तो निरोधः ।

याज्ञवल्क्योऽपि– (१।७०)

'हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधः शय्यां वासयेद्व्यभिचारिणीम् ॥' इति ।

अत्र च वासनं वैराग्यजननार्थमेव ।

यत्तु चतुर्विंशतिमते–

'स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना ।
तत्रापि गृहमध्ये तु प्रायश्चित्तानि कारयेत् ॥
परित्यक्ता चरेत्पापं बह्वल्पं वाऽपि किञ्चन ।
तत्पापं शतधा भूत्वा बान्धवाननुगच्छति ॥'

इति; तद्गर्भानुत्पत्तिपरम् ।

तद्युक्तायास्तु परित्यागमाह पराशरः– (१०।२९)

'जारेण जनयेद्गर्भं मृतेऽव्यक्ते गते पतौ ।
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ॥' इति ।

अपरे राष्ट्र इत्युक्तेर्गृहान्निष्कासनं गम्यते ।

अत एव चतुर्विंशतिमते—

'चतस्र एव संत्याज्याः पतने सत्यपि स्त्रियः ।
श्वपाकोपहता या तु भर्तृघ्नी पितृपुत्रगा ॥' इति ।

अत्र च शिष्यगादीनां त्यागो गर्भविषय एव,

'व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधादौ च तथा महति पातके' ॥

इति याज्ञवल्क्योक्तेः (१।७२) ।

—गर्भः शूद्रादिकृतः ।

'ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः ।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः' ॥

इति वसिष्ठस्मरणात् (२१।१४) ।

शूद्रग्रहणं प्रतिलोमजोपलक्षणार्थम्। तत्रैवर्णिकव्यावृत्त्यर्थम्; तेन शिष्यगागुरुगयोरपि त्रैवर्णिकयोः प्रसवे न त्यागः। अयं च त्यागो न गर्भमात्रे, किन्तु प्रसवमात्र इति प्राग्व्याख्यातम् (पृ.१७०)। अयमेवाभिप्रायो माधवाचार्याणाम्। मिताक्षरायां तु व्यवहारनिरोध एव त्यागशब्देनोक्तो न तु गृहान्निर्वासनमपीति।

इति स्त्रीप्रायश्चित्तम्॥

अथ पशुगमने।

शङ्खलिखितौ–'तिर्यग्योनिषु गोवर्जं सचैलं स्नातो यवसभारं दद्यात्।'

पराशरः— (१०।१५)

'महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुद्ध्यति।' इति।

इदंकामतः।

कामतस्तु जाबालः–

'इतरेषां पशूनां तु कृच्छ्रपादो विशोधनम्।' इति।

कामतोऽभ्यासे संवर्तः— (१६४)

'पशुवेश्याभिगमने प्राजापत्यं विधीयते।'

शुनीगमने विशेषश्चतुर्विंशतिमते–

'शुनीं चैव द्विजो गत्वा अतिकृच्छ्रं समाचरेत्' इति।

यत्तु गौतमः– (३।४।३६) 'अमानुषीषु गोवर्जं स्त्रीषु गमने कूष्माण्डैर्घृतहोमः' इति, तत्कामाकामसकृदभ्यासेष्वष्टाविंशत्यष्टोत्तरशताष्टोत्तरसहस्रादिसङ्ख्यया योज्यम्।

अथ गोगमने।

पराशरः– (१०।१५)।

'गोगामी च त्रिरात्रेण गामेकां ब्राह्मणे ददन्।'

इदमकामतः सकृद्गमने।

कामतो विष्णुः– (५३।३) 'गोव्रतं गोगमने च।'

कामतोऽभ्यासे तु शङ्खलिखितौ— 'गोष्ववकीर्णः संवत्सरं प्राजापत्यं चरेत्' इति।

यत्तु गौतमः– (३।५।१२) 'गवि गुरुतल्पसमः' इति तज्ज्ञानादाजन्माभ्यासे ।

अथ व्रतलोपे ।

योगीश्वरः– (१।२८०)

'अवकीर्णी भवेद्व्रत्वा ब्रह्मचारी तु योषितम् ।
गर्दभं पशुमालभ्य नैर्ऋतं स विशुद्ध्यति ॥'

मनुः– (११।११८–११९, १२२–१२३)

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे ।
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥

हुत्वाऽग्नौ विधिवद्धोमानन्ततश्च समित्यृचा ।
वाय्विन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाऽऽहुतीः ॥

एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् ।
सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्त्तयन् ॥

तेभ्यो लब्धेन भैक्षेण वर्त्तयन्नेककालिकम् ।
उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति ॥'

पाकयज्ञविधानम्—'अथ पशुकल्प' (गृ. सू. १।९।१) इत्याश्वलायनाद्युक्तम् । अत्राहुतीरिति बहुवचनात्कपिञ्जलन्यायेन (जै. न्या. ११।१।६) आहुतित्रयमेव ज्ञेयम् । वसिष्ठोऽपि– (२३।१–३) 'ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभेत् । नैर्ऋतं वा चरुं निर्वपेत् । तत्र तस्य जुहुयात् । कामाय स्वाहा, कामकामाय स्वाहा, रक्षोदेवताभ्यः स्वाहा' इति ।

अत्र गर्दभयागात्पूर्वं 'वायवे स्वाहा' इत्यादिचतुर्भिराज्यहोमः । गर्दभयागोत्तरं 'सं मा सिञ्चन्तु' इत्यृचा होम इत्यपरार्के । 'अत्र पशोरसंभवे चरुः' इति विज्ञानेश्वरः । 'श्रोत्रियस्य पशुरश्रोत्रियस्य चरुः' इति माधवः । अयं चामावास्यायां कार्यः; तथा च तैत्तिरीयश्रुतिः– (आर.२।१८) 'यो ब्रह्मचार्यवकिरेदमावास्यायाꣳ रात्र्यामग्निं प्रणीयोपसमाधाय' इत्यादि । एतच्च कामत एव 'कामतो रेतसः सेकं' इति

निमित्तवाक्ये मनूक्तेः (११।१२०) । अत्राशक्तस्य स्त्रिया प्रोत्साहितस्य वा योगीश्वरोक्तो गर्दभयाग एव । शक्तस्य तु मनूक्तयागाऽऽदिकतपसोः समुच्चयः ।

समुच्चयमेवाह गौतमः—(३।५।१७–१९) ' गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत् । तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षं चरेत् कर्माचक्षाणः । संवत्सरेण शुद्धयेत् ' इति । इदं च वार्षिकं व्रतमश्रोत्रियविप्रपत्न्यां श्रोत्रियवैश्यपत्न्यां च ।

यत्तु शंखलिखितौ—' गुप्तायां वैश्यायामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत् । क्षत्रियायां द्वे वर्षे । ब्राह्मण्यां त्रीणि वर्षाणि ' इति, तद्ब्राह्मणीक्षत्रिययोः श्रोत्रियभार्य्ययोरवकिरणे ज्ञेयम् ।

यत्तु पैठीनसिः—' अवकीर्णी गर्दभाजिनं वसेत्संवत्सरं प्राजापत्यं चरेत् ' इति, तन्मान्यशूद्रभार्याविषयम् ।

स्वैरिण्यादिभिरवकिरणे त्वाहतुः शंखलिखितौ—' स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नात उदकुम्भं दद्यात् । ब्राह्मण्यां वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्, यवसभारं च गोभ्यो दद्यात् । क्षत्रियायां त्रिरात्रमुपोषितो घृतपात्रं दद्यात् । ब्राह्मण्यां षड्रात्रमुपोषितो गां दद्यात् । गोष्ववकीर्णः प्राजापत्यं चरेत् । षण्ढायामवकीर्णः पलालभारं सीसकमाषकं च दद्यात् ' इति । कल्पतरौ हारीतः— ' तस्मात्स्त्रीष्ववकीर्णो निर्ऋत्या एव चतुष्पथे गर्दभं पशुमालभेत् । भूमौ पशुपुरोडाशश्रपणमवदानैः प्रचर्य प्राक् स्विष्टकृत आज्यस्य जुहोति । कामावकीर्णोऽस्मि कामकामाय स्वाहा । कामावपन्नोऽस्म्यवपन्नोऽस्मि कामकामाय स्वाहा । कामाभिवृद्धोऽस्म्यभिवृद्धोऽस्मि कामकामाय स्वाहा । कामाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि कामकामाय स्वाहा ।

' सं मा सिंचंतु मरुतः समिंद्रः सं बृहस्पतिः ।
सं मायमग्निः सिंचतु यशसा ब्रह्मवर्चसेन ॥ इति ।

तां छवीमूर्ध्ववालां परिधाय मृन्मयं पात्रमादाय सप्तागारं भैक्षं चरेत् स्वकर्म परिकीर्त्तयन् त्रयोदशे मासे पूतो भवति । ' इति ।

—छवी चर्म ।

विशेषमाह बौधायनः (२।१।३५–४२) ' यो ब्रह्मचारी स्त्रियमुपेयात्सोऽवकीर्णी । स गर्दभं पशुमालभेत । नैर्ऋतः पशुपुरोडाशश्च रक्षोदैवतो यमदैवतो वा । शिश्नात्प्राशित्रमप्स्ववदानैश्चरंतीति विज्ञायते ।

अथावकीर्ण्यमावास्यायामग्निमुपसमाधाय (सम्यक् परिस्तीर्य्य) दार्विहौमकीं परिचेष्टां कृत्वा द्वे आज्याहुती जुहोति-कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा, कामायाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि कामकामाय स्वाहा इति हुत्वा करौ तिर्यगभिमन्त्रयेत् ' सं मा सिञ्चन्तु ' इति ।

–परिचेष्टेतिकर्त्तव्यता ।

स एव– (३।४।१–१०) ' अथ ब्रह्मचर्यव्रत्यभिचरेन्मांसं वाऽश्नीयात्स्त्रियं चोपेयात्सर्वास्वार्तिष्वन्तरागारेऽग्निमुपसमाधाय संपरिस्तीर्य्य प्रायश्चित्ताज्याहुतीर्जुहोति । कामेन कृतं कामः करोति कामायैवेदं सर्वं यो मा कारयति तस्मै स्वाहा । मनसा कृतं मनः करोति मनस एवेदं सर्वं ० । रजसा कृतं रजः करोति रजस एवेदं ० । तमसा कृतं तमः करोति तमस एवेदं ० । पाप्मना कृतं पाप्मा करोति पाप्मन एवेदं ० । मन्युना कृतं मन्युः करोति मन्यव एवेदं ० । जयाप्रभृतिसिद्धमा धेनुवरप्रदानात् । अपरेणाग्निं कृष्णाजिनेन प्राचीनग्रीवेणोत्तरलोम्नाकृत्य वसति । व्युष्टायां जघनादात्मानमपकृष्य तीर्थं गत्वा स्नात्वा आचम्याभिमंत्र्याद्भिर्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वान्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वोत्तीर्य्य वासः पीडयित्वाऽन्यद्धौतं वासः परिधायाचम्य प्रसिद्धमादित्योपस्थानात् कृत्वा आचार्यस्य गृहानेति ' ।

जयापदेन जयाहोमाः, प्रभृतिना ' अग्निर्भूतानामधिपतिः ' (तै. सं. ३।४।५) इत्यादिसाङ्ग्याः होमाः । अतो जयाहोमाद्धेनुवरप्रदानान्तमत्र कुर्यादित्यर्थः । अपरेणाग्निमग्निपश्चिमभागे । वसती-

---

१ ' चित्तं च स्वाहा ' (तै. सं. ३।४।४) इत्यादयो जयाः ।

२ एते अभ्यानातसंज्ञाः ।

त्यस्याग्रे रात्राविति शेषः। व्युष्टायामिति उषःकाले, जघनात् कृष्णाजिनजघनप्रदेशादात्मानमपकृष्य निःसार्येत्यर्थः।

शङ्खलिखितौ– 'सप्तरात्रेणावकीर्येद्वैक्षाग्निकार्ये कुर्वन्सद्यः कामादुत्सर्गे रेतसोऽन्यत्र स्वप्नात्तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहुयादौपूर्विकाभिः संवत्सरं वा नक्तं भैक्षं चरेत्। चतुर्थकाले मितभुक् गायत्रीं वा वत्सरानुगां जपेत्' इति।

महाव्याहृतिहोमोऽत्र लघुत्वाद्वैक्षाग्निकार्याकरणे। संवत्सरं वेत्यादिना च प्रायश्चित्तद्वयमुक्तं तत्पूर्वोक्तसंवत्सरव्रतसमानविषयम्। वत्सरानुगां वत्सरपर्यन्तमित्यर्थः।

स्वप्ने रेतस उत्सर्गे मनुविष्णू— (म. २।१८१ वि. २८।५१ स्कं. पु. का. खं. ३६।६०)

'स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वाऽर्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥'तै.आ.१।३०।१

दिवा स्वप्ने उत्सर्गे बलादुत्सर्गे च नैर्ऋतयागमात्रम् 'एतदेव रेतस उत्सर्गे दिवा स्वप्ने वा' (२३।२) इति वसिष्ठेन यागमात्रातिदेशात्। कृच्छ्रचान्द्रायणादिव्रतान्तरेष्वतिदिष्टब्रह्मचर्येषु रेतःस्कन्दनेऽपीदमेव। 'व्रतान्तरेषु चैवम्' (२३।२) इति तेनैवातिदिष्टत्वात्। इदमेव च दीक्षितस्यापि।

वानप्रस्थयत्योरपि रेतःस्कन्दने आह शाण्डिल्यः—

'वानप्रस्थो यतिश्चैव खण्डने सति कामतः।
पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत्॥'

इदं च ब्रह्मचर्यातिदेशेऽवकीर्णिव्रतं गुरुत्वात् परस्त्रीगमन एव।

कश्यपः— (६।११)

'सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत्।
वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणम्॥'

स्त्रीसम्भोगमन्तरेण कामादुत्सर्गे तु कण्वः—

'यत्नोत्सर्गे गृही कृत्वा वारुणीभिरुपस्पृशेत्।
वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणत्रयम्॥'

सप्तरात्रं सन्ध्यादित्यागेनावकीर्णत्वे तु बृहस्पतिः—

'सन्ध्योपासनमुद्दिष्टं प्रथमं ब्रह्मचारिणः ।
अग्नीन्धनं भैक्षचर्यां चैतत्कुर्वीत प्रत्यहम् ॥
अत्र त्रयस्याकरणाद्व्रती रोगविवर्जितः ।
अवकीर्णिव्रतं कुर्यात्सप्तरात्रं न संशयः '

याज्ञवल्क्योऽपि– (३।२८१)

'भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः
'कामावकीर्ण' इत्याभ्यां हुत्वा चाज्याहुतिद्वयम् ॥
उपस्थानं ततः कुर्यात्सं मा सिंचन्त्वनेन तु ।'

'कामावकीर्ण' इत्येतौ पूर्वमुक्तौ, 'सं मा सिंचन्तु' इति च। इदं च कार्यव्यासङ्गादिनाऽग्न्यादित्यागे । तदभावे तु–

'अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥' (२।१८७)

इति मनूक्तं बोध्यम् ।

नैष्ठिके विशेषमाह हारीतः–

'उपकुर्वाणस्तु यत्कुर्यात्कामतोऽकामतोऽपि वा ।
तदेव द्विगुणं कुर्याद्ब्रह्मचारी तु नैष्ठिकः ॥' इति ।

एतानि चावकीर्णिप्रायश्चित्तानि त्रैवर्णिकस्यापि ब्रह्मचारिणः समानानि ।

'अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु ।
इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यन्त्यब्दात्समाहिताः ॥'

इति शाण्डिल्योक्तेः ।

---

१ इदं चावकीर्णिप्रायश्चित्तं गुरुदारतत्समव्यतिरिक्तागम्यागमनविषयम् ; तत्र गुरुप्रायश्चित्तस्य दर्शितत्वात् ।... न चात्रागम्यागमनप्रायश्चित्तं पृथक्कर्तव्यम् ; ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्यागमनेन नान्तरीयकत्वात् ।... ननु ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्यागमननान्तरीयकत्वं नास्त्येव; पुत्रिकागमनेऽगम्यागमनदोषाभावात् ... इति, तदसत् ; पुत्रिकाया अपि परभार्यास्वन्तर्भावात् । प्रदानाभावेऽपि विवाहसंस्कारेण संस्कृतत्वात्, गान्धर्वादिविवाहपरिणीतावत् ।—मि. (३।२८०) ।

—द्विजो विप्रः। अत्र यदगम्यागमनप्रायश्चित्तमेतत्प्रायश्चित्तात्समं न्यूनं वा, तस्यानेनैव सिद्धिः। यत्त्वधिकं, तेनैवास्य सिद्धिः। गर्दभयागस्तु पृथगेव कार्य इति।

ब्रह्मचारिणो वेदव्रतान्याम्नातानि, तेषां लोपे प्रायश्चित्तमाहात्रिः[1]—

'पिता भ्राताऽपरो वाऽपि प्राजापत्यत्रयं चरेत्।
महापगासु संस्नाप्य 'पाहि नो अग्न' आहुतीः॥
पंचभिरिदमाहान्तव्रतलोपे कृते सति।' इति।

संवत्सरमध्य एव व्रतलोप एतत्प्रायश्चित्तमिति केचित्। महानाम्न्यादिव्रतलोपे प्रायश्चित्तपूर्वकं तानि समावर्त्तनदिन एव कार्याणीति प्रयोगपारिजाते।

व्यासोऽपि—

'वेदव्रतानि कृत्त्वैवं तथैवारण्यकव्रतम्।
स्वशाखाविहितं सर्वं कृत्वा वेदमुपक्रमेत्॥
अकृत्वेमानि सर्वाणि वेदो वाऽभ्यस्यते यदि।
प्रायश्चित्तानि कृत्वैव व्रतान्यपि तथा क्रमात्॥
गोदानिकं ततः कृत्वा समावर्त्तनमारभेत्।' इति।

तत्र प्रायश्चित्तमाह शौनकः—

'व्रतानि विधिवत्कृत्वा स्वशाखाध्ययनं चरेत्।
अकृत्वाऽभ्यस्यते येन स पापी विधिघातकः॥
कृच्छ्रं द्वादशरात्रं तु चरित्वाज्याहुतीः शतम्।
हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनकः॥'[2]

---

१ ब्रह्मचारिणो व्रतानि ऋग्वेदिनाम्—'प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम्। तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परम्॥ इति, यजुर्वेदिनाम्—प्राजापत्यैन्द्राग्नेयसौम्यानि, सामवेदिनाम्— केशान्तगोदानमहानाम्नीज्येष्ठसामव्रतानि, आथर्वणानाम्— गोदानसावित्रीव्रतवेदव्रतविसर्जनव्रतानि।— द्वै. नि. वाचस्पतिमिश्रः।

२ प्रत्येकं कृच्छ्रमेकैकं— नि. सि.

देवलोऽपि व्रतान्युपक्रम्य–

'कालातिक्रमणे कुर्यात्प्रायश्चित्तं विधानतः ।
कृच्छ्रं द्वादशरात्रं तु हुत्वा चाज्याहुतीः शतम् ॥
अष्टाविंशतिमष्टौ वा क्रमात्कुर्याद्व्रतानि हि ।
व्यत्यये यावदभ्यस्तं वेदं तावत्पुनः पठेत् ॥' इति ।

एतच्च कामतः ।

रागादावबुद्धिपूर्वं त्यागे तु मनुः— (२१।२०३)

'वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥' इति ।

इति व्रतलोपप्रायश्चित्तम् ।

अथ परिवेदनम् ।

मनुः– (३।१७१)

'दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥'

गार्ग्योऽपि—

'सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम् ।
आवसथ्यं तथाधानं पतितस्त्वन्यथा भवेत्' इति ॥

सोदर्यग्रहणादसोदर्ये न दोषः ।

तदाह शातातपः–(४२)

'पितृव्यपुत्रसापत्नपरनारीसुतेषु च ।
ज्येष्ठेष्वपि च तिष्ठत्सु भ्रातॄणां तु कनीयसाम् ॥
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ।'

— परनारीसुताः क्षेत्रजदत्तकाद्याः । पुत्रदानेन प्रतिग्रहीतृकुले पितृत्वपुत्रत्वादिप्रयुक्तकार्य्यप्रवृत्तिर्जनककुले च तन्निवृत्तिः सप्रमाणमुक्ता

१–आवसथ्यो गृह्यः, शालाग्निरित्यनर्थान्तरम् ; तस्याधानं स्थापनमात्मसात्करणमिति यावत्— कर्कः ।

व्यवहारमयूखे (पृ.७१-७४)। तेन दत्तकसोदरस्यापि कनिष्ठस्य दत्तकमुत्क्रम्योद्वाहे न दोषः।

शातातपः- (४१)

'क्लीबे देशांतरस्थे च पतिते भिक्षुकेऽपि वा
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥'

-भिक्षुको यतिः। योगशास्त्राभियुक्तो विरक्तः।

कात्यायनोऽपि-(१।६।४-७)

'देशांतरस्थक्लीबैकवृषणानसहोदरान्।
वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥
जडमूकांधबधिरकुब्जवामनषण्डकान्।
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा।
कुहकांस्तस्करांश्चापि परिविंदन्न दुष्यति ॥'

-षण्डको भग्नचरणद्वयः। अभार्यो मृतभार्यः। कामतोऽकारिणः स्वेच्छयैव नित्यं विवाहमकुर्वाणाः। अत्र ये सर्वात्मना विवाहानधिकारिणः क्लीबादयस्तेषु सत्सु कालविशेषमन्तरेणापि परिवेदने न दोषः।

१-अत्र सिन्धुटीका—'सोदरो हि त्रिविधः—एकमातृपितृभयजः, एकमातृमात्रजश्च, एकपितृमात्रजश्चेति। तत्र आद्य औरसः, द्वितीयः क्षेत्रजः, तृतीयो भिन्नोदर्यः। तत्रान्त्ययोस्त्रिकाण्डमण्डनेनाधिकाराविघात उक्तः—'क्षेत्रजादावनीजाने विद्यमानेऽपि सोदरे। नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे॥' इति। न तु प्रथमे, 'सोदर्ये तिष्ठति ज्येष्ठे—' इति वचने हि समानमुदरं यस्येति सोदरः, स एव सोदर्य इति व्युत्पत्तेरभिन्नोदरोत्पन्नत्वलाभात्। इदं च मातापित्रोः, मातापितृभयमेव वा। एवं च तादृशो निषेधस्य विषयः। अन्यादृशो मण्डनकारिकाविषयः। तथा च-यथा दत्तककनिष्ठस्य दत्तकविवाहाधाने विना न तत्राधिकारः, एवं दत्तकस्य कनिष्ठस्य सोदरज्येष्ठेऽकृतविवाहाधाने न तत्राधिकार इति भावः॥ यत्तु महाभारतादावनिविष्टे युधिष्ठिरेऽर्जुनस्य द्रौपदीविवाहविलम्बनम्, तदर्जुनस्यानौरसत्वात्। सजातीयेष्वेव लाघवेन निषेधप्रवृत्तेः।—इति।

२-ख- खोड- खोट- खेट इ. पाठाः।

३-कुटिलोन्मत्तचोरांश्च। स्मृ. चं.—नि. सिं. टी.।

४—अभार्या नैष्ठिकब्रह्मचारिणः— स्मृ. चं.

ये तु कालांतरेऽपि संभावितविवाहाधिकारा विरक्तवेश्यातिसक्तशूद्र-तुल्यकृषिसक्तराजपरतंत्रधनवृद्धिप्रसक्तकामतोकारिकुहकतस्कराः, तेषु तत्त्वभावत्वावधारणे न दोषः।

देशांतरस्थे विशेषमाह वृद्धवसिष्ठः– 'अष्टौ दश द्वादशवर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्तीभवति' इति। धर्मार्थमर्थार्थं विद्यार्थं वा देशांतरस्थे द्वादशवर्षं प्रतीक्षा कार्यांतरार्थं त्वष्टौ दश वा' इति।

तथा च स एव—

'द्वादशैव तु वर्षाणि ज्यायान्धर्मार्थयोगतः।
न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनः॥'

इति हेमाद्रिः।

शूलपाणिस्तु–'द्वादशवर्षाणि ब्राह्मणस्य विद्यासंबंधेन' (२।९।१७) इति गौतमवाक्ये ब्राह्मणग्रहणात्स एव द्वादशवर्षाणि प्रतीक्ष्यः, क्षत्रियवैश्यशूद्रास्तु दशाष्टौ षट् इति, तत्तुच्छम्; अश्रुतषट्कल्पनायां प्रमाणाभावात्; धर्मार्थयोश्च क्षत्रियादावपि संभवादिति।

विवाहे तु ज्येष्ठानुज्ञायामपि दोषमाह हारीतः—

'सोदराणां च सर्वेषां परिवेत्ता कथं भवेत्?।
दारैस्तु परिवेद्यंते नाग्निहोत्रेण नेज्यया॥' इति।

अथ प्रायश्चित्तम्।

वसिष्ठः– (२०।९) 'परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्विविशेत्'।

अत्रापरार्के कनिष्ठेनोढां ज्येष्ठ उद्वहेत्, अशास्त्रीयविवाहेन कनिष्ठ-निरूपितभार्यात्वानुत्पत्तेर्ज्येष्ठोद्वाहयोग्यत्वात्; कनिष्ठस्त्वन्यामुद्वहेदिति। तन्न; 'तां चैवोपगच्छेत्' (वसि. २०।८) इति विज्ञानेश्वरोक्तवाक्य-शेषात्। भार्यात्वानुत्पत्तिस्तु कनिष्ठोद्वाहेऽपि साधिका।

स्पष्टं च हारीतेन ज्येष्ठस्याब्दं व्रतमुक्त्वाऽन्योद्वाह एवोक्तः—

'समाप्तेऽब्दे तां कन्यां ज्येष्ठायोपपादयेयुः। स तामनुमान्यान्यया निविशेतैवं धर्मो न लुप्यत' इति।

तस्मात्परिवेत्ता कृच्छ्रातिकृच्छ्रोत्तरं स्वोढां ज्येष्ठाय ब्रह्मचार्याहृतभैक्ष-वद्गुरुपरिभवपरिहारार्थं निवेद्य तेनानुज्ञातां तामेवोद्वहेदिति वासिष्ठार्थः।

यत्तु सुमंतुः परिवेत्रादिपंचानां द्वादशरात्रं सक्तुप्राशनमुक्त्वा कनीयसं-प्रत्याह– 'न भूयश्चैनामभिगच्छेत्' इति, तत्पुनर्विवाहात्प्राग्वेदितव्यम्। तत्रैवं व्यवस्था–सन्निधावकामतः कृच्छ्रातिकृच्छ्रौ। याज्ञवल्क्यीयं वक्ष्यमाणमुपपातकसामान्यव्रतचतुष्टयं च वर्णशक्त्याद्यपेक्षया योजनीयम्। कामतः सन्निधौ कन्यापित्राद्यनुज्ञायां संवत्सरमिति।

अत्रैव शंखः–'परिविन्तिः परिवेत्ता च संवत्सरं द्वादशरात्रं भैक्षं चरेयाताम्' इति। कामतः पित्राद्यनुज्ञातोद्वाहे तु मानवं त्रैमासिकम्।

यत्तु विष्णुः– (५४।१६) 'परिविन्तिः परिवेत्ता च यया च परिविद्यते। तदाता याजकश्च चांद्रायणं कुर्युः' इति; तत्कृच्छ्रातिकृच्छ्रविषयम्।

यत्तु यमः—

'कृच्छ्रौ द्वयोः परिवेद्ये कन्यायाः कृच्छ्र एव च।
अतिकृच्छ्रं चरेदाता होता चांद्रायणं चरेत्॥' इति।

तदज्ञानतः क्षत्रियविषयम्। द्वयोः परिवेत्तृपरिवित्त्योः प्रत्येकं द्वौ कृच्छ्रौ।

यत्तु सुमंतुः— 'परिविन्तिपरिवेत्तृकन्यादातृयाजकानां द्वादशरात्रं सक्तुप्राशनं ब्राह्मणतर्पणं च। तां पुनर्भवमाचक्षते। न भूयश्चैनामभिगच्छेत्' इति। तच्छूद्रपरम्।

प्रसंगादुच्यते। देवलः—

'ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा।
या साऽग्रेदिधिपूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता॥' इति।

प्रायश्चित्तमाह वसिष्ठः–(२०।१०) 'अग्रेदिधिपूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेत्। दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेत' इति।

---

१ याजको विवाहहोमकारकः, आधानकारकः, यज्ञकारकादिश्च। 'परीष्टिदोषसम्प्राप्तौ न यष्टव्यं कदाचन। दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसङ्ग्रहम्॥ अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम्। न कुर्याज्जनके ज्येष्ठे सोदरे वाप्यकुर्वति॥' इति त्रिकाण्डमण्डनाभिधानात्।—कृ. भ.

'अग्रेदिधिषूपतिः प्राजापत्यं चरित्वा तामेव ज्येष्ठां पश्चादन्येनोढामुद्वहेत्। दिधिषूपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां कनीयस्याः पूर्वं विवोढे दत्त्वाऽन्यामुद्वहेत्' इति मिताक्षरायां कल्पतरौ च। व्याख्यांतरमपि स्मृत्यर्थसारे—'कनिष्ठापतिः द्वादशरात्रं कृत्वा तां स्वोढामेव ज्येष्ठोद्वाहे जाते उद्वहेत्। ज्येष्ठापतिस्तु कृच्छ्रातिकृच्छ्रे कृत्वा स्वोढां कनिष्ठापतये ब्रह्मचार्याहृतभैक्षवन्निवेद्य तदनुज्ञातां ज्येष्ठामेवोद्वहेत्' इति। अपरार्के तु— अग्रेदिधिषूपतिस्थाने दिधिषूपतिरिति पठितं दिधिषूपतिस्थाने त्वग्रेदिधिषूपतिरिति। तथा च प्रायश्चित्तविकल्प इति।

यत्तु गौतमः— 'परिवित्तिपरिवेत्तृपर्याहितपर्याधात्रग्रेदिधिषूपतिदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यम्' इति, तत्परिवेत्तृसंवत्सरसमानविषयम्।

पर्याहितपर्याधात्रोः स्वरूपमुक्तं संवर्तेन—

'अनाहिताग्नौ ज्येष्ठे तु कनीयानादधीत चेत्।
पर्याधाता कनिष्ठः स्याज्ज्येष्ठः पर्याहितः स्मृतः॥'[1] इति।

इति गुरुतल्पप्रसक्तानुप्रसक्तप्रायश्चित्तानि।

अथ संसर्गप्रायश्चित्तम्।

तत्र संसर्गभेदानाह बृहस्पतिः—

'एकशय्यासनं पंक्तिर्भाण्डपंक्त्यन्नमिश्रणम्।
याजनाध्यापने योनिस्तथा च सहभोजनम्॥
नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैः सह।' इति

योनिः पातकिने कन्यादानम्, तत्कन्यापरिणयनं वेति विज्ञानेश्वरकल्पतरुकारादयः। पातकिस्त्रीगमनमित्यपरार्कशूलपाणी। योगापरित्यागात्त्विदमेव युक्तम्।

छागलेयः— (ग. पु. पू. ११५।६)

'आलापाद्व्रात्रसंस्पर्शान्निःश्वासात्सहभोजनात्।
संहशय्यासनाद्यानात्पापं संक्रमते नृणाम्॥' इति।

---

१ 'आसनादेकशय्यायां भोजने पङ्क्तिसङ्करात्। ततः सङ्क्रमते पापं घटाद्घट इवोदकम्॥' (ग. पु. पू. ११६।८)

देवलः–(३३)

'संलापस्पर्शनिःश्वाससहयानासनाशनात् ।
याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम् ॥ ' इति ।

वसिष्ठः–(२०।५०) ' पतितसंप्रयोगे तु ब्राह्मेण वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उपलब्धास्तासां परित्यागस्तैश्च न संपिवेत् ' इति। –मात्रा द्रव्यम् ।

एतेषां कर्मणां मध्ये केन कर्मणा कियता कालेन पातित्यं ? तदाह विष्णुः–(३५।३–५) ' संवत्सरेण पतति पतितेन सहाचरन् । एकयानभोजनासनशयनैः । यौनसांवमुख्यैस्तु संबंधैः सद्य एव ' इति । मुख्यो मुखभवोऽध्ययनमध्यापनं च । एकामत्रभोजनेऽपि सद्यःपातित्यम्-

'याजनं योनिसंबंधं स्वाध्यायं सहभोजनम् ।
कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥ ' (३४)

इति देवलोक्तेः । यौनसांवमुख्यैरिति सत्यपि द्वंद्वनिर्देशे प्रत्येकमेवैषां पातित्यहेतुत्वम् । ' यः पतितैः सह यौनमुख्यसांवाणामन्यतमं संबंधं कुर्यात्तस्याप्येतदेव प्रायश्चित्तम् ' इति सुमंतूक्तेः । कल्पतरौ तु–' यश्चैतैर्यौनमौख्यसांवाणां संबंधानामन्यतमेन सह संवत्सरं संपर्कमियात्तस्याप्येतदेव प्रायश्चित्तम् ' इति पाठः । तत्रात्यंतापद्यज्ञानतः पंचमहायज्ञादियाजनम्, तथैवांगाद्यध्यापनम्, तथैव योनिसंबंधो व्यवहितो विवाहसंबंधश्चेति ज्ञेयम् । एतेन—

'संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनादेकशय्यैकभोजनात् ॥ '

इति हारीतीयं

'षाण्मासिके तु संसर्गे याजनाध्यापनादिभिः ।
एकत्राशनशय्याभिः प्रायश्चित्तार्द्धमाचरेत् ॥
संवत्सरेण संस्पर्शे योनियुक्ते विशेषतः ।
पूर्वोक्तेन विधानेन पतितव्रतमाचरेत् ॥ '

इति च बाहुल्यपत्यं व्याख्यातम् ।

जिनकस्तु-समुच्चितानामेव याजनादीनां सद्यःपतनहेतुत्वम् ; प्रत्येकहेतुत्वं तु संवत्सरसंसर्ग-इति युक्तमूचे । परंतु तद्ग्रंथविरुद्धम् ।

कौर्मे–(ब्र. सं. उ. ३०।१०–११)

'याजनं योनिसंबंधं तथैवाध्यापनं द्विजः ।
कृत्वा सद्यः पतेज्ज्ञानन्सह भोजनमेव च ॥
अज्ञानादथ वा मोहात्कुर्यादध्यापनं द्विजः ।
संवत्सरेण पतति सहाध्ययनमेव च ॥ ' इति ।

द्वितीयवचनमंगाद्यध्यापनपरम् ।

चौधायनः—(२।१।८८)

'संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनात्सद्यो न शयनासनात् ॥ ' इति ।

शयानात्स सद्यो न, किंतु संवत्सरेणेति संबंधः । एतेन—

'संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानाशनासनात् ॥ ' (११।१७९)

इति मानवमपि व्याख्यातम् । पैठीनसिस्तु–' न त्वेकशयनासनात् ' इत्यंतपादं पपाठ । अत्र ज्ञानकृत एव संसर्गे पातित्यं नाज्ञानकृते;

'संवत्सरं तु पतितैः संसर्गं कुरुते तु यः ।
यानशय्याशनैर्नित्यं जानन्वै पतितो भवेत् ॥ '

(ब्र. सं. २।३०।९)इति कौर्मोक्तेः,

'पतितेन सहोषित्वा जानन्संवत्सरं द्विजः ।
मिश्रितस्तेन सोऽब्दांते स्वयं च पतितो भवेत् ॥ '

इति देवलोक्तेश्च ।

अत्र संवत्सरमित्यत्यंतसंयोगवाचिद्वितीयाश्रुतेः षष्ट्यधिकशततत्रयदिन-व्यापिन्येव संसर्गे पातित्यं भवति, न तु तन्न्यूनत्वे–इति विज्ञानेश्वरादयः । अत एव—

'संवत्सरेण पतति पतितेन सहाचरन् ।
भोजनासनशय्यादि कुर्वाणः सार्वकालिकम् ॥ ' (३५)

इति देवलीयं सार्वकालिकपदमपि संगच्छते । ब्रह्महादिचतुष्टयसंसर्ग एव च महापातकं, न तु संसर्गिसंसर्गोऽपि ।

'ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः ।
एते महापातकिनो यश्च तैः सह संवसेत् ॥ ' (३।२२७)

इति याज्ञवल्क्यीयादिषु 'तैः' इति सर्वेनाम्ना ब्रह्महादिचतुर्णामेव परामर्शात्।

'संवत्सरेण पतति पतितेन सहाचरन्।'

इत्यादिषु पतितपदमपि ब्रह्महादिचतुःपरमेव। दोषस्तु संसर्गिसंसर्गोऽप्यस्त्येव;

'एनस्विभिरनिर्णिक्तैर्नार्थं कंचित्समाचरेत्' (२१।१८९)

इति मनूक्तेः।

अयं तु संसर्गस्त्रिविधः—उत्तमो मध्यमः कनीयांश्च। तत्राद्यश्चतुर्द्धा—यौनस्त्रौवमौरवैकपात्रभोजनभेदात्। मध्योऽपि—एकयानासनशय्यैकपङ्क्तिभोजनभेदाच्चतुर्द्धा। अंत्यस्तु—संलापस्पर्शनिःश्वासैकभांडपंक्तितदीयान्नभोजनतत्प्रतिग्रहतत्स्पृष्टान्नभोजनादिभेदादनेकविध इति निबंधकृतः।

क्वचित्संसर्गदोषमपवदति वसिष्ठः—(१३।२०—२१) 'पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः। सा हि परगामिनी भवति। तामरिक्थामुपयच्छेत' इति।

याज्ञवल्क्योऽपि—(३।२६१)

'कन्यां समुद्वहेद्देषां सोपवासामकिंचनाम्।' इति।

सोपवासां कृतसंसर्गानुरूपप्रायश्चित्तामिति विज्ञानेश्वरः। तन्न; अकृतसंसर्गायाः प्रायश्चित्ताभावेन नित्यवच्छ्रवणविरोधात्। अतस्तस्या नित्यं पूर्वेद्युरुपवासोऽनेन विधीयते। अकिंचनां अगृहीतपितृस्वादिकाम्।

वृद्धहारीतः—'पतितस्य कुमारीं विवस्त्रामहोरात्रोपोषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां नाहमेतेषां न ममैत—इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्वहेत्' इति

उद्वहेदित्यनेन स्वयमेव त्यक्तपतितसंसर्गामुद्वहेन्न पुनः पतितात् प्रतिगृह्णीयादिति लभ्यते।

पातक्युत्पन्नयोः स्त्रीपुमपत्ययोः प्रायश्चित्तमाह बौधायनः—(२।१।७३—७४) 'अशुचिशुक्रोत्पन्नानां तेषां शुद्धिमिच्छतां प्रायत्यं पत्नीयानां तृतीयोंऽशः स्त्रीणामंशात्तृतीयम्॥' इति।

–प्रायत्यं प्रायश्चितम्। पतनीयानां–नरके पतंतीति पतनीयाः, कर्तर्यनीयर्। कृत्यल्युटो बहुलम्[1] (पाणि. ३।३।११३) इति स्मृतेः। कर्मप्रवचनीयवत्। तेन पतितोत्पन्नस्य पुत्रस्य तृतीयोंऽशः। कन्यायास्तु न तृतीयोंऽशो मौलिकनवमांश इति यावत्।

यत्तु पराशरः–(१।२५–२६)

'त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्।
द्वापरे कुलमेकं तु कर्त्तारं तु कलौ युगे॥
कृते संभाषणादेव त्रेतायां स्पर्शनेन च।
द्वापरे त्वन्नमादाय कलौ पतति कर्मणा॥' इति।

तत्राद्यश्लोके कर्त्तारं त्विति तुशब्देनैवकारार्थेन पूर्वप्रकृतयुगभेदेन व्यवस्थयोक्तं देशग्रामकुलसंसर्गत्रयमेव वार्यते, न त्वप्रकृतो याजनादिसंसर्गोऽपीति। द्वितीयश्लोकेऽपि कृते सम्भाषणादेवेत्येवकारेणोत्तरवाक्यद्वये च तदनुषङ्गेण– कृते सम्भाषणमात्रात्पतति, त्रेतायां स्पर्शमात्रात्, द्वापरे तु तत्स्वामिकान्नप्रतिग्रहमात्रात्, कलौ तु कृत्स्नेन निषिद्धकर्मणा याजनादिभिरित्यर्थः। अन्यथा-पूर्ववाक्ये 'कर्त्तारं तु कलौ त्यजेत्' इत्यनेन साक्षाद्धन्त्रादेः संसर्गो निषिद्धः; द्वितीयवाक्ये तु 'कलौ पतति कर्मणा' इत्यनेन साक्षात्कर्त्तुरेव दोषः, न संसर्गकर्त्तुरिति परस्परविरोधः स्यात्!। एवं च माधवस्य कलौ संसर्गदोषाभावोक्तिरत्रैव तात्पर्यम्। तथा च कलिनिषिद्धेषु 'संसर्गदोष' इत्युक्तिः– यो देशादिमात्रसंसर्गः कृतयुगादौ दोषजनकत्वेनोक्तः पाराशरपूर्वश्लोके, यश्चोत्तरश्लोके कृतयुगादौ सम्भाषणमात्रादोष उक्तः,— तद्विषयो।

---

१ बहुलग्रहणादित्यर्थः। कर्मप्रवचनीय इत्युदाहरणम्।

२ अन्ये तु– 'त्यजेद्देशं कृतयुगे' इत्याद्युक्तदेशादित्यागस्य, 'कृते सम्भाष्य पतति' इति सम्भाषणादिजन्यपातित्यस्य वा न निषेधः, कलौ युगान्तरोक्ताप्राप्तेर्निषेधासम्भवात्। तस्मात् 'कलौ पतति कर्मणा' इति कलौ कर्मणा ब्रह्महननादिना पतति, न तु संसर्गेणेति व्याख्येयम्। इदानीन्तनानां संसर्गनिमित्तकप्रायश्चित्ताचरणं च पापक्षयार्थमेवेति ग्रन्थं समर्थयन्ते।—

अथ प्रायश्चित्तम् ।

मनुः—(११।१८१)

'यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ॥' इति ।

पतितपदं पापिमात्रोपलक्षकम्,

'संसर्गी येन संसर्गं कुर्यात्तद्व्रतमाचरेत् ।'

इति जाबालोक्तेः । मतिपूर्वेऽपि संसर्गे न मरणातिदेशः, किंतु द्वादशाब्दस्यैव; व्रतपदात् । अत्र च सत्यप्यतिदेशे पूर्णमेव द्वादशाब्दं

— अत्र केचिदुपन्यस्यन्ति— पापस्याव्यवहार्यत्वं नरकोत्पादकत्वम्; 'द्विजातिकर्मभ्यो हानिः पतनम्' (.३।३।४) इति गौतमात्, 'अधोऽधः पतनात् पुंसां पातकं परिकीर्तितम् । नरकाग्निषु घोरेषु पतनात् पापमुच्यते ॥' इति भविष्याच्च । तत्र नरकोत्पादकत्वसत्वेऽप्यव्यवहार्यत्वं नास्तीति कथमुच्यते ?। न च प्रायश्चित्तेन नरकोत्पादकत्वेऽपि व्यवहारनिरोधिकाया नाशवदेतदिति वाच्यम्, वैषम्यात्। तथा हि— अकामकृतस्य महापापादेः प्रायश्चित्तेन नाशः, कामकृते तु व्यवहार्यतामात्रम्; 'प्रायश्चित्तैः (याज्ञ.३।२२६) इति शास्त्रात्, 'विहितं यदकामानां' (पृ. १२) इति वचनान्यथानुपपत्तेश्च । इह तु 'पतितेन सहोषित्वा' (पृ. १८५) इति देवलोक्तेः संसर्गिणोऽप्यब्दान्ते पातित्येन प्रायश्चित्तं विना व्यवहाराङ्गीकारासम्भवात् ब्रह्महननादिना शक्तिद्वयवत्पापं जायते, संसर्गेण त्वेकशक्तिमत्पापमित्यत्र नियामकाभावाच्च । महापापे मरणान्तस्य प्रायश्चित्तत्वे व्यवहारानुपयोगित्वाच्चरकनिवर्तकमात्रं परिशेषात्तु व्रतात्मकं व्यवहारोपयोगि, प्रकृते तु व्यवहारस्य प्रागेव सिद्धत्वात्तद्भङ्ग इत्यादिदूषणगणापत्तेः; 'कामतोऽव्यवहार्यस्तु' (याज्ञ.३।२२६) इत्यत्राकारप्रश्लेषेणाव्यवहार्यत्ववादिनां शङ्कराचार्याणां संसर्गपात्ये व्यवहाराभावस्येष्टत्वात् । तस्मात् 'संसर्गदोष' इत्यस्य ब्रह्महननादौ प्रायश्चित्ते कृतेऽपि व्यवहाराभावः; संसर्गे तु कलौ प्रायश्चित्ते कृते स नास्तीत्येवार्थ— इति ।

'संसर्गदोष' इत्यत्र संसर्गपदं संसर्गिसंसर्गपरम्, 'कर्तारं तु कलौ युगे' इति कर्तृत्यागविधिना तत्संसर्गे दोषप्रत्ययात् । 'कलौ कर्तैष' इति तु साक्षात् संसर्गिणः पातित्याभावव्यञ्जकमिति तु भट्टदिनकरः ।—कृ. भ.

१ न हि मरणस्य व्रतशब्दवाच्यत्वमस्ति, येन तस्यातिदेशसम्भवः । तस्मादुक्तैव व्याख्या गरीयसी ।—प्रा. मु.

भवति, 'द्वादशभिर्वर्षैर्महापातकिनः पूयन्ते' इति हारीतोक्तेः। न चेदं संसर्गिभिन्नमहापातकिपरम्,

'रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः।
व्रतेनैतेन शुद्ध्यन्ति महापातकिनस्त्विमे॥' (१७।३)

इति शङ्खवाक्येनोपसंहारादिति वाच्यम्; महापातकसंज्ञाया आनर्थक्यापत्तेः। शङ्खवाक्यं तु संसर्गिणोऽप्युपलक्षणार्थम्। कामकृते ब्रह्मवधे तत्संसर्गेऽपि च कामकृते मरणतुल्यचतुर्विंशत्यब्दं, अकामतस्तु द्वादशाब्दमिति केचित्। विज्ञानेश्वरादयस्तु चतुर्विंशत्यब्दस्य मरणतुल्यत्वे मानाभावात्कामकृते वधे संसर्गे च द्वादशाब्दमेव। अकामकृते तु षडब्दमित्याहुः। अकामतः सद्यःपतनहेतुसंसर्गे तु वसिष्ठः—(२०–५०)

'पतितसम्प्रयोगे तु ब्राह्मेण वा सौवेण वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उपलब्धास्तासां परित्यागस्तैश्च न संवसेदुदीचीं दिशं गत्वाऽनश्नन् सांहितामधीयानः पूतो भवति' इति।

पराशरः (४।८–१३)

'संसर्गमाचरन्विप्रः पतितादिष्वकामतः।
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा॥
मासार्द्धं मासमेकं वा मासत्रयमथापि वा।
अब्दार्द्धमब्दमेकं वा भवेदूर्ध्वं तु तत्समः॥
त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्।
चरेत्सान्तपनं कृच्छ्रं तृतीये पक्ष एव तु॥
चतुर्थे दशरात्रं स्यात्पराकः पञ्चमे मतः।
षष्ठे चान्द्रायणं कुर्यात्सप्तमे त्वैन्दवद्वयम्॥
अष्टमे वा तथा पक्षे षण्मासान् कृच्छ्रमाचरेत्।' इति।

ऊर्ध्वमित्यनेन वर्षद्वयव्यापी संसर्गो गृह्यते; अज्ञानतः कृतस्य तादृशस्यैव पातित्यापादकत्वात्। एतानि प्रायश्चित्तान्यकामकृतसंसर्गविषयाणि।

कामकृते तु मिताक्षरायां स्मृत्यन्तरे—

'पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम्।
पराकस्त्वर्द्धमासे तु मासे चान्द्रायणं चरेत्॥

---

१ एषु श्लोकेषु भूयान् पाठभेदो मूले।

मासत्रये तु कुर्वीत कृच्छ्रं चान्द्रायणोत्तरम् ।
षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत् ॥
संसर्गे त्वाब्दिके कुर्यादब्दं चान्द्रायणं ततः । ' इति ।

—आब्दिक इति किंचिन्न्यूने द्रष्टव्यम् । पूर्णे तु द्वादशाब्दविधानात् ।

उशनाः— ' कृतलक्षणैर्हर्शनस्पर्शनसम्भाषणादि वर्ज्जयेत् । दर्शने ज्योतिषां दर्शनं, स्पर्शने हृदयालम्भनम्, सम्भाषणे ब्राह्मणसम्भाषणं, पुनरुपस्पर्शनं च ' इति । कृतलक्षणैः श्वपदादिनाङ्कितैः— पतितैरिति यावत् । स्पर्शनं च परम्परया विवक्षितम्, साक्षात्पतितस्पर्शे स्नानविधानात् ।

यथा मनुः— (५।८४)

' दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति ॥ '

सम्भाषणं द्विचतुराद्यावृत्तम्, सकृत्सम्भाषणे—

' पतितानां च सम्भाषे दक्षिणं श्रवणं स्पृशेत् '

इति लघुप्रायश्चित्तश्रवणात् ।

बृहस्पतिः—

' पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च ।
मासोपवासं कुर्वीत चान्द्रायणमथापि वा ॥ '

अत्र चान्द्रायणमज्ञानाभ्यासे । मासोपवासस्तु ज्ञानाभ्यासे । भोजनं तदन्नस्येति केचित् । एकपङ्क्त्यावित्यपरे । भोजने वर्षस्य पातित्यापादकत्वाद्गृहगमनप्रतिग्रहयोरपि वर्षमेव । इत्थमेव शूलपाणिः । शङ्खः— ' अमेध्यपतितचण्डालपुष्कसरजस्वलावधूतकुणिकुष्ठिकुनखिस्पृष्टान्नानि भुक्त्वा कृच्छ्रमाचरेत् ' इति । इदं च सकृदज्ञानतः । ज्ञानतस्तु कृच्छ्रद्वयम् ।

पतितस्वामिकान्नभोजने त्वाह प्रचेताः—

' पतितान्नं तु यो भुङ्क्ते सप्ताहमुदके वसेत् ।
पानीयपानतश्चैव कुशवारि पिबेन्नरः ॥ '

इदं च सकृदज्ञानविषयम् । पतितामान्नभक्षणे तत्सिद्धान्नभक्षणस्य चतुर्थो भागः, चाण्डालान्नभक्षणे तथा दर्शनात् ।

तथा च विष्णुः– (५१।५७–५८) 'चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत्। सिद्धान्नं भुक्त्वा पराकः' इति।

पतितोच्छिष्टभक्षणेऽङ्गिराः– (२७)

'चण्डालपतितादीनामुच्छिष्टस्य च भक्षणे।
द्विजः शुध्येत्पराकेण शूद्रः कृच्छ्रेण शुद्ध्यति॥' इति।

एतदपि सकृदज्ञानत एव।

मार्कण्डेयः–

'अपाङ्क्तेयस्य यः कश्चित्पङ्क्तौ भुङ्क्ते द्विजोत्तमः।
अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति॥' इति।

अत्र ब्रह्महादिचतुष्टयसंसर्गे पूर्णमेव व्रतमतिदिश्यते। इतरपापिसंसर्गे तु चतुर्थांशोनम्—

'यो येन संपिबेद्दर्षं सोऽपि तत्तुल्यतामियात्।
पादन्यूनं चरेत्सोऽपि तस्य तस्य व्रतं द्विजः॥'

इति व्यासोक्तेः।

इतरपापेषु यो येन पापिना संसृज्यते, स तदीयमेव प्रायश्चित्तं पादोनं कुर्यात्। तेनाद्यः संसर्गी नवाब्दं, द्वितीयः पादोनं सप्ताब्दमित्यादि।

यत्तु महापापविषये विज्ञानेश्वरः–'द्वितीयसंसर्गी पादोनं, तृतीयोऽर्द्धं, चतुर्थः पादं' इत्याह; यच्च शूलपाणिः–आद्यः पादोनं, द्वितीयोऽर्द्धं, तृतीयः पादं, चतुर्थो न किंचित्' इति;—

'एतदन्नाशिनो विप्राः कृच्छ्रं तेषां विधीयते।
तद्भोजिनोऽर्द्धकृच्छ्रेण तदन्नादास्तु पादतः॥'

इति चांडालान्नसंकरे व्यासोक्तेः,

'भुक्तं यैस्तत्र पक्वान्नं कृच्छ्रं तेषां विधीयते।
तेषामपि च यैर्भुक्तमर्द्धं तेषां विधीयते॥
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते।'

इति तत्रैवापस्तंबोक्तेश्च; तत्र एतयोर्वाक्ययोश्चांडालान्नसंसर्गविषयत्वेन साक्षात्पापिसंसर्गविषयत्वेन तत्र लिंगदर्शनता वाच्या; सा तु प्रत्यक्षव्यासवाक्येन बाध्यते।

अथ निषिद्धस्पर्शे ।

याज्ञवल्क्यः—

'चंडालपुष्कसम्लेच्छभिल्लपारसिकादिकान् ।
महापातकिनश्चैव स्पृष्ट्वा स्नायात्सचैलकः ॥'

षट्त्रिंशन्मते—

'बौद्धान्पाशुपतांश्चैव लोकायतिकनास्तिकान् ।
विकर्मस्थान् द्विजान् स्पृष्ट्वा सचैलो जलमाविशेत् ॥'

मनुः—(५।८४)

'दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानं समाचरेत् ॥'

—दिवाकीर्तिश्चांडालः । एतदकामतः,

तथा च बृहस्पतिः—

'दिवाकीर्त्तिं चितिं यूपं पतितं च रजस्वलाम् ।
स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुद्ध्यति ॥'

कामतोऽपि स एव—

'पतितं सूतिकामर्त्यं शवं स्पृष्ट्वा च कामतः ।
स्नात्वा सचैलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुद्ध्यति ॥'

स्नाने विशेषमाह शातातपः—(वृ.—२२-२३)

'चांडालं पतितं व्यंगमुन्मत्तं शवमन्त्यजम् ।
सूयकां सूतिकां नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः ।
सचैलं सशिरः स्नात्वा तदानीमेव शुद्ध्यति ॥'

छागलेयोऽपि—

'चांडालं पतितं स्पृष्ट्वा सचैलो जलमाविशेत् ।
शवं तत्स्पृष्टिनं चैव चैत्ययूपं रजस्वलाम् ॥'

अत्र शवादिस्पर्शे यत्स्नानं, तत्स्वशिरोदेशस्पर्शे। अन्यत्र त्वाचमनम्।

तदाह शातातपः—

'रजकश्चर्मकारश्च व्याधजालोपजीविनौ ।
निर्णेजकः सूचिकश्चटकः शैलूषकस्तथा ॥

मुखेभगस्तथा श्वा च वनिता सर्ववर्णगा
चक्री ध्वजी वध्यघाती ग्राम्यशूकरकुक्कुटौ ॥
एभिर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु ।
तोयेन क्षालनं कृत्वा आचांतः शुचितामियात् ॥ '

कामतः शिरःस्पर्शे तु वायुपुराणे—

' उदक्यां सूतिकां चैव श्वानमंत्यावसायिनम् ।
नग्नादीन्मृतहारांश्च स्पृष्ट्वा स्नानं विधीयते ॥
स्नात्वा सचैलं मृद्भिश्च शुद्ध्येद्दादशभिर्नरः । '

—नग्नाः बौद्धादयः ।

तथा च विष्णुपुराणे–(३।१७।५)

' सर्वेषामेव वर्णानां त्रयी संवरणं नृप ।
तां समुज्झति यो मोहात्स नग्नः पापकृन्नरः ॥ ' इति ।

गार्ग्यः—

' क्रव्यादश्वखरोष्ट्रैश्च स्पर्शे व्यवहिते द्विजः ।
अचैलं वा सचैलं वा स्नानं कृत्वा विशुद्ध्यति ॥ '

मतिपूर्वे सचैलमन्यदाऽचैलम् । तथा—

' शूद्रं स्पृष्ट्वा निषादं च शुद्ध्येदाचमनाद्द्विजः ।
तद्धीनस्पर्शनाद्यत्नात्प्राणायामैस्तपोबलात् ॥ '

अत्राचमनं स्नानासमर्थस्य, सच्छूद्रस्पर्शे वा ।

अत एवापरार्के स्मृत्यंतरम्—

' एडकं कुक्कुटं काकश्वशूद्रांत्यावसायिनः ।
दृष्ट्वैतानाचमेत्कर्म स्पृष्ट्वा तान् स्नानमाचरेत् ॥ '

—कर्म इति कर्मकाल इत्यर्थः ।

---

१ ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज ! । एतामुज्झति यो मोहात्स नग्नः पातकी स्मृतः ॥—मू. पा.

२ येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् । ते नग्नाः कीर्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥ (३२–६८)

वृद्धयाज्ञवल्क्यः—

'चंडालपुल्कसम्लेच्छमल्लकापालिपारदान् ।
उपपातकिनां चैव स्पृष्ट्वा स्नानं समाचरेत् ॥ '

संवर्त्तः—

'कैवर्त्तमृगयुव्याधशौनिशाकुनिकानपि ।
रजकं च तथा स्पृष्ट्वा स्नात्वैवाशनमाचरेत् ॥ '

यत्त्वापस्तंबः—

'चर्मकारं च रजकं धीवरं नटमेव च ।
एतान्स्पृष्ट्वा द्विजो मोहादाचामेत्प्रयतोऽपि सन् ॥
एतैः संस्पृष्ट उच्छिष्ट एकरात्रं पयः पिबेत् ।
तैरुच्छिष्टैस्त्रिरात्रं स्याद् घृतं प्राश्य विशुद्ध्यति ॥ ' इति ।

तत्राचमनमशक्तस्य, अकामतो वा ।

शाट्यायनिः—

'कापालिकानां संस्पर्शे स्नानं कृत्वा विशुद्ध्यति ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥ '

शातातपः—

'यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिगच्छति ।
तत्र स्नानं तु तस्यैव घृतप्राशो विशोधनम् ॥ '

एतच्च चिरकालाधिष्ठान इति भवदेवः ।

सर्वांगीणे तु चंडालस्पर्शे प्रचेताः — 'स्वकायेन चंडालकायाभिस्पर्शने त्रिरात्रं शुद्धिः' इति ।

यत्त्वापस्तंबः—

'सर्वेषामंत्यजादीनां स्पर्शेनाचमनं विदुः ।'

इति; तदातुरस्य ।

मदिरास्पर्शे तु मनुः—

'ज्ञान्वयः स्नानमात्रं स्यादानाभेरेकरात्रकम् ।
नाभेरूर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने विधिः ॥ '

यत्तु भवदेवीयं स्मृत्यंतरम्—

'मद्येन स्पृश्यते यस्तु ब्राह्मणः शंसितव्रतः।
उपोष्य रजनीमेकां पंचगव्येन शुद्ध्यति॥'

इति; तद् व्रतस्थस्य ज्ञानवधःस्पर्शे।

मार्कंडेयपुराणे– (३२।४१–४२)

'अभोज्यसूतिकाषंढमार्ज्जाराखुश्वकुक्कुटान्।
पतितापविद्धचांडालान्मृतहारांश्च धर्मवित्॥
संस्पृश्य शुद्ध्यति स्नानादुदक्याग्रामशूकरौ।'

—अभोज्याः रजकादयः। अपविद्धो लोकबहिष्कृतः। मृतहारो मूल्येन शवहारकः।

तथांगिराः—

'भासवायसमार्जारखरोष्ट्रं च श्वशूकरान्।
अमेध्यानि च संस्पृश्य सचैलो जलमाविशेत्॥' इति।

अत्र मार्जारो वनमार्जारो न तु गृहस्थः, तस्य शुचित्वात्।

यथा सुमंतुः –'स्त्रीबालमशकमक्षिकामार्ज्जारमूषिकाछायासनशयनांबुविप्रुषो नित्यं मेध्याः।'

बृहस्पतिरपि—

'स्त्रियो वृद्धाश्च बालाश्च न दुष्यंति कथंचन।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः॥'

मशकमक्षिकासाहचर्य्यान्मार्जारोऽत्र गृहस्थ एवेति शूलपाणिः मिताक्षरायां तु मार्जारस्पर्शे स्नानमुच्छिष्टसमये अनुष्ठानसमये वेति।

आपस्तंबः–(७।१४)

'एकशाखां समारूढश्चांडालो वा रजस्वला।
ब्राह्मणस्तत्र निवसन् सवासा जलमाविशेत्॥'

शाखाग्रहणमेकावयव्युपलक्षणार्थं, तेनैकपाषाणादेरपि ग्रहणम्। एतदकामतः, कामतस्तु द्विगुणम्।

---

१ 'देवत्यागी गुरुत्यागी गुरुपत्न्युज्झकस्तथा। गोब्राह्मणस्त्रीवधकृदपविद्धः प्रचक्षते॥' मार्क. पु. ३२।६७

अभ्यासे तु स एव—

'एकवृक्षसमारूढश्चांडालोऽथ रजस्वला ।
अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति ॥'

एतच्च स्नानानंतरं कार्यम् ।

यमः—

'चांडालैः श्वपचैः स्पृष्टे निशि स्नानं विधीयते ।
न वसेच्चैव यो रात्रौ सद्यः स्नानेन शुद्ध्यति ॥
अथ तत्र वसेद्रात्रावज्ञानादविचक्षणः ।
तदा तस्य तु तत्पापं शतधा परिवर्त्तते ॥'

पराशरः—(७।२१)

'अस्तंगते यदा सूर्ये चंडालं पतितं स्त्रियम् ।
सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते ? ॥
जातवेदः सुवर्णं च सोममार्गं तथैव च ।
ब्राह्मणानुगतश्चैव स्नानं कृत्वा विशुद्ध्यति ॥' इति ।

रात्रौ स्नाने विशेषमाह देवलः—

'दिवाहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः ।
प्रक्षिप्य च सुवर्णं च सन्निधाप्य च पावकम् ॥'

शातातपः—(बृ. शा. २६–२७)

'आदित्येऽस्तमिते रात्राऽवस्पृश्यं स्पृशते यदि ।
भगवन्केन शुद्धिः स्यात्तन्मे ब्रूहि सुनिश्चितम् ॥
अनस्तमित आदित्ये संगृहीतं तु यज्जलम् ।
तेन सर्वात्मना शुद्धिः शवस्पृष्टं तु वर्ज्जयेत् ॥'

पराशरः—

'स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन तु ।'

शिशोर्विशेषमाह वृद्धशातातपः—

'शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् ।
रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारकैः ॥'

स एव—

'प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः ।
कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनम् ॥'

शवस्य चंडालसंस्पर्शे षट्त्रिंशन्मते–'चंडालशवसंस्पर्शे कृच्छ्रं कुर्यात्। शानशय्यासने तु त्रिरात्रम्। जीवचंडालेन सह पानादिषु त्रिरात्रम्।' तथा– 'व्रणबंधनाभ्यंजनरुधिरोत्पादनेषु कृच्छ्रं द्वादशरात्रं चरेत्' व्रणबंधनादीनां चंडालं प्रतिकरणे, चंडालेन वाऽऽत्मनि तत्करणे।

आपस्तम्बः–

'येनकेनचिदभ्यक्तश्चण्डालं पतितं स्पृशेत्।
उपवासेन चैकेन पंचगव्येन शुद्धयति॥'

एतच्चाभ्यासे।

अनभ्यासे त्वपरार्के प्रचेताः—

'चंडालो यदि कायस्य रक्तमुत्पादयेत्क्वचित्।
त्रिरात्रेण विशुद्धिः स्यादेकाहासेन चोत्तरे॥'

उत्तरे क्षत्रियादौ, त्रिरात्रादेकैकस्य ह्रासः।

क्रतुः–'चंडालस्योच्छिष्टदाने चंडालक्रतुदर्शने गीतवादित्रश्रवणभैषज्यक्रियायां च द्विरात्राभोजनेन शुद्धिः। अशुचिं दृष्ट्वाऽऽदित्यमीक्षेत। प्राणायामं कृत्वा पंचदशमात्रकम्।'

सुमंतुः–'चंडालदर्शने सूर्यदर्शनम्। भाषणे ब्रह्माभिव्याहारः। स्पर्शने सचैलं स्नानम्' इति।

–ब्रह्म गायत्री। क्वचिदशुचिदर्शनेऽपि गायत्रीजपः।

तथा च शंखलिखितौ–'अशुचिदर्शने गायत्रीमेव जपेत्' इति।

गौतमः–(१।९।१७–१९)'न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत। संभाष्य पुण्यकृतो मनसा ध्यायेत्। ब्राह्मणेन वा सह संभाषेत' इति।

गौतमः–(३।४।२८) तल्पान्नधनलाभवधेषु पृथग्वर्षाणि' इति।

-तल्पं भार्या। वधो विन्नः। पृथक् प्रत्येकम्।

वृद्धपराशरः—

'दारान्नधनलाभानां वृद्धा विन्नं समाचरेत्।
प्रत्येकं प्राकृतं कुर्याद्ब्रह्मचर्य्यं तु वार्षिकम्॥' इति।

मनुः–(५।८५)

'आचम्य प्रयतो नित्यं जपेदशुचिदर्शने।
सौरान्मंत्रान्यथोत्साहं पावमानीश्च शक्तितः॥'

देवलः—

'चंडालधर्मसंयोगे प्राजापत्यं समाचरेत् ।
चरेत्त्रिरात्रं चंडालकूपतीर्थनिषेवणात् ॥'

धर्मसंयोग उपदेशः ।

पराशरः—

'चंडालैः सह सुप्त्वा तु त्रिरात्रमुपवसेत् ।
चंडालैकपथं गत्वा गायत्रीस्मरणाच्छुचिः ॥'

एतच्चाल्पकालसाध्ये, अन्यत्र प्रायश्चित्ताधिक्यस्य वक्ष्यमाणत्वात् ।

अपरार्के वसिष्ठः—

'चाण्डालेन तु संस्पृष्टं कांस्यभांडं समृन्मयम् ।
अज्ञानात्कांस्यभोजी तु मृन्मये जलपानकृत् ॥
कांस्यं भुक्त्वा चरेत्कृच्छ्रं जलपाने तु कृच्छ्रकम् ।'

—कृच्छ्रकः पादकृच्छ्रः ।

अथ चांडालसंकरे ।

पराशरः-(६।३४-४९)

'अविज्ञातस्तु चांडालो यत्र वेश्मनि तिष्ठति ।'

इत्युपक्रम्य—

'दत्त्वा सर्पिःपयोभ्यां च युक्तं गोमूत्रयावकम् ।
भुंजीत सह भृत्यैश्च त्रिसंध्यमवगाहनम् ॥
त्र्यहं भुंजीत दध्ना च सर्पिषा त्र्यहमेव च ।
त्र्यहं क्षीरेण भुंजीत एकैकेन दिनत्रयम् ॥
भावदुष्टं न भुंजीत नोच्छिष्टं कृमिदूषितम् ।
त्रिपलं क्षीरदध्नोश्च पलमेकं तु सर्पिषः ॥
अकारेषु भवेच्छुद्धिरारकूटे सकांस्यके ।
जलशौचेन वस्त्राणां परित्यागस्तु मृन्मये ॥
कुसुंभगुडकार्पासं लवणं तैलसर्पिषी ।
द्वारे कृत्वा च धान्यानि दद्याद्वेश्मनि पावकम् ॥

एवं शुद्धस्ततः पश्चात्कुर्याद्ब्राह्मणतर्पणम् ।
त्रिंशतं गोवृषं चैकं दद्याद्विप्रेषु दक्षिणाम् ॥
पुनर्लेपनखातेन होमजप्येन शुद्ध्यति ।
आधारेण च विप्राणां भूमिदोषो न विद्यते ॥ ' इति ।

—स्वल्पकालसम्पर्क एतत् ।

यत्तु संवर्त्तः—

' अन्त्यजः पतितो वाऽपि निगूढो यत्र तिष्ठति ।
सम्यग्ज्ञात्वा तु कालेन ततः कुर्याद्विशोधनम् ॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनम् ।
प्राजापत्यं तु शूद्राणां शेषाणामिदमुच्यते ॥
यैस्तत्र भुक्तं पक्वान्नं तेषामुक्तो विधिक्रमः । '

—शेषाणां प्राजापत्य इत्यर्थः ।

' तेषामपि तु यैर्भुक्तं कृच्छ्रपादो विधीयते ।
कूपैकपानदुष्टा ये तथा संसर्गदूषिताः ।
सर्वानेवोपवासेन पञ्चगव्येन शोधयेत् ॥
बालापत्या तथा रोगी गर्भिणी वृद्ध एव वा ।
तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम् ॥ '

बहुकालाभ्यास एतत् ।

अत्र विशोधनप्रकारं प्रायश्चित्तान्तरं चाह च्यवनः— ' चण्डालसङ्करे भवनदहनम् । सर्वमृद्भाण्डभेदनम् । दारवाणां तु तक्षणम् । शङ्खशुक्ति-सुवर्णरजतचैलानामद्भिः प्रक्षालनम् । कांस्यताम्राणामाकरे शुद्धिः । सौवीरदधितक्राणां परित्यागः । शेषरसद्रव्यरक्षणम् । गोमूत्रयावकाहारो मासं भक्षयेत् । बालवृद्धस्त्रीणामर्द्धप्रायश्चित्तम् । आषोडशाद्बालाः, सप्तत्यूर्ध्वं वृद्धाः । चीर्णे प्रायश्चित्ते ब्राह्मणभोजनम् । गोशतं दद्याद-भावे सर्वस्वम् ' इति ।

—एतदतिचिरकालसङ्करे पराशरः— (६।४३)

' चण्डालैः सह संपर्कं मासं मासार्द्धमेव वा ।
गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति ॥ ' इति ।

कृत्वेति शेषः। मासार्द्धेन मासश्चार्द्धं च मासार्द्धः। मासासम्पर्के मासेन, तदर्द्धसम्पर्के त्वर्द्धेन। चाण्डालशब्देन तत्समाः पुल्कसादयोऽप्युपलक्ष्यन्ते।

अत एव संवर्त्तः– (१८०)

'चाण्डालैः सङ्करे विप्रः श्वपाकैः पुल्कसैरपि।
गोमूत्रयावकाहारो मासार्द्धेन विशुद्धयति॥'

मासादधिकिञ्चित्कालसङ्करे तु हारीतः– (२०।३०–३२)

'चाण्डालैः सह संयोगे प्राजापत्येन शुद्धयति।
विप्रान्दशावरान्कृत्वा तैरनुज्ञाप्य शासनात्॥
आकण्ठस्य प्रमाणं तु कुर्याद्गोमयकर्दमम्।
तत्र स्थित्वा त्वहोरात्रं वायुभक्षः समाहितः॥
बालकृच्छ्रं ततः कुर्याद्गोष्ठे वसति सर्वथा।
सकेशं वपनं कुर्यात्परमां शुद्धिमृच्छति॥'

इति बालकृच्छ्रलक्षणमुक्तम् (पृ. ४१ पं. २१ पृ. ४२ पं. १)।

यत्तु हारीतः–

'चण्डालश्वपचानां च सङ्करे समुपस्थिते।
अहोरात्रं द्विरात्रं वा त्रिरात्रं षडहं स्मृतम्॥
अविज्ञातकचण्डालः सप्ताहं निवसेद्यदि।
तस्य ज्ञात्वोपपन्नस्य विप्राः कुर्युरनुग्रहम्॥
दधिक्षीरघृतैर्युक्तं कृच्छ्रं गोमूत्रयावकम्।
प्राशयेत्सह भृत्यैस्तु मासमेकं निरन्तरम्॥' इति।

–तदहोरात्राद्यतिसङ्करे।

पराशरः— (६।४४–४९)

'रजकी चर्मकारी च लुब्धकी वेणुजीविनी।
चातुर्वर्ण्यस्य गेहे तु अज्ञाता ह्यधितिष्ठति॥
ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्द्धमेव तु।
गृहदाहं न कुर्वीत शेषं सर्वं च कारयेत्॥' इति।

---

१ पूर्वोक्तस्य 'दध्ना सर्पिःपयोभ्यां च–' (६।३६–४०) इत्यादिनोक्तस्य।

अत्र यादृशचाण्डालसंसर्गे यत्, रजकादितादृशसंसर्गे तदर्द्धम्। रजक्यादिषु लिङ्गमविवक्षितम्।

बृहस्पतिः—

'अकामतश्चापदि वा यदा जायेत सङ्करः।
तदा कार्य्यस्तिलैर्होमो गायत्र्या जपनं तथा॥
स्नात्वाऽघमर्षणं कुर्यात्प्राणायामाश्च सङ्करे।
गायत्रीसूक्तजपनं तिलैर्होमं च शक्तितः॥
अकामतः कृते स्वल्पे शुद्धिरेषा प्रचोदिता॥' इति।

अथोच्छिष्टादिस्पर्शे आपस्तम्बः—(४)

'येनकेनचिदुच्छिष्टः संस्पर्शं यः परैः सह।
गच्छेत्सद्यः समाप्लुत्य प्रायश्चित्तेन युज्यते॥
चण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे कुरुते द्विजः।
त्रिरात्रं तत्र कुर्वीत भुक्त्वोच्छिष्टः षडाचरेत्॥' इति।

अत्र षडुपवासे प्राजापत्यतुल्यता। अत्रानुच्छिष्टस्य यत्स्पर्शे स्नानं, तस्योर्ध्वोच्छिष्टस्य कामतस्तत्स्पर्शे षडुपवासतुल्यः प्राजापत्यः।

तथा च हारीतः—

'अनुच्छिष्टस्य संस्पर्शे स्नानं येन विधीयते।
उच्छिष्टस्तेन संस्पृष्टः प्राजापत्यं समाचरेत्॥' इति।

तथा च सुमन्तुः—

'चण्डालं पतितं स्पृष्ट्वा तथा नारीं रजस्वलाम्।
उच्छिष्टां तु द्विजः स्पृष्टः प्राजापत्येन शुद्ध्यति॥'

—एतत्कामतः।

यत्तु आपस्तम्बः—

'भुक्त्वोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा॥' इति।

तत्र अर्द्धोच्छिष्ट इति येन मुखे ग्रासप्रक्षेपमात्रं कृतं, न तु निगीर्णः।

अकामतः स एव—(४।३-४)

'भुक्त्वोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा।
प्रमादात्स्पर्शनं गच्छेत् तत्र कुर्याद्विशोधनम्॥

गायत्र्यष्टसहस्रं तु द्रुपदानां शतं तथा ।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥' इति ।

यत्तु स एव—

'चण्डालेन तु संस्पृष्टो विशौचस्तु द्विजोत्तमः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥' इति ।

तदापद्यकामतः ।

काश्यपः—

'श्वशूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः ।
यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्तपनं चरेत् ॥'

—एतत्कामतोऽभ्यासे। मद्यं सुरा । अन्यत्रालपप्रायश्चित्तस्योक्तत्वात् ।

तथा च बृद्धशातातपः—(२५)

'उच्छिष्टः संस्पृशेद्विप्रो मद्यं शूद्रं शुनोऽशुचीन् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥'

यत्तच्छिष्टादेः श्वादिस्पर्शे संवर्तः—(१८२)

'कृतमूत्रपुरीषो वा भुक्तोच्छिष्टोऽथवा द्विजः ।
श्वादिस्पर्शे जपेद्देव्याः सहस्रं स्नानपूर्वकम् ॥' इति ।

तदकामतः ।

यत्त्वपरार्के आपस्तम्बः—

'उदक्या स्पृष्ट उच्छिष्टो विड्वराहश्च कुक्कुटैः ।
काकमार्जारिकव्याद्भिरुपवासेन शुद्ध्यति ॥'

इति; तदापद्यकामतः ।

यत्तु व्याघ्रः—

'चंडालोदकसंस्पृष्टः स्नानं कृत्वा विशुद्ध्यति ।
उच्छिष्टस्तेन संस्पृष्टस्त्रिरात्रेण विशुद्ध्यति ॥'

इति; तदप्यकामत एव ।

यत्तु दक्षः—

'पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः ।
संस्पर्शे यदि गच्छेत्तु शवोदक्यांत्यजैः सह ॥

दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम् ।
दिनत्रयं मैथुने स्यात्पाने तु स्याच्चतुष्टयम् ॥ '
इति; तत्कामतः ।
संवर्तः—
' कर्मारं[1] रजकं वेणं धीवरं नटमेव च ।
एतैः स्पृष्टस्तथोच्छिष्ट एकरात्रं पयः पिबेत् ॥
तैरुच्छिष्टैस्त्रिरात्रं स्याद् घृतं प्राश्य विशुद्ध्यति ॥ ' इति ।
अधोच्छिष्टविषयं चेदम् । ऊर्ध्वोच्छिष्टे तु त्रिरात्रम् ।
तथा च लघुहारीतः-(१२-१३)
' उच्छिष्टः संस्पृशेद्यस्तु नटरजकमोचकान्[2] ।
अधोच्छिष्टो यदा स स्यादेकरात्रमभोजनम् ॥
ऊर्ध्वोच्छिष्टो यदा स स्यात्प्रायश्चित्तं भवेदिदम् ।
उपवासस्त्रिरात्रं स्याद्घृतं प्राश्य विशुद्ध्यति ॥ ' इति ।
अतश्च ऊर्ध्वोच्छिष्टस्य तैरुच्छिष्टैः स्पर्शे षड्रात्रम् । एवमेव यत्रोच्छिष्टस्य चांडालादिस्पर्शे षड्रात्रं, तत्राधोच्छिष्टस्य तदर्द्धं त्रिरात्रम् ।
अत एव शातातपः-
' उच्छिष्टस्तु स्पृशेद्विप्रश्चंडालं तु कथंचन ।
ऊर्ध्वोच्छिष्टस्तु संस्पृश्य द्विजः सांतपनं चरेत् ॥
अधोच्छिष्टस्त्रिरात्रांते पंचगव्येन शुद्ध्यति ॥ ' इति ।
सांतपनमिह सप्ताहसाध्यम् ।
यत्तु चांडालादीनुपक्रम्य वृद्धशातातपः-(२४)
' अशुद्धान्स्वयमप्येतानशुद्धश्च यदा स्पृशेत् ।
विशुद्ध्यत्युपवासेन त्रिरात्रेण ततः शुचिः ॥ '
तथा एतानेव प्रकृत्याह देवलः-
' अशुद्धान्स्वयमप्येतानशुद्धो यदि संस्पृशेत् ।
विशुद्ध्यत्युपवासेन पुनः कृच्छ्रेण वा पुनः ॥ '

---

१ कर्मारो लोहकारः ' लोहकारश्च कर्मारः ' (सू, सं. १।१२।३०) ।
२ मोचकश्चर्मकारः-प्रा. वि. टी. ' आयोगव्यां द्विजाज्जातो धिग्वणः कवचादिकृत् । (मोचिकः ।)-शू. क. ।
३ ' शातातपवचो यथा ' इति पाठान्तरम् ।

इति; तत्राशुद्धानिति स्वरूपकीर्त्तनम्। मूत्रादिकरणेन वा। स्वयमशुद्ध इत्यधोच्छिष्टादिना। एकरात्रमापद्यज्ञानतः। त्रिरात्रं ज्ञानतः। कृच्छ्रत्वभ्यासे। मिताक्षरायां तु कृच्छ्रः श्वपाकादिविषयः, श्वादिषु तूपवास इति।

यत्तु शातातपः—

'अंत्यजे हस्तकाष्ठेन वाससा स्पृष्ट एव वा।
प्रक्षाल्यांगं तदाचामेदुच्छिष्टस्तु निशां क्षिपेत्॥'

इति; तदप्युक्त एव विषये।

उच्छिष्टस्य पुरीषस्पर्शे लघुहारीतः—(२-३)

'श्वविष्ठां काकविष्ठां वा कङ्कगृध्रनरस्य च।
अधोच्छिष्टस्तु संस्पृष्टः सचैलो जलमाविशेत्॥
ऊर्ध्वोच्छिष्टस्तु संस्पृश्य प्रायश्चित्तमिदं चरेत्।
उपोष्य रजनीमेकां पंचगव्येन शुद्धयति॥'

उच्छिष्टस्य चांडालान्नस्पर्शे विशेषमाह हारीतः—(ल. हा. १०)

'उच्छिष्टस्तु स्पृशेद्विप्रश्चांडालान्नं कथंचन।
ऊर्ध्वोच्छिष्टस्तु संस्पृष्टो द्विजश्चांद्रायणं चरेत्॥
अधोच्छिष्टो यदा स स्यात्प्रायश्चित्तं भवेदिदम्।
त्रिरात्रमुपवासः स्यात्पंचगव्येन शुद्धयति॥' इति।

पराशरः—(७।२१)

'उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा पुनः।
उपोष्य रजनीमेकां पंचगव्येन शुद्धयति॥'

उच्छिष्टश्चासावुच्छिष्टसंस्पृष्टश्चेति विग्रहः। सवर्णविषयमेतत्।

अत्रिः—

'उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन तु।
दंशरूपं[1] जपेत्पश्चाद्गायत्र्या शोधनं भवेत्॥'

ब्रह्मपुराणे—

'उच्छिष्टेन तु विप्रेण द्विजः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥' इति।

---

१ दशरूपं दशवारम्।

उच्छिष्टं विप्रं प्रकृत्याह पराशरः–(७।२२)

'अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानं विधीयते ।
तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत् ॥ ' इति ।

यत्तु ब्राह्मे—

'उच्छिष्टेनाथ शूद्रेण विप्रः स्पृष्टस्तु तादृशः ।
उपवासेन शुद्धः स्याच्छुना संस्पृष्ट एव च ॥ '

इति; तदापद्यशक्तस्य ।

देवलोऽपि—

'उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वाऽपि समाहितः ।
तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति ॥ ' इति ।

द्रव्यहस्तस्योच्छिष्टस्पर्शे मनुः–(५।१४२)

'उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन ।
अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् ॥ '

एतच्च पेयविषयम् ।

भोज्यविषये तु वसिष्ठः—

'प्रचरन्नध्वनीनेषु यद्युच्छिष्टमुपस्पृशेत् ।
भूमौ निधाय तद्द्रव्यमाचांतः प्रचरेत्ततः ॥ '

द्रव्यस्य त्वभ्युक्षणं कार्यमित्याहुः शंखलिखितौ – 'द्रव्यहस्त उच्छिष्टो निधायाभ्युक्ष्येद्द्रव्यम् ' इति ।

–उच्छिष्ट उच्छिष्टस्पृष्टः । एतच्चानुच्छिष्टहस्तादिना स्पर्शे । साक्षादुच्छिष्टहस्तादिस्पर्शे त्वभोज्यमेव । यथाह वसिष्ठः–(१४।१७) 'उच्छिष्टमगुरोरभोज्यं, स्वमुच्छिष्टमुच्छिष्टोपहतं च ' इति ।

उच्छिष्टस्य तैलाभ्यक्तस्य च मूत्रादिकरणे आपस्तंबः–

'तैलाभ्यक्तस्त्वनाचांतः श्मश्रुकर्मणि मैथुने ।
मूत्रोच्चारं यदा कुर्यादहोरात्रेण शुद्ध्यति ॥ '

उच्छिष्टस्य सूर्यादिदर्शने दोष उक्तो मार्कंडेयपुराणे–(१४।५८)

'सूर्येन्दुतारका दृष्टा यैरुच्छिष्टैः (स्तु कामतः) कदाचन ।
तेषां याम्यैर्नरैरक्षिन्यस्तो वह्निः समिद्ध्यते ॥ '

अत्र च– 'स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्' (११।२०३) इति मनूक्तं द्रष्टव्यम्।

तस्यैव चांडालादिदर्शने बौधायनः– 'चांडालादिदर्शने ज्योतिषां दर्शनम्। संभाषणे ब्राह्मणसंभाषणम्। उच्छिष्टदर्शने त्वेकरात्रमुपवासः। संभाषणे द्विरात्रम्। संस्पर्शने त्रिरात्रम्। सहगमने सचैलं स्नानम्' इति।

चांडालदर्शन इत्यनुच्छिष्टस्य। उच्छिष्टदर्शने इति उच्छिष्टस्य चांडालदर्शने इत्यर्थः। एवमग्रेऽपि।

उच्छिष्टस्य पलांड्वादिस्पर्शे बृहस्पतिः–

'सुरापलांडुलशुनस्पर्शे कामकृते द्विजः।
त्र्यहं पिबेत्कुशजलं सावित्रीं च जपेत्तथा॥'

इदमूर्ध्वोच्छिष्टस्येति शूलपाणिः।

यत्तु स एव–

'पलाण्डुलशुनस्पर्शे स्नात्वा नक्तं समाचरेत्।
कृतोचारस्त्वहोरात्रमुच्छिष्टो त्र्यहमाचरेत्॥' इति।

तदूर्ध्वोच्छिष्टविषयम्। ऊर्ध्वोच्छिष्टे अकामविषयं वा॥

अथानुच्छिष्टस्य नीलीवस्त्रपरिधाने।

भविष्यत्पुराणे– (१।६५।८–१५)

'शृणु दिण्डे! महाबाहो नीलीवस्त्रस्य धारणे।
दूषणं गणशार्दूल! गदतो मम कृत्स्नशः॥
पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात्।
पतितस्तु भवेद्विप्रस्त्रिभिर्वर्षैर्विशुद्ध्यति॥
नीलीरक्तेन वस्त्रेण यत्कर्म कुरुते द्विजः।
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्।
वृथा तस्यं महायज्ञा नीलीवस्त्रस्य धारणात्।
नीलीरक्तं यदा वस्त्रं कश्चिद्विप्रस्तु धारयेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति॥
गोमकूपे यदा गच्छेद्वस्त्रो नील्यादिकः क्वचित्।
त्रिवर्षेषु च सामान्यं तप्तकृच्छ्रं विशोधनम्॥

नीली दारु यदा भिन्द्याद्ब्राह्मणस्य शरीरकम् ।
शोणितं दृश्यते यत्र द्विजश्चान्द्रायणं चरेत् ॥ '

—इदमज्ञाने । ज्ञाने तु द्विगुणम् ।

अत्रापवादः— नीलीत्यनुवृत्तावापस्तम्बः— (६।१)

' स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति । ' इति ।

एवमेव केशनिर्मितवस्त्रधारणे चोपवासः । 'पञ्चगव्यं घृतं हिरण्योदकं वाधिकम् ' इति स्मृत्यर्थसारे ।

अथ रुद्रनिर्माल्यस्पर्शे ।

कालिकापुराणे—

' स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः ॥ '

अथ रजस्वलाया अस्पृश्यस्पर्शे ।

तत्र रजस्वलयोः सपत्न्योरेकगोत्रयोः स्पर्शे वसिष्ठः—

' स्पृष्टे रजस्वलेऽन्योन्यं सगोत्रे त्वेकभर्तृके ।
कामादकामतो वाऽपि सद्यः स्नानेन शुद्ध्यतः ॥ '

असपत्न्योस्तु सवर्णयोः स्पर्शे मार्कण्डेयः—

' उदक्या तु सवर्णा या स्पृष्टा चेत्स्यादुदक्यया ।
तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयम् ॥ '

इदं चाकामतः ।

कामतस्तु काश्यपः— (अत्रिः ९।३)

' रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥ '

यत्तु पराशरः— (७।११)

' स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी ब्राह्मणीं तथा ।
तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुद्ध्यति ॥ '

इति; तत्कामतोऽभ्यासे । सहशयनादिचिरस्पर्शे वा ।

असवर्णास्पर्शे पुनः स एवं— (७।१२–१४+अत्रिः ९।४–६)

---

१ सकृत् स्पर्शे—माधवः ।

२ पराशरस्मृतौ भूयानेव पाठभेदो दृश्यते ।

'रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी च या ।
त्रिरात्रेणैव शुद्धिः स्याद्व्याघ्रस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी च या ।
षड्रात्रेण विशुद्धिः स्याद्ब्राह्मण्या कामकारतः ॥
अज्ञानतश्चरेदर्द्धं ब्राह्मणी सर्वजातिषु ।'

अत्र यथा ब्राह्मणीरजस्वलयोः स्पर्शे उपवासः पञ्चगव्याशनम् । तथाऽन्यासामपि सवर्णरजस्वलास्पर्शे तदेव । यथा ब्राह्मण्याः क्षत्रिया-स्पर्शे त्रिरात्रं तथा क्षत्रियाया वैश्यास्पर्शे । वैश्यायाः शूद्रास्पर्शेऽपि तदेव । तथा च भवदेवनिबन्धे स्मृतिः—

'रजस्वला तु या नारी अन्योन्यमुपसंस्पृशेत् ।
सवर्णे पञ्चगव्येन त्रिरात्रमसवर्णके ॥'

पञ्चगव्येन उपवाससहितेनेति भवदेवः ।

तथा शातातपः— (वृ. शा. २०)

'रजस्वले उभे नार्य्यावन्योन्यं स्पृशतो यदि ।
सवर्णे पञ्चगव्येन ब्रह्मकूर्चमतः परम् ॥' इति ।

यत्तु बृहद्यमः— (३।६६–७०)

'स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा ।
कृच्छ्रार्द्धाच्छुद्ध्यते पूर्वा उत्तरा तु तदर्द्धतः ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी वैश्यजापि वा ।
पादहीनं चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजाऽपि वा ।
कृच्छ्रेण शुद्ध्यते पूर्वा शूद्रा दानेन शुद्ध्यति ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं क्षत्रिया शूद्रजापि वा ।
उपवासैस्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं क्षत्रिया वैश्यजापि वा ।
त्रिरात्राच्छुद्ध्यते पूर्वा उत्तरा तु दिनद्वयात् ॥
वर्णानां कामतः स्पर्शे शुद्धिरेषा पुरातनी ॥' इति ।

एतच्च कामतोऽभ्यासे । दानेन पादकृच्छ्रप्रत्याम्नायेन ।

पतितचाण्डालादिस्पर्शे वृद्धवसिष्ठबृहस्पती—

पतितान्त्यश्वपाकैन संस्पृष्टा चेद्रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रं स्याद्द्वितीये ह्यहमेव तु ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमेव च ॥
शूद्रयोच्छिष्टया स्पृष्टा शुना च ह्यहमाचरेत् ॥ '

तान्यवशिष्टानि दिनानि व्यतिक्रम्य । अजाशकृन नीत्वेत्यर्थः । अत्र सर्वत्र पञ्चगव्यप्राशनमपि कर्त्तव्यमिति भवदेवः ।

यत्तु बौधायनः— (अत्रिः ९।१+ल.शं. ४९+अं. ४७)

' रजस्वला तु संस्पृष्टा चाण्डालान्त्यश्ववायसैः ।
तावत्तिष्ठेन्निराहारा यावत्कालेन शुद्ध्यति ॥ ' इति ।

एतदशक्तायाः, अकामे वा ।

यत्तु वृद्धशातातपः— (१८)

' उदक्या सूतिका वाऽपि शवान्त्यं संस्पृशेद्यदि ।
त्रिरात्रेणैव शुद्ध्येत इति शातातपोऽब्रवीत् ॥ '

तथा—

' चण्डालैः श्वपचैर्वाऽपि आत्रेयी स्पृश्यते यदि ।
त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुद्ध्यति ॥ '

काश्यपः—

' चाण्डालेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात्पञ्चगव्येन शोधनम् ।
ता निशास्तु व्यतिक्रम्य अजाघ्रातं तु कारयेत् ॥ '

इति; तदेतत्प्रथमदिनविषयम् । शूलपाणिस्तु—काश्यपवाक्ये प्रथमादिदिनव्यवस्था नास्ति, ' त्रिरात्रेणैव ' इति वृद्धशातातपवाक्यात् । तथा च कामविषयमित्याह । तन्न; बार्हस्पत्येन प्रथमदिन एव त्रिरात्रस्य व्यवस्थितत्वात् । तद्विषयत्वमेव च न्याय्यमिति ।

उपवासासमर्थायां त्वंगिराः— (४६)

'चण्डालः श्वपचो वाऽपि यद्यात्रेयीं स्पृशेद्यदि ।
अफालकृष्टैर्वर्त्तेत पञ्चगव्येन शुद्ध्यति ॥ '

पञ्चगव्यपानं तु स्नानानन्तरं कार्य्यम् ।

चाण्डालेन सहैकवृक्षाद्यारोहणे पराशरः—

'एकवृक्षसमारूढश्चाण्डालोऽथ रजस्वला ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ '

श्वादिस्पर्शे विशेषमाह यमः— (१२+अत्रिः ९।१)

'रजस्वला तु संस्पृष्टा शुना जंबुकवायसैः ।
निराहारा भवेत्तावद्यावत्कालेन शुद्ध्यति ॥ '

एतदकामतः ।

कामतस्तु रजस्वलानुवृत्तौ बृहस्पतिः—

'शुना चोच्छिष्टया शूद्रा संस्पृष्टा ह्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥ ' इति ।

प्रथमद्वितीयदिने श्वादिस्पर्शे त्र्यहम् , परतश्चतुर्थे ।

अत्रापि 'तान्यहानि व्यतिक्रम्य' इति योज्यम् । (पृ.२०९पं.२२)

यत्तु बौधायनः— (ल. हा. १७)

'रजस्वला तु संस्पृष्टा ग्राम्यकुक्कुटसूकरैः ।
श्वभिः स्नात्वा पिबेत्तावद्यावच्चंद्रस्य दर्शनम् ॥ ' इति ।

चंद्रदर्शनं नक्तमित्यर्थः । एतदशक्तायाः । चतुर्थदिनविषयं वा । रजकादिस्पर्शे तु श्वस्पर्शसमानमेव, तयोः समानत्वादिति शूलपाणिः ।

यत्तु प्रचेताः—

'रजस्वला तु भुंजाना श्वांत्यजादि स्पृशेद्यदि ।
पंचरात्रं निराहारा पंचगव्येन शुद्ध्यति ॥ '

इति; तत्कामतोऽभ्यासे ।

भोजनकाले श्वांत्यजादिस्पर्शे तु बौधायनः—(१।३।४)

---

१ संस्पृष्टा शुना चांडालराक्षसैः—पा.

'रजस्वला तु भुंजाना श्वांत्यजादिं स्पृशेद्यदि ।
गोमूत्रयावकाहारा षड्रात्रेण विशुद्धयति ॥
अशक्तौ कांचनं दद्याद्विप्रेभ्यो वापि भोजनम् ॥' इति ।

उच्छिष्टयोः परस्परं स्पर्शे त्वङ्गिराः–(४९)

'उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला ।
कृच्छ्रेण शुद्ध्यते पूर्वा[1] शूद्रा दानैरुपोषिता ॥' इति ।

अत्र पूर्वाशब्देन ब्राह्मणक्षत्रियवैश्यस्त्रियोऽभिधीयंते । तेन रजस्वलयोः समानजातीययोरुच्छिष्टयोः ।

ब्राह्मणीक्षत्रियावैश्यानां परस्परं स्पर्शे प्राजापत्यः 'स्वस्यानंतरस्पर्शे त्वेकैकवृद्धिरूहनीया । तादृशशूद्रयोः परस्पर्शे तूपवाससहितप्राजापत्यप्रत्याम्नायदानेन शुद्धिः । एतच्च कामतः । अकामतस्तदर्द्धम् ।

शूलपाणिस्तु—

'उच्छिष्टेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला ।
कृच्छ्रेण तु विशुद्ध्येत शूद्रा दानेन शुद्ध्यति ॥'

इति पपाठ । तत्र चोच्छिष्टेन चांडालादिना । दानेन कृच्छ्रप्रत्याम्नायेन । एषु रजस्वलात्वमेव निमित्तम्, अतो न क्षत्रियवैश्ययोर्ब्राह्मण्यादिभ्यो विशेष इत्याह ।

उच्छिष्टद्विजसंस्पर्शे तु मार्कंडेयः–

'द्विजान्कथंचिदुच्छिष्टान् रजःस्त्री यदि संस्पृशेत् ।
अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेत् ॥' इति ।

अत्र यद्यप्यविशेषः श्रूयते, तथापि ब्राह्मण्यपेक्षया उच्छिष्टक्षत्रियादिस्पर्शे ब्राह्मण्या अधिकं कल्प्यम्। एवं हीनाया उच्छिष्टोत्तमस्पर्शे न्यूनम् ।

भोजनकाले रजस्वलांतरं दृष्ट्वा पुनर्भोजने त्वापस्तंबः–(७)

'उदक्या यदि वा भुंक्ते दृष्ट्वाऽन्यां तु रजस्वलाम् ।
आस्नानकालं नाश्नीयाद्ब्रह्मकूर्चं ततः पिबेत् ॥'

एतच्च कामतः ।

---

१ पूर्वा कृच्छ्रं प्रकुर्वीरन्–मू.

चांडालदर्शने त्वत्रिः— (बृ. आत्रे. (५।५६)

'रजस्वला तु भुंजाना चांडालं यदि पश्यति ।
उपवासत्रयं कुर्यात्प्राजापत्यं तु कामतः ॥ ' इति ।

रजस्वलायाः श्वादिदर्शने व्यासः–(३।६९)

'रजस्वला यदा दृष्टा शुना जंबूकरासभैः ।
पंचरात्रं निराहारा पंचगव्येन शुद्ध्यति ॥ ' इति ।

रजस्वलाया आशौचिस्पर्शे शातातपः–(२।१२७)

'आर्तवाभिप्लुता नारी स्पृशेच्चेल्लवसूतकम् ।
ऊर्ध्वं त्रिरात्रात्स्नातां तां त्रिरात्रमुपवासयेत् ॥ '

स्पृष्ट्वा भोजनादौ अत्रिः–(५।८)

'आर्त्तवाभिप्लुता नारी मृतसूतकयोः स्पृशेत् ।
भुक्त्वा पीता चरेत्कृच्छ्रं स्पृष्ट्वा तु त्र्यहमेव च ॥ ' इति ।

आशौचिस्पर्शे स्नानात्प्राग्रजोदर्शने मार्कंडेयः–

'मृतसूतकसंस्पर्शे ऋतुं दृष्ट्वा कथं भवेत् ।
नास्नानकालमश्नीयाद्भुक्त्वा चांद्रायणं चरेत् ॥ ' इति ।

आस्नानकालं चतुर्थदिनपर्यंतम् ।

मदनरत्ने स्मृत्यंतरे—

'अप्रायत्ये समुत्पन्ने मलवद्वाससा यदि ।
अभिषेकेण भुक्तिः स्यादिनत्रयमभोजनम् ॥ '

–अभिषेकेण भुक्तिः सद्यःस्नानेन भोजनम् । इदमशक्तायाः, बालापत्यविषयं वा । अन्यस्यास्तु त्रिरात्रोपवासः ।

बंधुमरणश्रवणादौ व्यासः–(३–४४)

'मलवद्वसनायास्तु अप्रायत्यं भवेद्यदि ।
अभिषेकेण शुद्धिः स्यान्नाशनं वा दिनत्रयम् ॥ ' इति ।

–अत्रापि पूर्ववद्व्यवस्था । दिनत्रयमित्यवशिष्टकालोपलक्षणम् । अप्रायत्यं बंधुमरणादि ।

स एव–(३।४३-४४)

'आर्त्तवाभिप्लुता नारी नावगाहेत्कदाचन ।
उद्धृतेन जलेनैव स्नात्वा शेषं समापयेत् ॥
स्वकं गात्रं भवेद्द्विः सांगोपांगमलैर्युतम् ।
न वस्त्रपीडनं कुर्यान्नान्यवासा भवेत्पुनः ॥' इति ।

तथा पराशरः—

'स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रांतरिततोयेन स्नानं कृत्वा व्रतं[1] चरेत् ॥
सिक्तगात्रा भवेद्द्विः सांगोपांगात्कथंचन ।
न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥' इति ।

अथ परंपरास्पर्शे ।

तत्राचेतनदंडादिनाव्यवधाने याज्ञवल्क्यः– (१।१६८)

'उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्[2] ।
अङ्गिलगानि जपेचैव गायत्रीं मनसा सकृत् ॥' इति ।

चेतनव्यवधाने तु मानवम्— (५।८५)

'शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्धयति ॥' इति ।

अशुचिशुनादिस्पृष्टिस्पर्शे तु शातातपः–(१३७)

'अशुचिं संस्पृशेद्यस्तु एक एव प्रदुष्यति ।
तस्पृष्ट्वाऽन्यो न दुष्येत सर्वद्रव्येष्वयं विधिः ॥' इति ।

तथा—

'संहतानां तु पात्राणां यद्येकमुपहन्यते ।
तस्य तच्छोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि ॥'

क्वचिदचेतनव्यवधाने तु वचनात्प्रायश्चित्ताधिक्यम् ।

यथाहापस्तंबः–(७।१४)

'एकशाखां समारूढश्चांडालादिर्यदा भवेत् ।
ब्राह्मणस्तत्र निवसन्स्नानेन शुचितामियात् ॥'

---

१ व्रतं रजस्वलाधर्मपालनरूपम् ।—प्रा. मु.

२ तैरुदक्याशुचिसंस्पृष्टादिभिः संस्पृष्ट उपसंस्पृशेदाचामेदित्यर्थः ।

आदिशब्दादुदक्यादीनां ग्रहणम्। शाखाग्रहणमवयव्युपलक्षणमिति प्राग्व्याख्यातम्।

तथा स एव–(४।९–१० अत्रिः ५।४४–४५)

'एकवृक्षसमारूढौ चाण्डालब्राह्मणौ यदि।
फलं भक्षयतस्तत्र प्रायश्चित्तं कथं भवेत्?॥
ब्राह्मणानामनुज्ञाप्य सवासाः स्नानमाचरेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्धयति॥'

तथा स एव— (अत्रिः ५।४६)

'एकशाखासमारूढः फलान्यश्नात्यसौ यदि।
प्रायश्चित्तं त्रिरात्रं स्यात्पञ्चगव्यं विशोधनम्॥' इति।

अत्र व्यवधानसन्निधानाभ्यामेकरात्रत्रिरात्रे। मतिपूर्वं चैतत्। अमतिपूर्वे तु ब्रह्मपुराणे–

'विप्रश्चण्डालसहितो यत्रैकस्मिन्वनस्पतौ।
अज्ञानात्तु फलं भुङ्क्ते चरेत्तत्राघमर्षणम्॥'

अत्रापवादमाह पराशरः— (७।३६)

'रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च।
स्पर्शनान्न प्रदुष्यन्ति पकेष्टकचितानि च॥'

अत्र परम्परास्पर्शेऽपि स्पर्शशब्दो गौणः। तत्र वचनात्प्रायश्चित्तम्। स्पर्शप्रायश्चित्तापवादमाह बृहस्पतिः–

'तीर्थे विवाहयात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहेषु स्पृष्टास्पृष्टिर्न दुष्यति॥' इति।

एवमन्यान्यपि उच्चावचवचनानि व्यवस्थापनीयानि।

---

१ पकेष्टकादिभिश्चितानि प्रासादधवलगृहादीनि।–मि.। चैत्यवृक्षवदि. कादीनि।–मा. २ स्पृष्टोऽस्पृष्टिः अस्पृष्टो येन सः।–गोविन्दानन्दः। –यत्र स्पर्शज्ञानासम्भवस्तद्विषयकमिदम्।— स्मृ. चं.– 'स्पृष्टास्पृष्टौ' तिपाठे– स्पृष्टं हस्तपादाद्यवयवावच्छेदेन, अस्पृष्टिः तदितरगात्रावच्छेदेन, तयोः समाहारः। जनसंमर्देऽबुद्धिपूर्वकमेकदेशस्पर्शो न दोषजनक इति; कश्चन स्पृष्टः, तदन्यश्चास्पृष्टः, तयोर्द्वयोरपि स्पर्शः समान एव मन्तव्य इति वार्थः। नतु चाण्डालाद्यस्पृश्यानामस्पृश्यत्वाभावे तात्पर्यम्। 'स्पृष्टास्पृष्टं' इत्यपि पाठेः, एव मेव व्याख्येयम्।

ब्राह्मणस्य चैत्यवृक्षादिस्पर्शे पराशरः– (१२।२७)

'चैत्यवृक्षश्चितिर्यूपश्चाण्डालः सोमविक्रयी ।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् ॥ ' इति ।

क्षत्रियादीनां न्यूनं कल्प्यम् । इत्यस्पृश्यस्पर्शप्रायश्चित्तानि ।

अथ श्वादिदंशे ।

तत्र मनुः– (११।१०९)

'श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुद्धयति ॥ ' इति ।

प्राणायामे विशेषं घृतप्राशनं चाह याज्ञवल्क्यः– (३।२७७)

'पुंश्चलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः ।
प्राणायामं जले कृत्वा घृतं प्राश्य विशुद्धयति ॥ ' इति ।

एतच्च नाभेरधस्तादीषद्दष्टस्य ।

यत्तु सुमन्तुः— 'श्वशृगालमृगमहिषाजाविखरकरभनकुलमार्जार-मूषिकाप्लवककाकपुरुषदष्टानामापोहिष्ठीयाभिः स्नानं प्राणायामत्रयं च ' इति; एतच्च पादयोः किञ्चिदधिकदंशे ।

यत्तु गद्यदेवलः– 'विषाणिदंष्ट्रिश्वशृगालविड्वराहखरनरवायसपुंश्चली-भिर्दष्टः स्रवन्तीमासाद्य षोडश प्राणायामान्कुर्यात्' इति; एतदपि ततोऽप्यधिकदंशे ।

नाभेरूर्ध्वं दंशे तु बौधायनः– (१।५।१४६+ वसि. २३।२६)

'शुना दष्टस्तु यो विप्रो नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्धयति ॥ ' इति ।

नाभेरधस्तादतिगाढदंशविषयं वा ।

एतस्मिन्नेव विषये देवलः– 'श्वदष्टः सागरगायां नद्यां स्नातो निराहारः प्राणायामशतमावर्तयन्त्रिरात्रादपगतपाप्मा भवति ' इति । तन्नाभेरूर्ध्वं गाढदंशे ।

---

१ चितेर्योग्यं श्मशानस्थानं चैत्यम् , तत्र समारोपितो वृक्षश्चैत्यवृक्षः ।—मा. चयनोद्भवो वा वृक्षः ।—नं. प.

अत्रैव शङ्खः— (१७।४८)

'नीलीकाष्ठक्षतो विप्रः शुना दष्टस्तथैव च ।
त्रिरात्रं तु व्रतं कुर्यात्पुंश्चलीदशनक्षते ॥' इति ।

यमोऽपि—

'श्वशृगालशूकरखरोष्ट्राश्ववानरकुंजरैः ।
एतैस्तु ब्राह्मणो दष्टस्त्रिरह्नः समुपस्पृशेत् ॥
हविष्यं भोजयेदन्नं ब्राह्मणान्सप्त पंच वा ।' इति

ब्रह्मचार्यधिकारे हारीतः—(२३।११–१२) 'शुना दष्टस्त्र्यहमेकाहारः (त्र्यहं यावकाहारः) समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतं प्राश्य ततः शुचिरेवमेव गोमायुमार्जारनकुलमूषकैर्दष्टानाम् । ब्रह्मचार्य्यधिकारे पैठीनसिरपि–'शुना दष्टस्य त्रिरात्रमुपवासो विप्रगृहे वासश्च ।

यत्तु शातातपः— (८८)

'गवां शृंगोदकस्नातः शुना दष्टस्तु ब्राह्मणः ।
समुद्रदर्शनाद्वाऽपि शुना दष्टः शुचिर्भवेत् ॥

भविष्ये–(१।१८४।४९)

'वेदविद्याव्रतस्नातः शुना दष्टस्तु वै द्विजः ।
हिरण्योदकमिश्रं च घृतं प्राश्य विशुद्ध्यति ॥'

तन्नाभेरधस्तादीषद्दष्टविषयम् । वचनाद्विशिष्टब्राह्मणमात्रविषयं वा । समुद्रदर्शनं तत्तीरवासिनाम् ।

व्रतस्थस्य विशेषमाह बौधायनः–(अत्रिसं. ३।४)

'व्रतस्थस्तु शुना दष्टस्त्रिरात्रमुपवासयेत् ।
सघृतं यावकं पीत्वा व्रतशेषं समापयेत् ॥'

यत्तु शातातपः– (८९)

'अव्रतः सव्रतो वाऽपि शुना दष्टो भवेद्द्विजः ।
हिरण्योदकमिश्रं तु घृतं प्राश्य विशुद्ध्यति ॥'

इति; तदत्यन्ताशक्तविषयम् ।

ब्राह्मणरहितग्रामे तु पराशरः– (५।९)

'असद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः ।
वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत् ॥'

स्त्रीणां विशेषमाह पराशरः— (५।७+अत्रिः ३।३)

'ब्राह्मणी तु शुना दष्टा जम्बुकेन वृकेण वा ।
उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥'

बौधायनोऽपि—

'ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
नक्षत्रदर्शनाद्वाऽपि शुना दष्टा शुचिर्भवेत् ॥
कृष्णपक्षे यदा सोमो न दृश्येत कदाचन ।
यां दिशं व्रजते सोमस्तां दिशं त्ववलोकयेत् ॥' इति ।

अङ्गिरसा त्वत्र पञ्चगव्यप्राशनमप्युक्तम्- (भ.पु.१।१८४।५२-५३)

'ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत् ? ॥
यां दिशं तु गतः सोमस्तां दिशं वाऽवलोकयेत् ।
सोममार्गेण सा पूता पञ्चगव्येन शुद्ध्यति ॥' इति ।

ब्राह्मणीग्रहणमुपलक्षणम् ।

व्रतस्थास्त्रीविषये पराशरः- (५।४)

'त्रिरात्रमेवोपवसेच्छुना दष्टा तु सव्रता ।
सघृतं यावकं भुक्त्वा व्रतशेषं समापयेत् ॥'

रजस्वलायां विशेषमाह पुलस्त्यः— (व्या. स्मृ. ३।६९)

'रजस्वला यदा दष्टा शुना जम्बूकरासभैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
ऊर्ध्वं तु द्विगुणं नाभेर्बाहू तु त्रिगुणं तथा ।
चतुर्गुणं स्मृतं मूर्ध्नि दष्टेऽन्यत्राप्लुतिर्भवेत् ॥' इति ।

अन्यत्र रजस्वलावस्थाया इति शेषः ।

शुनाघ्रातादिषु शातातपः-

'शुनाघ्रातावलीढस्य नखैर्विदलितस्य च ।
अद्भिः प्रक्षालनं शौचमग्निना चोपचूलनम् ॥' इति ।

-उपचूलनं तापनम् ।

व्रणे कृम्युत्पत्तौ तु बौधायनः— (१।५।१४१–४२)

'ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ? ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत् ॥ ' इति ।

एतच्च नाभेरधस्ताज्ज्ञेयम् ।

मनुरपि—

'ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ? ॥
गवां मूत्रपुरीषेण त्रिसन्ध्यं स्नानमाचरेत् ।
त्रिरात्रं पञ्चगव्याशी त्वधो नाभ्यां विशुद्ध्यति ॥
नाभिकण्ठान्तरोद्भूते व्रणे चोत्पद्यते कृमिः ।
षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे ॥ ' इति ।

यत्तु शातातपः— (९१–९२)

'ब्राह्मणस्य व्रणद्वारे यदा सम्पद्यते कृमिः ।
प्रायश्चित्तं तदा कार्यमिति शातातपोऽब्रवीत् ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
स्नात्वा पीत्वा च कृत्वा च कृमिदुष्टः शुचिर्भवेत् ॥ '

इति तदीषदुष्टविषयम् ।

पराशरेण तु वर्णभेदेन प्रायश्चित्तभेद उक्तः—(६।४८–५१)

'ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ? ॥
गवां मूत्रपुरीषेण दधिक्षीरेण सर्पिषा ।
त्र्यहं स्नात्वा च पीत्वा च कृमिदुष्टः शुचिर्भवेत् ॥
क्षत्रियोऽपि सुवर्णस्य पञ्चमाषान्प्रदापयेत्
गोदक्षिणा तु वैश्यस्याप्युपवासं विनिर्दिशेत् ॥
शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुद्ध्यति ' । इति

स्नानं पानं च पञ्चगव्येनैव । दानं गोदानम् । एतदपि नाभेरधस्ताज्ज्ञेयम् ।

नाभेरुपरि विशेष उक्तो भविष्यत्पुराणे– (१।१८४।५४–५७)

'ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य निष्कृतिं वच्मि तस्य ते ॥
गवां मूत्रपुरीषेण त्रिसन्ध्यं स्नानमाचरेत् ।
दधिक्षीरघृतं प्राश्य त्रिरात्रेण विशुद्धयति ॥
अधो नाभेः प्रदष्टस्य आपादाद्विनतात्मज ! ।
एतद्विनिर्दिशेत्प्राज्ञः प्रायश्चित्तं खगाधिप ! ॥
नाभिकण्ठान्तरे वीर ! यदा चोत्पद्यते कृमिः ।
षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिः ॥' इति ।

एवमन्यान्यपि वचनानि व्यवस्थापनीयानि । इति संसर्गप्रायश्चित्तम् ।

अथोपपातकेषु प्रायश्चित्तानि ।

तान्याह याज्ञवल्क्यः— (३।२३४–२४२)

'गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया ।
अनाहिताग्निता पण्यविक्रयः पैरिवेदनम् ॥
भृताद्ध्ययनादानं भृतकाध्यापनं तथा ।
पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया ॥
स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् ।
नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः ।
धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम् ।
पितृमातृसुतत्यागस्तडागारामविक्रयः ॥
कन्यासन्दूषणं चैव परिविन्दकयाजनम् ।
कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् ॥
आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणम् ।
स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च ॥
इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् ।
हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः ॥
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् ।
तथैवानाश्रमे वासः परान्नपरिपुष्टता ॥

असच्छास्त्राधिगमनमाकरेष्वधिकारिता ।
भार्याया विक्रयश्चैषामेकैकमुपपातकम् ॥ ' इति ।

तत्र [१] गोवध उक्तं वधप्रायश्चित्तप्रसङ्गेन । तत्रत्यान्येव मानवानि त्रैमासिकादीनि याज्ञवल्क्यीयानि च चान्द्रायणादीनि वक्ष्यमाणेषु व्रात्यतादिष्वपि विशेषविहितैः प्रायश्चित्तैः सह तुल्यविकल्पतया व्यवस्थया वा योज्यानि । न च विशेषविहितैः सामान्यविहितानां बाधः, उपपातकसंज्ञानर्थक्यापत्तेः । सामान्यप्रायश्चित्तं प्रकृत्यैव हि सार्थवती, नान्यथा । प्रयोजनान्तराभावात् ।

अत एव याज्ञवल्क्यः– (३।२६५)

' उपपातकशुद्धिः स्यादेवं चान्द्रायणेन च ।
पयसा चापि मासेन पराकेणाथवा पुनः ॥ ' इति ।

मनुश्च— (११।११७).

' एतदेव व्रतं कुर्य्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्ज्जं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥ ' इति ।

एतदेव त्रैमासिकम् । अवकीर्णिपर्युदासादेवोक्तानुक्तप्रायश्चित्तेषेतत्प्राप्तिर्गम्यते ।

[२] अथ व्रात्यतायाः ।

याज्ञवल्क्यः– (१।३७)

' आ षोडशाद्द्वाविंशाच्च चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥ ' इति ।

अत्र– ' सावित्री पतिता यस्य दशवर्षाणि पञ्च च ।
सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः ॥
एकविंशतिरात्रं च पिबेत्प्रसृतियावकम् ।
हविषा भोजयेच्चैव ब्राह्मणान्सप्त पञ्च च ॥
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् ।'

इति (य. स्मृ. ५।२७–२९) व्यासोक्तेः;

आ षोडशादित्याङ्मर्यादायां नाभिव्याप्तौ; द्वाविंशाच्चतुर्विंशाच्चेत्यत्रापि तदर्थक एवानुषज्यते । तेन पञ्चदशैकविंशतित्रयोविंशतिवर्षसमाप्त्युत्तरमेव विप्रक्षत्रियविशां क्रमात्पातित्यमिति ।

याज्ञवल्क्यः— (१।३८)

'अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥ ' इति ।

एतदशक्तस्याहतुर्मनुविष्णू— (म. ११।१९१ वि. ५४।२६)

'येषां द्विजानां सावित्री नान्यूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन् कृच्छ्रान्यथाविध्युपनाययेत् ॥ ' इति ।

उपनेत्रभावकृतव्रात्यतायां तु पूर्वोक्तमेकविंशतिरात्रम् ।

उपनेत्रसत्वे कामतः पञ्चदशवर्षातिक्रमे वसिष्ठ आह— (११।७६) 'पतितसावित्रीक उद्दालव्रतं चरेत् । द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसाऽर्द्धमासमामिक्षयाऽष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमभक्षः अहोरात्रमुपवसेत् ' इति ।

यत्त्वापस्तम्बः — (१।१।२५—२७) ' अतिक्रान्ते सावित्र्याः काल ऋतुत्रयं त्रैविद्यकं ब्रह्मचर्यं चरेत् । अथोपनयनम् । ततः संवत्सरमुदकोपस्पर्शनम् । अथाध्याप्य ' इति ।

—ब्राह्मणादीनां षोडशवर्षाद्यात्मक उपनयनकालेऽतिक्रान्ते ऋतु मासद्वयं त्रैविद्यकं वेदत्रयार्थं भैक्षाशनं गुरुशुश्रूषणादिकम् ;

तदुद्दालकव्रताशक्तस्य ।

स एव—(ध. सू. १।१।२८—३२+१।२।१—१०) ' यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः । तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् । तेषामिच्छतां प्रायश्चित्तम् । यथा प्रथमेऽतिक्रम ऋतुमेवं संवत्सरः । अथोपनयनं तत उदकोपस्पर्शनम् ' ॥

' प्रतिपुरुषं संख्याय संवत्सरान्यावंतोऽनुपेनीताः स्युः । सप्तभिः पावमानीभिः ' यदंति यच्च दूरक ' इत्येताभिर्यज्ञपवित्रेण सामपवित्रेणांऽगिरसेनेति । अपि वा व्याहृतिभिरेव । अथाध्याप्यः । अथ यस्य प्रपितामहादीनां न स्मर्यत उपनयनं ते श्मशानसंस्तुताः । तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् । तेषामिच्छतां प्रायश्चित्तं, द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेत् ; अथोपनयनम्, तत उदकोपस्पर्शनं पावमान्यादिभिः । अथ गृह्यमेधोपदेशनम् । नाध्यापनं ततो योऽभिवर्त्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे । तत ऊर्ध्वं प्रकृतिवत् ' इति ।

---

१ ' यजुष्पवित्रेण ' इति पठित्वा ' यजुष्पवित्रेण ' ' आपो अस्मान्मातरः शुन्धयन्तु ' इत्यनेन, इति व्याख्यातमुज्ज्वलायाम् ।

—ब्रह्महसंस्तुताः ब्रह्महशब्दवाच्याः। यथा प्रथमेऽतिक्रम ऋतुमेवं संवत्सरमिति। प्रथमातिक्रमवदृतुस्थाने संवत्सरस्तेन प्रतिपुरुषं त्र्यब्दं ब्रह्मचर्य्यमुपनयनानंतरं यावंतोऽनुपनीताः पुरुषास्तावत्संख्याकवर्षपर्यंतं प्रत्यहमेभिर्मंत्रैः प्रायश्चित्तार्थस्नानं कार्यम्। तत्र मंत्राः—'यदंति यच' (ऋक्सं. ७।२।१७) इति' सप्त पावमान्यः। 'येन देवाः पवित्रेण' (तै.ब्रा.१।४।८) इति यज्ञपवित्रम्। 'कया न' (सा.सं.उ.१।१।१२) इति सामपवित्रम्। 'हंसः शुचिषत्' (अथ.सं.) इत्यांगिरसम्। श्मशानसंस्तुताः श्मशानवन्निरसनीयाः। द्वादशाब्दं ब्रह्मचर्यप्रायश्चित्तम्। उदकोपस्पर्शनं तु पुरुषसंख्याकाब्दानि यावत्। मंत्रास्त एव। गृहमेधो गार्हस्थ्यम्। तेषामध्यापनं नास्ति। तत उत्पन्नस्य प्रकृतिवत् यथाकालोपनयनमिति

इति व्रात्यता।

अथ ऋणानापाकरणे।

तच्चतुर्विधम्। परद्रव्यमृणत्वेन गृहीत्वा तस्याप्रदानम्। तथा 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्य्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' (तै. सं. ६।३।१०) इति।

—यज्ञेनेति सत्यधिकारम्।

मनुः—(११।२७)

'इष्टिं वैश्वानरीं चैव निर्वपेदब्दपर्य्यये।
कल्पानां पशुयज्ञानां निष्कृत्यर्थमसंभवे॥' इति।

—अब्दपर्यये संवत्सरांते। कल्पानां प्रारब्धानामिति केचित्। नित्यतया कल्पानामिति तु युक्तम्।

प्रजापतिः—

'समांते सोमयज्ञानां हानौ चांद्रायणं चरेत्।' इति।

तथा च स्वाधिकारोत्तरवर्षगणनया कामाकामयोस्त्रैमासिकचांद्रायणादीनि योज्यानि। अतश्च—

'प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा।
कर्त्तव्याऽयनेष्टिश्च चातुर्मास्यानि चैव हि॥
एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः।' (१२५-१२६)

इति याज्ञवल्कीयमपि सोमादेर्द्वितीयादिवर्षेष्वननुष्ठाने वेदितव्यम् ।

अथानाहिताग्नितायां प्रायश्चित्तम् । तच्च सत्यधिकारे आधानाभावे वेदितव्यम् । तत्रानाहिताग्नेः संवत्सरादूर्ध्वमापदि याज्ञवल्कीयमुपपातक-सामान्यव्रतचतुष्टयं वर्णशक्त्याद्यपेक्षया योज्यम् । अनापदि तु तत्रैव मानवं त्रैमासिकम् ।

अथोक्तं संवत्सरात्काण्वाजिनिराह—

'काले त्वाधाय कर्माणि कुर्याद्विप्रो विधानतः ।
तदकुर्वंस्त्रिरात्रेण मासि मासि विशुद्ध्यति ॥'

काल इत्यधिकारोपलक्षणम् । तत्—आधानम् ।

स एव—'अनाहिताग्नौ पित्रादौ यक्ष्यमाणः सुतो यदि ।
स हि व्रात्येन पशुना यजेतन्निष्क्रयाय तु ॥'

—यक्ष्यमाण आधाता यष्टा च इति स्मृत्यर्थसारे । व्रात्येन क्रियमाणो व्रात्येन वा निमित्तेन विहितः पशुरिति वैय्यधिकरणेनान्वयः । अत्र व्रात्यो यथाकालेऽनुपनीतो न गृह्यते, तत्र व्रात्यस्तोमाख्यसोमयागविशेषस्यैव विधानात् । किंतु 'यस्य पिता पितामहो वा सोमं न पिबेत्स व्रात्यः' इति वाक्योक्तो गृह्यते, तस्यैव व्रात्यपशोर्विधानात् । तथा च श्रुतिः—'यस्य पिता पितामहः सोमं न पिबेदथ पिपासेत्स ऐंद्राग्नं पुनरुत्सृष्टमालभेत' इति ।

आवसथ्याधानेऽपि विशेषमाह काण्वाजिनिः—

'कृतदारो गृहे ज्येष्ठो योऽनादध्यादुपासनम् ।
चांद्रायणं चरेद्वर्षं प्रतिमासमहोऽपि वा ॥' इति ।

ज्येष्ठग्रहणात्तस्मिन्नकृतावसथ्याधाने कनिष्ठस्यानधिकारः । जेष्ठोऽपि पितर्यकृतावसथ्याधाने सति नादध्यात्,

'पितुः सत्यप्यनुज्ञाने नाधीयीत कथंचन ।'

इत्यस्य स्मार्त्ताधानेऽपि प्रवृत्त्यविशेषात् । तथा ज्येष्ठग्रहणात्कनिष्ठः कृतदारोऽपि गृहपतिमरणाद्विभागात्प्रागनधिकारित्वान्न प्रायश्चित्तीयत इति सिद्धम् ।

---

१ गालितवृषणो बलीवर्द उत्सृष्टः, स एव जीर्णो लाङ्गलवहनादेर्मुक्तः पुनरुत्सृष्टः ।—तै. सं. भा. २।१।५

इदं च प्रायश्चित्तं 'आवसथ्याधानं दारकाले दायाद्यकाले प्रेते वा गृहपतौ' इति कात्यायनोक्तकालत्रयातिक्रमे द्रष्टव्यम्।

अथाविक्रेयविक्रये प्रायश्चित्तानि।

शंखलिखितौ–'न विक्रीणीयादविक्रेयाणि। तिलतैलदधिक्षौद्रलवणद्राक्षामद्यमांसकृतान्नस्त्रीपुरुषहस्त्यश्ववृषगंधरसक्षौमकृष्णाजिनसोमोदकनीलीविक्रयात्सद्यः पतति ब्राह्मणः' इत्युपक्रम्य 'वत्सरं तप्तकृच्छ्रमाचरेत्' इति।

हारीतः–'गुडतिलपुष्पमूलफलपक्कान्नविक्रये सोमायनम्। लाक्षालवणमधुमांसतैलक्षीरदधितक्रघृतगंधचर्मवाससामन्यतमविक्रये चांद्रायणम्। तथोर्णाकेशकेशरभूधेनुवेश्माश्मशस्त्रविक्रये च। मत्स्यमांसस्नाय्वस्थिशृंगनखशुक्तिविक्रये तप्तकृच्छ्रम्, हिंगुगुग्गुलुहरितालमनःशिलांजनगैरिकक्षारलवणमणिमुक्ताप्रवालवैणववेणुमृन्मयेषु च। आरामतडागोदपानपुष्करिणीसुकृतविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारो दशसहस्रं जपन् गायत्रीं संवत्सरेण पूतो भवति। हीनमानोन्मानसंकरव्याजद्रव्यसंकीर्णविक्रये च' इति।

वृद्धपराशरः—

'विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेत्।' इति।

चतुर्विंशतिमते—

'सुराया विक्रयं कृत्वा चरेत्सौम्यचतुष्टयम्।
लाक्षालवणमांसानां चरेच्चांद्रायणत्रयम्॥
मध्वाज्यतैलसोमानां चरेच्चांद्रायणद्वयम्।
पयःपायसपूपानां चरेच्चांद्रायणव्रतम्॥
दन्नश्चेक्षुरसस्यैव गुडखंडादिविक्रये।
सर्वेषां स्नेहपक्वानां पराकं तु समाचरेत्॥
कदलीं नारिकेलं च नारिंगं बीजपूरकम्।
एतेषां पादकृच्छ्रं स्याज्जंबीरादेस्तथैव च॥
कस्तूरिकादिगन्धानां विक्रये कृच्छ्रमाचरेत्।
कर्पूरादेस्तदर्द्धं स्यादिनं हिंग्वादिविक्रये॥
तिलानां विक्रयं कृत्वा प्राजापत्यं समाचरेत्।
धर्मार्थं कृमिजातांश्च यज्ञार्थं विक्रयं नयेत्॥

रक्तपीतादिवस्त्राणि कृष्णाजिनमथापि वा ।
विक्रये त्र्यहमेतेषां गर्गस्य वचनं यथा ॥
गोविक्रयं नरः कृत्वा लाभार्थं धनमोहितः ।
प्राजापत्यं प्रकुर्वीत गजानामैन्दवं स्मृतम् ॥
खराश्वाश्वतराणां च करभाणां च विक्रये ।
पराकं तत्र कुर्वीत सुतानां द्विगुणं चरेत् ॥
नारीणां विक्रयं कृत्वा चरेच्चान्द्रायणव्रतम् ।
द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः ॥
चान्द्रायणं प्रकुर्वीत एकाहाद्वेदविक्रये ।
अङ्गानां तु पराकः स्यात्स्मृतीनां कृच्छ्रमाचरेत् ॥
इतिहासपुराणानां चरेत्सान्तपनं द्विजः ।
रहस्यपञ्चरात्राणां कृच्छ्रमेव समाचरेत् ॥
गाथानां नीतिशास्त्राणां प्राकृतानां तथैव च ।
सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेत् ॥' इति ।

च्यवनः– 'दधिमधुपिष्टसर्पिःपक्वान्नतैलतक्रक्षीररसविषशस्त्रतिलाश्वनीलीकौशेयवासोलाक्षारक्तलवणविक्रये प्राजापत्यं चरेत् ॥'

शातातपः— (८७)

'आममांससुरासोमलाक्षालवणसर्पिषाम् ।
विक्रये सर्वपण्यानां द्विजश्चान्द्रायणं चरेत् ॥'

विष्णुः— (५४।२०;१७) 'रक्तवस्त्ररङ्गरत्नगुडगन्धमधुरसौषधीविक्रयी त्रिरात्रमुपवसेत् । प्राणिभूपुण्यसोमविक्रयी तप्तकृच्छ्रं कुर्यात् । तं च भूयश्चोपनयेत् ॥'

शङ्खः– (१७।५८–५९)

'धारयित्वा तुलां वक्रां विषमां कारयन्वणिक् ।
सुरालवणमद्यानां कृत्वा क्षीरस्य विक्रयम् ॥
लाक्षायाश्चैव मांसस्य कुर्यादेव महाव्रतम् ।
विक्रेता प्राणिनामब्दं तिलस्य च तथाऽऽचरेत् ॥' इति ।

–महाव्रतं द्वादशाब्दम् । भूयोऽभ्यासविषयमेतत् ।

अथाविक्रेयाणि ।

पैठीनसिः– 'ब्राह्मणस्य लवणं पक्वान्नं मधु क्षीरं दधि घृतमुदकं सर्वगन्धास्तिला रक्तं वासो गुडतैलधान्यपशूनामेकशफः केशरिणश्च[1] सर्वे चारण्याः पशवो विद्या गावः शङ्खश्चोर्णश्चेति विक्रयणेनैकैकैषामेकैकस्मिन्प्राजापत्यं चरेत् ' इति ।

तथा पुनः स एव– 'आरामतडागोदपानपुष्करिणीसुकृतसोमविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारः दशसाहस्रं गायत्रीं जपन् संवत्सरेण पूतो भवति ' इति ।

सुमन्तुः— 'देवर्षिसोमचैत्यात्मापत्यकूपोदपानदानात्मनां विक्रये कृच्छ्रत्रयं चरेत् ' इति ।– देवर्षीति प्रतिमाभिप्रायेण ।

भविष्यपुराणे– (१।१८४।४६)

'गुडं तिलांस्तथा नीलीं केशगोधूमकान्यवान् ।
विक्रीय ब्राह्मणो गां च कृच्छ्रं सान्तपनं चरेत् ॥ ' इति ।

गोविक्रये निन्दार्थवादमाह यमः—

'गवां विक्रयकारी तु गवि रोमाणि यानि तु ।
तावद्वर्षसहस्राणि गवां गोष्ठे कृमिर्भवेत ॥ ' इति ।

एतानि च लघुगुरुप्रायश्चित्तानि कामाकामसकृदसकृच्छक्त्याद्यपेक्षया योजनीयानि । एतन्निमित्तव्यतिरिक्तेषु तूपपातकसामान्यप्रायश्चित्तानि तथैव योज्यानि ।

इदं च सर्वं प्रायश्चित्तजातमापदि वैश्यवृत्त्या जीवतो ब्राह्मणस्यैव । इतरेषां त्वापदि न दोषः ।

'वैश्यवृत्तावविक्रेयं ब्राह्मणस्य पयो दधि । ' (१।५७)

इति नारदस्मृतेरिति मिताक्षरायाम् ।

यत्र च निषेधस्तत्रैव प्रायश्चित्तविधयः प्रवर्त्तन्ते । अत एव क्वचित्प्रायश्चित्तविधौ ब्राह्मणग्रहणं कृतम् । शूलपाणिस्त्वापदि शूद्रस्यैव दोषाभावमाह ।

---

1 केसरिणोऽश्वाः । म. भा. टी. १२।७०।१४

तथा च पराशरः– (१।६२)

'लवणं मधु मद्यं वा दधि तक्रं घृतं पयः।
न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयम् ॥'

कालिकापुराणेऽपि—

'विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक्।
मधु चर्म सुरां लाक्षां त्यक्त्वा मांसं च पञ्चमम् ॥' इति;

तन्न, अनयोर्वाक्ययोरापद्विषयत्वे प्रमाणाभावात्। न च निषेधानामापदि ब्राह्मणमात्रविषयत्वाच्छूद्रे प्रतिप्रसवानुपपत्तिरिति वाच्यम्; 'शूद्रस्य द्विजशुश्रूषा' (याज्ञ.१।१२०) इति नियमेनोपायान्तराणां व्यावर्तितत्वात्। अतश्च शूद्रस्य नापद्यपि मद्यादिव्यतिरिक्तानि विक्रेयाणि। क्षत्रियवैश्ययोस्त्वनापदि शूद्रवत्प्रतिप्रसवाभावात् सर्वाण्यविक्रेयाणि। आपदि त्वदोषः। निषेधानां प्रायश्चित्तानां च ब्राह्मणमात्रविषयत्वोक्तेः। ब्राह्मणानामेव त्वापदि वैश्यवृत्त्या जीवने दोष इति निष्कर्षः।

इदंच प्रायश्चित्तजातमपण्यविक्रयार्जितधनपरित्यागपूर्वकं कार्यमित्याह मनुः– (११।१९३)

'यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुद्ध्यंति जप्येन तपसैव वा ॥' इति।

अत्र च जपतपसोर्विकल्पः उत्सर्गस्य तूभयत्र समुच्चय इति।

मनुः—(१०।९०)

कामसुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः।
विक्रीणीत तिलान् शुद्धान् धर्मार्थमचिरस्थितान् ॥'

कृष्यादिग्रहणं नियमार्थम्। तेन क्रीतानां तिलानां विक्रये दोष एव।

इत्यपण्यविक्रये।

परिवेदने उक्तम्।

भृतकाध्यापकभृतकाध्यापितयोश्च पूर्वोक्तव्रतानि देशकालशक्त्यपेक्षया योज्यानि।

अशक्तस्य विष्णुराह—

'भृतकाऽध्यापनं कृत्वा भृतकाध्यापितस्तथा।
अनुयोगप्रदानेन त्रीन्पक्षान्नियतः पिबेत् ॥' इति।

ब्राह्मीं सुवर्चलामिति शेषः। अधीयानस्य विप्रस्य तिरस्कारोऽनुयोग इति मिताक्षरायाम्।

अथ सुतानां विक्रये पैठीनसिः–' सुतविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवति '।

–इदं चैकपुत्रस्य कामतोऽनापदि। ' सुतविक्रयं कृत्वा तप्तकृच्छ्रं चरेत् ' इति शंखोक्तं त्वापद्यनेकपुत्रस्याकामतो ज्ञेयम्। अत्रैव कामतस्तु ' देवर्षिसोमचैत्यान्नापत्यकूपोदपानदारात्मनां विक्रये कृच्छ्रद्वयम् ' इति सुमंतूक्तम्।

कामतोऽनेकपुत्रस्यानापदि कन्यापुत्रयोर्विक्रेतुश्चतुर्विंशतिमते–

' नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्रतम्।
द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः॥ ' इति।

आपद्यकामतः कन्याविक्रये तु

' विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेत्। '

इति वृद्धपराशरोक्तम्।

इत्यपत्यविक्रये।

अथायाज्ययाजने मनुः–(११।१९७)

' व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च।
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति॥ '

परेषां शूद्रादीनाम्, अंत्यकर्मौर्ध्वदैहिकम्। यद्वा परेषामसपिंडानां स्वजातीयानामेव। अस्मिन्पक्षे आवृत्तावेतत्प्रायश्चित्तम्। अत्र चैकस्यैव कृच्छ्रस्याभ्यासः, संख्यायाः पृथक्त्वनिवेशितत्वात्। तेन भिन्नास्त्रयः कृच्छ्राः कार्याः। ते च प्राजापत्यसांतपनातिकृच्छ्राख्या इति शूलपाणिः।

तेषां च गुरुलघुभूतानां त्रित्वं निमित्तगौरवशाद्यपेक्षया योज्यम्। अहीनो द्विरात्रादिर्द्विशाहपर्यंतोऽहर्गणयागः। एतच्चाकामत उपपातकसामान्यप्रायश्चित्तापवादार्थम्।

व्रात्यस्य कामतो याजने तु शातातपः–' पतितसावित्रीकान्नोपनयेन्नाध्यापयेद्य एतानुपनयेद्याजयेद्वा स उदालकव्रतं चरेत् ' इति।

---

१ युक्तं तु वचनात्तादृशार्थप्रतीत्यभावात् पूर्वोक्तं प्रायश्चित्तमेवेति। प्रा. मु.

उद्दालकव्रतं तु व्रात्यताप्रायश्चित्ते उक्तम् ।

यत्तु पैठीनसिः–' शूद्रयाजकः सर्वद्रव्यत्यागात्पूतो भवति । प्राणायामसहस्रेषु दशकृत्वोऽभ्यस्तेषु ' इति; तदकामतोऽभ्यासविषयम् ।

अत्रैव कामतोऽभ्यासे तु शूद्रयाजकादीन्पठित्वा उशना आह–(हा.२।४।५) ' एते पंचतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः क्रमेण ग्रीष्मवर्षाहेमंतेषु, मासं गोमूत्रयावकमश्नीयुः ' इति ।

यत्तु यमः—' पुरोधाः शूद्रवर्णस्य ब्राह्मणो यः प्रवर्त्तते ।
लोभादर्थप्रसंगाद्वा तस्य कृच्छ्रो विशोधनम् ॥ '

इति; तदकामतोऽशक्तविषयम् ।

चंडालादिसन्निधौ श्रुत्यादीनामकामतः पाठे तु षट्त्रिंशन्मते–' चंडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे त्वेकरात्रम् ' इति ।

यत्तु वसिष्ठः–(२३।२९–३०) ' पतितचंडालारावश्रवणे त्रिरात्रं व्रात्यता अनश्नन्त आसीरन्सहस्रपरमं वा तदभ्यस्यंतः पूता भवंतीति विज्ञायते । एतेनैव गर्हिताध्यापकजापकयाजका व्याख्याता दक्षिणात्यागाच्च पूता भवन्ति ' इति; तद्बुद्धिपूर्वविषयमिति विज्ञानेश्वरः ।

इत्ययाज्ययाजनम् ।

२६—२८ अथ पितृमातृसुताचार्यभार्यात्यागे ।

तत्र श्राद्धप्रकरणे—

' अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथा । ' (३।१५८)

इत्यपांक्तेयमध्ये पाठः ।

तत्र प्रायश्चित्तमाह मनुः–(११।२००)

' षष्ठान्नकालता मासं संहिताजप एव हि ।
होमश्च शाकलो नित्यमपांक्त्यानां विशोधनम् ॥ ' इति ।

शाकलो ' यद्देवा देवहेडनम् ' इत्यादियजुर्मंत्रकरणकः ॥

३१–अथ कन्यासंदूषणे ।

[तत्र सवर्णकन्यादूषणे त्रैमासिकद्वैमासिकचांद्रायणानि क्रमेण

---

१ कन्यादूषणमङ्गुल्यादिना योनिविदारणमिति विज्ञानेश्वरप्रभृतयः । अहं तु ब्रुवे—' यावन्न लज्जया याति कन्या पुरुषसन्निधौ । योन्यादीन्नावगूहेत तावद्भवति कन्यका ॥ ' इति लक्षणोक्तकन्यायां हठाद्वीर्यनिक्षेपः कन्यासन्दूषणशब्दार्थ–

कामाकामशक्त्याद्यपेक्षया योज्यानि । आनुलोम्येन तु दूषणे मासं पयोव्रतप्राजापत्यं वा पूर्ववद्योज्यं,

'सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः ।'

(याज्ञ.२।२८८) इति तत्र दंडस्याल्पत्वात् । प्रातिलोम्येन तु दूषणे क्षत्रियवैश्ययोः]

शंख आह–'कन्यादूषी सोमविक्रयी च कृच्छ्रमब्दं चरेयाताम्' इति।

हारीतोऽपि कन्यादूषीत्याद्युपक्रम्य–(२।४–५) 'एते पंचतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुर्यौष्मवर्षाहेमंतेषु । मासं गोमूत्रयावकमश्नीयुः' इति ।

शूद्रस्य तु प्रातिलोम्येन कन्यादूषणे वध एव–

'दूषणे तु करच्छेद उत्तमायां वधस्तथा'

(याज्ञ. २।२८८) इति वचनात् । इति कन्यादूषणे ॥

३९–अथाग्नित्यागे ।

मनुः—(११।४१)

'अग्निहोत्रपरिभ्रष्टाग्नीन् ब्राह्मणः कामकारतः ।
चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥'

–इति भट्टदिवाकरः । तत्र यद्यपि 'कन्याया दूषणं पुंभिर्दुष्प्रेक्षाया न विद्महे ।' (भाग.१०।६२।२९) इत्यादिव्यवहारदर्शनादनूढायाः सम्भोगमात्रमपि कन्यादूषणमुच्यते, 'योऽकामां दूषयेत् कन्याम्' (म. ८।३६४) इत्यादौ च भोग एव प्रतीयते, तथापि तस्य 'सखिभार्याकुमारीषु' (या. ३।२३१) इति गुरुतल्पगसमत्वस्योक्तत्वात् नासावत्र विवक्षितः । नापि दर्शितलक्षणेन निर्वाहः, 'कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत् ।' (८।३६९) इत्यादेरनुपपत्तेः । अङ्गुलिच्छेदरूपदण्डविधानमपि भोगपक्षे नागुणमिति व्यक्तमेव । अतो विज्ञानेश्वरायुक्तमेव युक्तमिति प्रतीमः । अत एव प्रायश्चित्तविवेकटीकायां तत्त्वार्थकौमुद्याम्–'न तु कन्यागमनम्, तस्यानुपातकत्वात्' इत्युक्तम् । कन्याया दूषणम् अकन्या इत्युक्तिर्वा ।—प्रा. वि.

१ ग्रीष्मे पञ्चतपाः — चतुर्दिगवस्थितैरग्निभिरूर्ध्वं चादित्यतेजसात्मानं तापयेयुः । वर्षासु–अभ्रावकाशं यत्र देशे देवो वर्षति, तत्र छत्राद्यावरणरहितस्तिष्ठेत् । हेमन्ते जलशयनं जलक्लिन्नदेशे आर्द्रवाससः शयेयुरित्यर्थः । तथा च मनुः—(६।२३) 'ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥' इति ।

—अपविध्य त्यक्त्वा । वीरो यजमानः । मासमपविद्धेत्यन्वयः । इदं च कामतः ।

यत्तु हारीतः—' संवत्सरोत्सन्नेऽग्निहोत्रे चांद्रायणं कृत्वा पुनरादध्यात् । द्विवर्षोत्सन्ने सोमायनचांद्रायणे कुर्यात् । त्रिवर्षोत्सन्ने संवत्सरकृच्छ्रमभ्यस्य पुनरादध्यात् ' इति; तदकामे ज्ञेयम् ।

शंखस्तु त्रिवर्षोत्सादे गोदानमप्यधिकमाह—' अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेद्गां च दद्यात् ' इति ।

विष्णुरपि—(५४।१३) ' वेदाग्न्युत्सादी त्रिषवणस्नायी अधःशायी संवत्सरं भैक्षेण वर्त्तयेत् ' इति । कामतस्त्वेतान्येव स्वस्वविषये द्विगुणानि ।

यत्तु वसिष्ठः—(२१।३०) ' योऽग्नीनपविध्येत्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेत् ' इति ।

व्याघ्रः—

' मासद्वयं तु यो वह्निं त्यजेदेवं समाचरेत् ।
नास्तिक्यात्कृच्छ्रमेकं तु होमद्रव्यं ददाति चेत् ॥ '

होमद्रव्यं यावत्कालं होमो न कृतस्तावद्धोमपर्याप्तम् ।

तथा च भरद्वाजगृह्ये—

' यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः ।
तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव च ॥ ' इति ।

जातूकर्ण्योऽपि—

' अतीतकालं जुहुयादग्नौ विप्राय वा स्वयम् ।
दद्याद्वेदविदे सम्यक् कृत्वाऽऽधानं पुनर्द्विजः ॥ ' इति ।

इदं च होमद्रव्यदानं स्मार्त्ताग्नित्यागविषयमिति माधवः । उभयत्यागेऽपि युक्तमिति तु प्रतिभाति ।

मासचतुष्टयत्यागे तु स एव—

' चतुष्टये तु संपूर्णे मासानां तु हुताशनम् ।
त्यक्त्वाऽपि कृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते ॥ '

षण्मासत्यागे पराकः । अत ऊर्ध्वमब्दपर्यंतं पयोव्रतम् ।

यथाहोशनाः—

' षण्मासांस्त्यजते यो वै पराकं तु समाचरेत् ।
ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः ॥

वर्षपर्य्यंतमेवाहुर्मुनयः शंसितव्रताः । '

मासषट्कादूर्ध्वं संवत्सरं यावद्याज्ञवल्क्योक्तान्युपपातकसामान्यप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योजनीयानि । संवत्सरादूर्ध्वं तु मनूक्तद्वैमासिकत्रैमासिके कालाल्पत्वमहत्त्वापेक्षया योज्ये । एतानि च सर्वप्रायश्चित्तानि नास्तिक्यादग्नित्यागे ।

यदा तु प्रमादात्त्यजति तदा भरद्वाजगृह्ये विशेष उक्तः–' प्राणायामशतमा त्रिरात्रादुपवासः स्यादा विंशतिरात्रात् । अत ऊर्ध्वमा षष्टिरात्रात्तिस्रो रात्रीरुपवसेत् । अत ऊर्ध्वमा संवत्सरात् प्राजापत्यं चरेत् । अत ऊर्ध्वं कालबहुत्वे दोषबहुत्वम् ' इति । इदमेव वाकामतो गृह्याग्नित्याग इत्यपरार्के ।

अत्रैव विषये स्कांदे—

' हुताशनं तु यो विप्रः प्रमादात्त्यजति प्रभो ।
प्राणायामशतं कुर्यादुपवासमथापि वा ॥ ' इति ।

कामतस्त्यागेऽपि तत्रैव–' द्वादशाहातिक्रमे त्र्यहमुपवासः । मासातिक्रमे द्वादशाहमुपवासः । संवत्सरातिक्रमे मासोपवासः पयोभक्षणं वा । कूष्मांडीभिर्होमः क्रमेणोभयं च ' इति । उपवासाशक्तौ मासं पयोभक्षणम् । संवत्सरानंतरमधिककालातिक्रम उभयमिति ।

मदनपारिजाते–इदमेव चालस्येन श्रौताग्नित्यागविषयमिति ।

तथा च स्मृत्यंतरे—

' आलस्येन यदा वह्निं द्वादशाहं त्यजेत्प्रभो ।
त्रिरात्रमुपवासं च चरेत्पापविशुद्धये ॥ ' इति ।

इत्यग्नित्यागे ।

कौमारदारत्यागे तु विशेषमाह शातातपः– ' कौमारदारत्यागान्मासं पयोभक्षः शुद्ध्यति । ' इदं चाल्पकालत्यागे ।

बहुकालत्यागे तु कौमारदारत्यागं प्रक्रम्य हारीतः– ' पञ्चतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुर्मीष्मवर्षहेमन्तेषु मासं गोमूत्रयावकमश्नीयुः ' इति ।

४३ अथ द्रुमच्छेदे मनुविष्णू–(११।१४२+५०–४८)

' फलदानां च वृक्षाणां छेदने जप्यमृक्शतम् ।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम् ॥ '

यत्तु यमः– 'वृक्षलतागुल्मतृणच्छेदनेऽर्धकृच्छ्रं फलवतां प्राजापत्यम्' इति ।

प्रायश्चित्तविवेकेऽपरार्के च– 'वृक्षगुल्मलतावीरुच्छेदने वृद्धकृच्छ्रः' इति पाठ उक्तः । वृद्धकृच्छ्रो दिनसाध्य इति प्रागुक्तम् ।

यच्च हारीतः– (२१।४९) 'स्थावरसरीसृपादिवधे 'यस्येदं प्राणम्' इत्येतयाऽऽज्यं हुत्वा तिलपात्रं ब्राह्मणाय दद्यात्, इति तदश्वत्थादिपुण्यवृक्षविषयमिति केचित् । युक्तं तु चैत्यश्मशानादिस्थलजवृक्षाणां कामतः छेदनविषयत्वम् । तत्र दण्डद्वैगुण्यादिदर्शनात् ।

यथाह याज्ञवल्क्यः– (२।२२८–२२९)

'चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ।
जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते ॥
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् ।
पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्त्तने ॥' इति ।

–गुल्मा मालत्यादयः । गुच्छाः कुरण्टकादयः । क्षुपाः करवीरादयः । लता द्राक्षाद्याः । प्रतानाः सारिवाद्याः । ओषध्यः शाल्याद्याः । वीरुधो गुडूच्याद्या इति विज्ञानेश्वरः । यस्येदमिति मन्त्रस्तु तैत्तिरीये– 'यस्येदं प्राणं निमिषद्यदेजति यस्य जातं जनमानं च केवलम् । स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳहस ॥' (तै. सं. ४।७।१५) इति ।

यत्तु––

'संवत्सरं व्रतं कुर्याच्छित्त्वा वृक्षं फलप्रदम् ।' (१७।५३)

इति शङ्खोक्तम्; तन्महाफलप्रदनारिकेलादिवृक्षाणां कामतश्छेदनात्यन्ताभ्यासविषयम् । वृक्षमित्येकवचनं त्वनुवाद्यविशेषणत्वादविवक्षितम् ।

यत्तु विष्णुपुराणे– (१।१२।१०)

'भिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा शातयत्येकं ब्रह्महत्यां स विंदति ॥' इति ।

तदर्थवादमात्रम् । शूलपाणिरप्येवमेव । इति द्रुमच्छेदे ।

---

१ यदि कृषिकर्त्रा भूमिसमीकरणार्थं हन्यते, तदा न दोषः ।–प्रा. सु.

व्यसनेषु प्रचेताः– 'अनृतवाक्तस्करो राजभृत्यो वृक्षारोपकवृत्ति-र्गरदोऽग्निदोऽश्वरथगजारोहणवृत्ती रङ्गोपजीवी श्वागणिकः शूद्रोपाध्यायो वृषलीपतिर्भाण्डिको नक्षत्रोपजीवी श्ववृत्तिर्ब्रह्मजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूटकारकोऽपत्यविक्रयी मनुष्यपशु-विक्रेता चेति। तानुद्धरेत्समेत्य न्यायतो ब्राह्मणव्यवस्थया सर्वद्रव्य-त्यागेन चतुर्थकालाहाराः संवत्सरं त्रिषवणमनुतिष्ठेयुस्तस्यान्ते देवपितृ-तर्पणं गवाह्निकं चेत्येवं व्यवहार्या' इति; तदप्रत्याभ्यासे।

श्वागणिको यः श्वगणेन जीवति, 'श्वगणाट्ठञ् वा' (पाणि. ४।४।११) इति ठञ्। भाण्डिकस्तूर्यादिस्वनै राज्ञः प्रबोधयिता। श्ववृत्तिः सेवकः। ब्रह्मजीवी मूल्येन वैदिककार्यकर्ता। गवाह्निकं गोवधप्रायश्चित्तमुक्तम्।

यदपि बौधायनः (२।१।६३–६५) 'अथाशुचिकरणानि। द्यूतमभि-चारोऽनाहिताग्निरुञ्छवृत्तिता। समावृत्तस्य भैक्षचर्या तस्य च गुरुकुले वास ऊर्ध्वं चतुर्भ्यो मासेभ्यस्तस्य चाध्यापनं नक्षत्रनिर्देशनं चेति। द्वादशमासान् द्वादशार्द्धमासान् द्वादशद्वादशाहान् द्वादशषडहान् द्वादशत्र्यहान् द्वादशाहं षडहं त्र्यहमहोरात्रमेकाहं च' इति द्यूते संवत्सर-माह; तदप्यत्यन्ताभ्यासविषयमेव।

४८ यत्तु शूद्रसेवायां बौधायनः– (२।१।५१–५८) 'समुद्रयानं ब्राह्मणस्य न्यासापहरणं, सर्वापण्यैर्व्यवहरणं, भूम्यनृतं, शूद्रसेवा, शूद्रा-भिजननं तदपत्यत्वं च, एषामन्यतमं कृत्वा

चतुर्थकालमितभोजिनः स्युरधोऽभ्युपेयुः सवनानुकल्पम्।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरुपपद्यन्ति पापम्॥'

इति; तद्बहुकालं शूद्रसेवाविषयम्।

५१ अथानाश्रमे हारीतः– 'अनाश्रमी संवत्सरं प्राजापत्यं कृच्छ्रं चरित्वाश्रममुपेयात्। द्वितीयेऽतिकृच्छ्रस्तृतीये कृच्छ्रातिकृच्छ्रोऽत ऊर्ध्वं चान्द्रायणम्' इति।

इति याज्ञवल्क्योक्तोपपातकप्रायश्चित्तानि॥

अथ मनूक्तोपपातकप्रायश्चित्तानि ।

तत्राभिचारे मनुः- (११।९७)

'व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च ।
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुद्धयति ॥'

-अहीनो द्विरात्रादिः । अहीनो धार्मिकस्तद्विषयमभिचारमिति समानाधिकरण्यमिति शूलपाणिः । केचित्त्वेतद्वाक्योक्तकर्मयाजन एवैतत्प्रायश्चित्तं न तु यजन इत्याहुः । त्रिभिः कृच्छ्रैः प्राजापत्यसान्तपनादिकृच्छ्रैरित्यर्थः । एतच्च सकृत्करणे । अभ्यासे मूलकर्मणि च साधारणप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि ।

अथासत्प्रतिग्रहे ।

तत्र दुष्टप्रतिग्रहनिषेधमाह मनुः—

'असत्प्रतिग्रहीतारस्तथैवायाज्ययाजकाः ।
नक्षत्रैर्जीवते यश्च सोऽन्धकारं प्रपद्यते ॥'

मात्स्ये—

'तस्मात्तीर्थे न गृह्णीयात्तीर्थेष्वायतनेषु च ।
निमित्तेषु च सर्वेषु न प्रमत्तो भवेद्विजः ॥'

मनुः— (४।१८८)

'हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम् ।
अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत् ॥'

अत्र मन्त्राद्यविदुष एतत्प्रतिग्रहो निषिध्यते; न तु हिरण्यादीनां कृष्णाजिनादिवदप्रतिग्राह्यत्वम् ।

स्कान्दे-

'अजिनं मृतशय्यां च मेषीं चोभयतोमुखीम् ।
कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् ॥'

पाद्मे-

'महादानानि ये विप्रा गृह्णन्ति ज्ञानदुर्बलाः ।
वृक्षास्ते द्विजरूपेण जायन्ते ब्रह्मराक्षसाः ॥'

अयं च निषेध एकस्यैव नानेकेषाम् ।

तथा च वह्निपुराणे-

'महादानमिदं यस्मात्तस्मादेको हि नार्हति ।'

वसिष्ठः—(१३।२३) 'शस्त्रं विषं सुरा चाप्रतिग्राह्याणि ब्राह्मणस्य।'
पाद्मे—(सृ. खं. ३४।४१०)

'ब्रह्माण्डं भूमिदानं च ग्राह्यं नैकेन तद्भवेत्।
गृह्णन् दोषमवाप्नोति ब्रह्महत्यां न संशयः॥'

भूमिदानं षोडशमहादानान्तर्गतकाञ्चनमेदिनीदानमिति।
धर्मप्रकाशे हेमाद्रौ—

'ब्राह्मणः प्रतिगृह्णीयाद्दृत्यर्थं साधुतः सदा।
अश्वं च मणिमातङ्गतिललोहानि वर्जयेत्॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत्।
शय्यालङ्कारवस्त्राणि प्रतिगृह्य मृतस्य च।
नरकान्न निवर्त्तेत धेनुं तिलमयीं द्विज॥'

वह्निपुराणे—

'हस्त्यश्वरथयानानि मृतशय्यासनादि यः।
कृष्णाजिनं च गृह्णाति अनापत्सु गतो द्विजः॥
तथोभयमुखीं घोरां सशैलां मेदिनीं द्विजः।
कुरुक्षेत्रे च यदानं चंडालात्पतितात्तथा।
मासिके च नवश्राद्धे भुंजन्प्रेतत्वमाप्नुयात्॥'

हेमाद्रौ स्मृत्यंतरे—

'कृष्णाजिनप्रतिग्राही विक्रयी चैव रेतसः।
गजच्छायाश्रितो भुक्त्वा न भूयः पुरुषो भवेत्॥'

पाद्मे—

'न तीर्थे प्रतिगृह्णीयात्प्राणैः कंठगतैरपि।
अपि कामातुरो जंतुरेकां रक्षति मातरम्॥
तीर्थे प्रतिग्रहो यस्तु तीर्थविक्रय एव सः।
विक्रीतायां तु गंगायां विक्रीतः स्याज्जनार्दनः॥
जनार्दने तु विक्रीते विक्रीतं भुवनत्रयम्।
यस्तु लौल्याद्विजः क्षेत्रे प्रतिग्रहरुचिर्भवेत्।
नैव तस्य परो लोको नायं लोको दुरात्मनः॥'

ब्राह्मे—

'प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥
तत्र न प्रतिगृह्णीयात्प्राणैः कंठगतैरपि ।'

दानधर्मे—

'भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम् ।
तावद्भूमं विजानीयात्तदूर्ध्वं तीरमुच्यते ॥'

ब्राह्मे—

'सार्द्धहस्तशतं यावद्भूमंतस्तीरमुच्यते ।'

स्कांदे—

'तीराद्व्यूतिमात्रं तु परतः क्षेत्रमुच्यते ।
अन्नदानं जपो होमो गंगायां नात्र संशयः ॥'

तटयोः प्रत्येकं गव्यूतिमात्रं क्रोशद्वयम् । गंगायां क्षेत्रम् । अन्यत्र नद्यादावनुक्तेर्नेति धर्मप्रकाशे ।

याज्ञवल्क्यः— १।२०२)

'विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन्प्रदातारमधो नयत्यात्मानमेव च ॥' इति ।

एते च निषेधा अनेकविधाः कालदेशद्रव्यकर्तृदात्रादिभेदात् । तत्र कालतः उपरागादौ, देशतः कुरुक्षेत्रादौ, द्रव्यतो मेध्यादेः, कर्तृतस्तु विद्यातपोहीनस्य । दातृतस्तु द्वेधा-जातितः कर्मतश्च; यथा चंडालादेः पैतितादेश्च ।

प्रायश्चित्तमाह योगीश्वरः—(३।२८९)

'गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः ।
गायत्रीजप्यनिरतः शुद्ध्यतेऽसत्प्रतिग्रहात् ॥'

मनुरपि—(११।१९४)

'जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥'

मासमित्यत्यंतसंयोगवाचिन्या द्वितीयया त्रिसहस्रजपस्य प्रतिदिनव्यापित्वं गम्यते । इदं च गुरुत्वान्निमित्तद्वयसमुच्चयम् ।

यत्तु षट्त्रिंशन्मते—

'पवित्रेष्ट्या विशुद्ध्यंति सर्वे घोरप्रतिग्रहाः ।
ऐंद्रवेन मृगारेष्ट्या कदाचिन्मित्रविंदया ॥
देव्या लक्षजपेनैव शुद्ध्यंते दुष्प्रतिग्रहाः ।'

इति; तद्देशकालकर्तृद्रव्याणामन्यतरदुष्टत्वे ज्ञेयम् । अनयैव दिशा त्रिचतुःसन्निपाते प्रायश्चित्तगौरवं कल्प्यम्; पूर्वोक्तगायत्रीलक्षजपो वेति केचित् ।

षट्त्रिंशन्मतेऽपि—

'भिक्षामात्रे गृहीते तु पुण्यं मंत्रमुदीरयेत् ।'

हारीतः–(२१।३–७) 'मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् । पंच मध्यमे । दशोत्तमे । द्वादशरात्रं पयोव्रतं शतसहस्रमसत्प्रतिग्रहेषु' इति ।

उत्तमत्वादिकं च मण्यादीनां मूल्यतो वचनाच्च । तत्र वचनानि नारदः–(१४।१६)

'देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमम्'

छांदोग्ये–(म. भा. अनु.६२ पं. पु.ड. खं.३२।१८ व. स्मृ.२९।३०)

'त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ।' इति ।

देवलः—

'नवोत्तमानि चत्वारि मध्यमानि विधानतः ।
अधमानीति शेषाणि त्रिविधत्वमिदं विदुः ॥
अन्नं दधि मधु त्राणं गोभूरुक्माश्वहस्तिनः ।
दानान्युत्तमदानानि उत्तमद्रव्यदानतः ॥
विद्यादाच्छादनं वासः परिभोगोपधानकम् ।
दानानि मध्यमानीति मध्यमद्रव्यदानतः ॥
उपानत्प्रेंखदानानि छत्रयानासनानि च ।
दीपकाष्ठफलादीनि चामरं बहुवार्षिकम् ॥

---

१ 'हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनाम् ।' इति पूर्वार्धम् ।

बहुत्वादर्थजातानां संख्यादेशेषु नेष्यते ।
अधमान्यवशिष्टानि सर्वदानान्यनेकशः ॥ ' इति ।

आदेशेषु गणनासु संख्या इयत्ता परिच्छेद इति यावत् ।

नारदः–(१४।१५)

' वासः कौशेयवर्जं च गोवर्जं पशवस्तथा ।
हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि ॥ '

देवलः– ' रत्नक्षेत्रवेश्महेमकुप्याभरणान्युत्तमानि चतुष्पद्द्विपद्धान्यफलोदकवस्त्रकार्पासादीनि मध्यमानि ' ।

स्मृत्यर्थसारे–' सर्वत्रानुक्तौ दातृदेशकालद्रव्येष्वदुष्टेषु द्वादशनिष्कप्रमाणद्रव्यप्रतिग्रहे कार्यम् । एवं सर्वत्र द्रव्यानुसारात् प्रायश्चित्तवृद्धिह्रासौ ' इति ।

श्राद्धहेमाद्रौ पाद्मे–

' अतिदुष्टा प्रेतशय्यां[1] न ग्राह्या द्विजसत्तमैः ।
गृहीतायां तु तस्यां च पुनः संस्कारमर्हति ॥ '

एतानि च प्रायश्चित्तानि प्रतिगृहीतद्रव्यमुत्सृज्यैव कार्याणि ।

तथा च मनुः–(११।१९३)

' यद्गर्हितेनार्जयति कर्मणा ब्राह्मणो धनम् ।
तस्योत्सर्गेण शुध्यंति दानेन तपसैव वा ॥ '

इदं तु देशकालदात्राद्यनेकनिषेधसत्वे । एकतरनिषेधसत्वे तूत्सर्गप्रायश्चित्तयोर्विकल्पः ।

तथा च कल्पतरौ यमः–

' कर्मणा गर्हितेनैव यद्वित्तं समुपार्जितम् ।
तस्य त्यागेन शुद्ध्यंति धर्मस्यान्वेषणेन वा ॥ '

उत्सर्गप्रकारमाह स एव–

' अप्सु प्रास्येत्तु तद्द्रव्यमन्यायेन यदागतम् ।
प्रतिग्रहो वा दातव्यः शिष्टानां ब्रह्मचारिणाम् ॥ '

यत्तु चतुर्विंशन्मते–

' प्रतिग्रहेषु सर्वेषु षष्ठांशं परिकल्पयेत् ।
जपहोमादिकं कुर्यात्कृत्वा यज्ञप्रतिग्रहम् ॥ '

---

१ अत्र शय्याग्रहणं घोरप्रतिग्रहोपलक्षणार्थम् , अतिदोषवत्त्वात् ।–प्रा. सु.

यच्च पाद्मे–

'अथ चेत्प्रतिगृह्णाति ब्राह्मणो वृत्तिकर्शितः ।
दशांशमर्जितं दद्यादेवं तत्र न हीयते ॥ '

इति; तत् क्षुद्रद्रव्यप्रतिग्रहविषयम् । उपपातकसामान्यप्रायश्चित्तान्यपि जातिशक्त्याद्यपेक्षया योज्यानि । इति दुष्टप्रतिग्रहप्रायश्चित्तम् ।

अथ कौशीलव्ये ।

तत्र यमः–(बृह. १।२७–३१)

'नटनर्त्तकतक्षाणश्चर्मकारः सुवर्णकृत् ।
स्थाणुकाषण्डगणिका अभोज्यान्नाः प्रकीर्त्तिताः ॥

---

१ नर्तकः–'वैश्यायां रञ्जकाज्जातो नर्तको गायको भवेत् । ' (औ.स्मृ. १९) तक्षा—'करणायां तु विप्रेन्द्रा ! माहिष्याद्यो विजायते । स तक्षा रथकारश्च प्रोक्तः शिल्पी च वर्धकी ॥ ' (सू. सं. १।१२।३०) । सुवर्णकृत्–'सुवर्णकर्ता धातुवादादिना इति प्रायश्चित्तविवेकः । एतच्च कपटेन स्वर्णं कृत्वा विक्रेतुः, न तु स्वरूपस्वर्णसिद्धिकर्तुरिति तट्टीका–तत्त्वार्थकौमुदी । 'स्थाणुपाषण्ड ' इति पठित्वा स्थाणुः शिल्पी, पाषाणभेदको वा इति केचित् । 'स्थायु ' इति पाठमाश्रित्य 'स्थायुकोऽधिकृतो ग्रामे ' (अम.२।८।७) इति कोशात् ग्रामाधिकारीत्यन्ये । षण्ढः–'न जुहोत्युचिते काले नाश्नाति न ददाति च । पितृदेवार्चनाद्धीनः षण्ढः स परिगीयते ॥ ' (मार्क. पु. ३२।६२) इत्युक्तः, अन्यस्तु प्रसिद्ध एव । पाषण्डस्तु–'वैदिककुले समुत्पन्नो वेदवेदमार्गमुत्सृज्य जैनबौद्धादिमार्गे वर्तमानः– मा. । गान्धर्वो गायकः । चक्रोपजीवी शकटोपजीवी ।–मा. । कितवो–द्यूतकरः, कितं वातीति षणपूर्वजीवी वा–गौ. ध. सू. टी. । ध्वजी-मद्यविक्रयी । अत्र 'यजमानोपजीवी ' इति मांधवीये बृहस्पतिपाठः । शूद्रयाजकः–स्थपतीष्ट्यामृत्विग्वृत्त्यर्थं प्रत्यर्थं शूद्रार्थं पाकयज्ञादिकर्ता वा ।–स्मृ. .चं । कुलालः कुम्भकारवृत्त्युपजीवी । स्मृ. चं . 'कुलटश्चित्रकर्मा '–मा. पा. । 'दृषारामाश्रमाणां च भेदकः पुण्यविक्रयी । विक्रयी ब्रह्मणो यश्च–मा.पा. । कुण्डाशी भगभक्षः–म.भा.टी. नीलकण्ठः (१३।९०।७) पाकभाजनं कुण्डम् , तत्रैव क्वचिद्देशेऽश्नन्ति, तत् न त्यजन्ति, ते कुण्डाशिनः,—गा. ध. सू. टी. (२।६।१८) इति विशेषः । —'कूटाशः कुहको गुरुगुप्तिकः । ' मा.पा. । तत्र-ख्यापने स्वमाहात्म्यहानिभिया यो गुरुं न वक्ति, स गुरुगुप्तिकः । 'सौनिको वर्णिकश्चैव–' इ. मा. पा. । तत्र वर्णिकया जीवतीति वर्णिकः भूमिका ग्रहणकर्तेति केचित् । भिषक्–भैषज्यवृत्तिः, धर्मार्थं तु ये सर्पदष्टादींश्चिकित्सन्ति, ते भोज्यान्नाः ।— आप. ध. सू. टी. । पार्ष्णिकः–पार्ष्णिघ्नन्मत्ता स्त्री, तया जीवतीति पार्ष्णिकः । 'पार्ष्णिः पाश्चात्यभागे स्यात् पादमूलोन्मदस्त्रियोः ।' इति विश्वः । अन्यत् प्रसिद्धमेव, किञ्चिद्व्याख्यातपूर्वं च ।

गान्धर्वो लोहकारश्च सौचिकस्तन्तुवायकः ।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा ॥
ध्वजी मालोपजीवी च शूद्राध्यापकयाजकौ ।
कुलालश्चित्रकर्मा च वार्धुषिश्चर्मविक्रयी ॥
समर्घं पण्यमाहृत्य महर्घे यः प्रयच्छति ।
स वै वार्धुषिको नाम यश्च वृद्ध्या प्रयोजयेत् ॥
वृथाश्रमी वृथादाता आश्रमाणां च भेदकः ।
पुण्यस्य विक्रयी यश्च योनिसङ्करकस्तथा ॥
रङ्गोपजीवी कुण्डाशी वीरहा गुरुगुप्तिगः ।
भिषक् च गरदश्चैव रूपाजीवी च सूचकः ॥
सौनिकः पार्ष्णिकश्चैव निषादेन समाः स्मृताः ॥
कर्मस्वेतेषु यो मोहाद्ब्राह्मणो वर्त्तते सदा ।
प्रायश्चित्तेऽपि चरितेऽपरिहार्यो भवेत्स हि ॥
एते ब्राह्मणचाण्डालाः सर्वे ब्रह्महणः किल ।
तस्मादैवे च पैत्र्ये च वर्जितास्तत्त्वदर्शिभिः ॥
एतेषामेव सर्वेषां प्रत्यापत्तिं तु मार्गताम् ।
भैक्षान्नमुपयुञ्जानो द्विजश्चान्द्रायणं चरेत् ॥'

—स्थाणुका अभ्रातृमती इति मदनः । वृथाश्रमी वेदवाह्यजटाधारणादिना । आश्रमाणां तु भेदकः तद्विरुद्धकारित्वात् आश्रमस्वमहिंसक इति कल्पतरौ । योनिसङ्करिको व्यभिचारी । कुण्डाशी चतुःषष्टिपलान्नभक्षक इति शूलपाणिः । युक्तस्तु—

'पत्यौ जीवति कुण्डस्तु मृते भर्त्तरि गोलकः ।
यस्तयोरन्नमश्नाति कुण्डाशीत्युच्यते बुधैः ॥' (३।१७४)

इति मनूक्त एव । वीरहाऽग्नित्यागी । गुरुगुप्तिगो दण्डादिना गुरोः शास्तेति प्राच्याः । गुरुनिह्नवकारीति मदनः । रूपाजीवी वेशकरः, ताम्रादीनां स्वर्णादिसदृशरूपकारी वा । सूचकः पिशुनः । सूना घातस्थानं, तेन जीवत्यसौ सौनिकः । अत्रापि कौशीलव्यार्जितधनत्यागः ।

अथ विष्णूद्दिष्टेषु–

विष्णुः–(५४।१४) 'समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदाक्षारणे च मासं पयसा वर्त्तेत' इति।

–इदं च मतिपूर्वम्। आक्षारणं व्यभिचाराभिशापः।

शङ्खोऽपि— (१७।५५)

'क्षिप्त्वाऽम्भावशुचि द्रव्यं तदेवाम्भसि मानवः।
मासमेकं व्रतं कुर्यादुपाक्रम्य तथा गुरुम्॥'

अस्मिन्नेव विषये सुमन्तुः– 'देवर्षिब्राह्मणाचार्य्यपितृमातृनरेन्द्राणां प्रतिष्ठीवने आक्रोशने चोल्मुकेन जिह्वां दहेद्विरण्यं दद्यात्'।

अमतिपूर्वे गुरोर्निर्बन्धे तु वसिष्ठः— (२१।३१) 'गुरोरलीकनिर्बन्धे कृच्छ्रं द्वादशरात्रं चरित्वा सचैलस्नातो गुरुप्रसादात्पूतो भवति।'

याज्ञवल्क्यः– (३।२९१)

'गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः।
बध्वा वा वाससा क्षिप्रं स्नात्वा चोपवसेदिनम्॥'

बृहस्पतिना तूत्तरार्द्धम्

'ताडयित्वा तृणेनापि प्रसाद्यैव विशुद्ध्यति' (२।२७ इति पठितम्। इदमकामतः।

कामतस्तु शङ्खलिखितौ– 'आक्रोशानृतवादे एकरात्रं त्रिरात्रं चोपवासः' इति।

यत्तु वसिष्ठः— (१५।१५) 'आचार्यमातृपितृहन्तारस्तत्प्रसादादपापाः' इति; तदप्यज्ञानतः। हन्तारोऽल्पतरदुःखकराः।

यत्त्वापस्तम्बः–(१।२६।३–६) 'अनाक्रोश्यमाक्रोश्य त्रिरात्रमक्षारलवणाभोजनम्। शूद्रस्य क्षपणत्रमभोजनम्। स्त्रीणां च' तदपि ज्ञानतः। अत्रानुक्तविशेषप्रायश्चित्तेषु वार्द्धुष्यलवणक्रियादिषु, उक्तविशेषप्रायश्चित्तेषु च गोवधादिषूपपातकसामान्यप्रायश्चित्तानि जातिशक्त्याद्यपेक्षया योज्यानि। तत्रोत्तमं मानवं वृषभैकादशगोयुतं त्रैमासिकम्। ततो न्यूनं द्वैमासिकम्, ततो न्यूनं मासं यवागूपानमिति।–एतानि कामतः।

अकामतस्तु—

'उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा।
पयसा वाऽपि मासेन पराकेणाथवा पुनः॥'(३।२६५)

इति याज्ञवल्क्योक्तानि।

इत्युपपातकप्रायश्चित्तानि समाप्तानि।

अथ जातिभ्रंशकराण्याह मनुः—(११।६७)

'ब्राह्मणस्य रुजः कृत्वा घातिरज्ञेयमद्ययोः।
जैह्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥' इति।

विष्णुस्तु—(३८।४) पशुमैथुनमपि पपाठ।

तेषु प्रायश्चित्तमाह मनुः—(११।१२४)

'जातिभ्रंशकरं कर्म कृत्वाऽन्यतममिच्छया।
चरेत्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया॥'

एतच्चाभ्यास इति शूलपाणिः।

[१] सङ्करीकरणान्याह मनुः—(११।६८)

'खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा।
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च॥' इति।

विष्णुः—(३९।१) 'ग्राम्यारण्यपशूनां हिंसनं सङ्करीकरणम्' इति।

[२] अपात्रीकरणान्याह मनुः—(११।६९)

'निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्॥' इति।

उपपातकेषु शूद्रसेवानापदि, इदं तु सच्छूद्रस्यापदि सेवनमिति भेदः। एवमन्यत्र।

[३] मलिनीकरणान्याह मनुः—(११।७०)

'कृमिकीटवयोहत्या मद्यानुगतभोजनम्।
फलैधःकुसुमस्तेयमधैर्यं च मलावहम्॥' इति।

विष्णुः—(४१-१)

'पक्षिणां जलजानां च पातनं तु मलावहम्॥' इति।

---

१ यद्भोज्यमपि शाकादि एकत्र पिटकादौ मद्येन सहानीतं, तस्य भोजनम्। मेधातिथिस्तु—मद्यानुगतं मद्यसंस्पृष्टमाह। तन्न, तत्र प्रायश्चित्तगौरवात्।—कुल्लूकः।

अत्र जातिभ्रंशकरत्वादिसंज्ञा रूढा, न यौगिकी। अब्रेयाब्राणेऽपि जातिभ्रंशापत्तेः। क्षत्रियादीनां पात्रत्वाभावात्तान्प्रत्यपात्रीकरणसंज्ञाबाधाच्च।

त्रिषु प्रायश्चित्तमाह मनुः— (११।१२५)

'सङ्करापात्रकृत्यासु मासः शोधनमन्दवः।
मलिनीकरणीयेषु तप्तः स्याद्यावकव्रतम्॥' इति।

विष्णुः—(३९।२)

'सङ्करीकरणं कृत्वा मासमश्नीत यावकम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं तु कारयेत्॥'

—अत्राज्ञानात्सङ्करीकरणानुष्ठाने मासं यावकाशनम्। ज्ञानात्कृच्छ्रातिकृच्छ्रम्। अज्ञानाभ्यासे चान्द्रायणम्। ज्ञानाभ्यासे तु चान्द्रायणद्वयं कर्तव्यम्।

विष्णुः—(४०।२)

'अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति।
शीतकृच्छ्रेण वा भूयो महासान्तपनेन वा॥'

अज्ञानादपात्रीकरणे तप्तकृच्छ्रं शीतकृच्छ्रं वा, ज्ञानात्तु महासान्तपनम्। चान्द्रायणं पूर्ववत्।

विष्णुः—(४१।५)

'मलिनीकरणीये तु तप्तकृच्छ्रं विशोधनम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशोधनम्॥'

अज्ञानान्मलिनीकरणानुष्ठाने त्र्यहं यावकम्। ज्ञानात्तप्तकृच्छ्रः। अज्ञानतोऽभ्यासे कृच्छ्रातिकृच्छ्रम्। एतानि जातिभ्रंशकरादिषु सामान्यप्रायश्चित्तानि ब्राह्मणरुजःकरणादिमध्ये यत्र प्रातिस्विकं प्रायश्चित्तं नोक्तं तत्र, यत्र वोक्तं तत्रापि जातिशक्तिगुणाद्यपेक्षया योज्यानि। विशेषवधप्रायश्चित्तमुक्तं प्राक्।

इति जातिभ्रंशकरादिप्रायश्चित्तम्।

अथ प्रकीर्णकप्रायश्चित्तानि।

तत्स्वरूपमुक्तं विष्णुना—(४२।१) 'यदनुक्तं तत्प्रकीर्णकम्' इति। —महापातकादिमलिनीकरणान्तेषु यत्र परिगणितं,तत्प्रकीर्णकमित्यर्थः।

मनुः—(११।१९८)

'शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः।
संवत्सरं यवाहारस्तत्पापमपसेधति॥' इति।

वेदविप्लावनम्। चाण्डालादिश्रुतिपथे अनध्यायेषु[1] च पाठः।

वसिष्ठः—(२३।२९) 'पतितचण्डालशवश्रावणे त्रिरात्रं वाग्यता अनश्नंत आसीरन्सहस्रपरमं वा तदभ्यस्यन्तः पूता भवन्तीति विज्ञायते' इति।

—शवश्रावणं शवसन्निधावध्ययनम्। सहस्रपरममिति यावान् भागश्चाण्डालादिभिः श्रुतस्तावन्तं भागं सहस्रकृत्वो जपेदित्यर्थः।

यत्तु षट्त्रिंशन्मते—'चण्डालश्रोत्रावकाशे श्रुतिस्मृतिपाठ एकरात्रमभोजनम्' इति; तदबुद्धिपूर्वं सकृच्छ्रवणे।

नित्याकरणे सामान्यप्रायश्चित्तं मनुराह—(२१।२०३)

'वेदोदितानां नित्यानां कर्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्॥' इति।

नित्ययज्ञाद्यकरणे आचारमाधवीये प्रजापतिः—

'दर्शं च पूर्णमासं च लुप्त्वाऽथोभयमेव वा।
एकस्मिन् कृच्छ्रपादेन द्वयोर्धेन शोधनम्॥
हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमादितः।
प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि॥
सन्ध्योपासनहानौ तु नित्यस्नानं विलोप्य च।
होमं च नैत्यकं शुध्येद्गायत्र्यष्टसहस्रकृत्॥
समाप्ते सोमयज्ञानां हानौ चान्द्रायणं चरेत्।
अकृत्वाऽन्यतमं यज्ञं यज्ञानामधिकारतः॥
उपवासेन शुद्धयेत पाकसंस्थासु चैव हि।' इति।

कात्यायनः—(२।८।१९-२०)

'पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च।
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा॥
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्।' इति।

---

1 अनध्याप्यं वेदमध्याप्य। कुं.

विहितदक्षिणापर्याप्तद्रव्यालाभेऽपि नित्यं न लोपयेत् ।

तदाह बौधायनः—

'यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च ।
विपद्यपि न स स्वर्गं गच्छेत पतितो हि सः ॥
तस्मात्कन्दैः फलैर्मूलैर्मधुनाऽऽज्यरसेन वा ।
नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत् ॥'

पञ्चमहायज्ञाकरणे तु बृहस्पतिः— (२।१३–१४)

'अनिवर्त्य महायज्ञान्यो भुङ्क्ते प्रत्यहं गृही ।
अनातुरः सति धने कृच्छ्रार्द्धेन स शुद्ध्यति ॥'

एतच्च त्रिदिनातिपात इति केचित् ।

तथा—

'आहिताग्निरुपस्थानं न कुर्य्याद्यस्तु पर्वणि ।
ऋतौ न गच्छेद्भार्यां वा सोऽपि कृच्छ्रार्द्धमाचरेत् ॥'

विष्णुरपि— (५४। ८) 'पर्वानारोग्यवर्जं ऋतावगच्छन्पत्नीं त्रिरात्रमुपवसेत् ।' ऋतुरत्र स्नानादिनादारभ्य द्वादशदिनानि ।

यत्तु संवर्त्तः— (बौ. ४।१।२३)

'ऋतौ नोपैति यो भार्यां नियतां व्रतचारिणीम् ।
नियमातिक्रमात्तस्य प्राणायामशतं स्मृतम् ॥' इति ।

तदकामतः । एतच्च समानदेशविषयम् ।

'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पितृभिः सह मज्जति ॥' (परा. ३।१५)

इति मिताक्षरावचनात् । एतदेव प्रायश्चित्तं स्त्रिया अपि ऋतौ भर्तुरनुपसर्पणे भवति । तस्या अपि नारदीये दोषदर्शनात् ।

'आहूता या तु वै भर्त्रा नोपयाति त्वरान्विता ।
सा ध्वाङ्क्षी जायतेऽपुत्री दशवर्षाणि पञ्च च ॥' इति ।

तासु तु स्त्रीत्वादर्द्धम् ।

हारीतः—

'वहन्कमण्डलुं रिक्तमस्नातोऽभ्यंश्च भोजनम् ।
अहोरात्रेण शुद्ध्यः स्यादिनजप्येन चैव हि ॥'

अत्र चकारेणोपवासदिनजपयोः समुच्चयः ।

ऋष्यशृङ्गः—

'इन्द्रचापं पलाशाग्निं यद्यन्यस्य प्रदर्शयेत् ।
प्रायश्चित्तमहोरात्रं धनुर्दण्डश्च दक्षिणा ॥' इति ।

धनुषो दण्डस्य च क्रमेण दानं ज्ञातव्यम् ।

अङ्गिराः— (अत्रि. ५।२९)

'अनापदि चरेद्यस्तु सिद्धां भिक्षां गृहे वसन् ।
दशरात्रं पिबेद्ब्रह्मापत्काले त्वहं द्विजः ॥' इति ।

—'ब्रह्म वज्रकृच्छ्रसम्बन्धि द्रव्यम् ।

एकस्यां पङ्क्तौ विषमदाने तु यमः—

'न पङ्क्त्यां विषमं दद्यान्न याचेत न दापयेत् ।
याचको दापको दाता न वै स्वर्गस्य गामिनः ॥
प्राजापत्येन कृच्छ्रेण मुच्यन्ते कर्मणस्ततः ॥'

स एव—

'नदीसङ्क्रमहन्तुश्च कन्याविक्रयकस्य च ।
समे विषमकर्तुश्च निष्कृतिर्नोपपद्यते ॥
त्रयाणामपि चैतेषां प्रत्यापत्तिं तु मार्गताम् ।
भैक्षलब्धेन चान्नेन द्विजश्चान्द्रायणं चरेत् ॥'

—सङ्क्रम उदकावतरणमार्गः । समे विषमकर्ता पूजादौ ।

शङ्खः— (१७।५७)

'एकपङ्क्त्युपविष्टानां विषमं यः प्रयच्छति ।
यश्च याचत्यसौ पक्षं कुर्याद्ब्रह्महणि व्रतम् ॥'

---

१ पलाशाग्निं पलाशवने जातमग्निम् ।—गोविन्दानन्दः । पलं मांसमश्नातीति पलाशः क्रव्यादः—श्मशानाग्निरिति तु युक्तम् । इदं शक्रधनुरिति व्यपदिश्य कामतो दर्शयित्वा रूप्यमाषकत्रयं देयम् । प्रा. वि.

२ 'गोमूत्रेण तु सम्मिश्रं यावकं घृतपाचितम् । एतद्ब्रह्मेति प्रोक्तं भगवान-त्रिरब्रवीत् ॥' (अत्रि. ५।३०)

वसिष्ठः– (१९।२६–२७॥२०।७) ' दण्ड्योत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रं पुरोहितः । कृच्छ्रमदण्ड्यदण्डने पुरोहितस्त्रिरात्रं राजा । '

' कुनखी श्यावदन्तश्च कृच्छ्रं द्वादशरात्रं चरित्वोद्धरेयाताम् ' इति ।

–उद्धरेयातां कुत्सितानां दन्तानां नखानां चोद्धरणं कुर्यातामित्यर्थः ।

ब्राह्मणस्य क्षत्रियाद्यभिवादने हारीतः– (२१।७–९) ' क्षत्रियाद्यभिवादनेऽहोरात्रमुपवसेत् । द्वे वैश्यस्य । शूद्रस्याभिवादने त्रिरात्रमुपवास' इति। समित्पुष्पहस्ताभिवादनेऽप्येवमिति केचित् । तथा–" शय्यारूढपादुकोपानदारोपितपादोच्छिष्टान्धकारस्थश्राद्धकृज्जपदेवपूजाभिरताभिवादिने त्रिरात्रमुपवासः स्यादन्यत्र निमन्त्रितेनान्यत्र भोजनेऽपि त्रिरात्रम्' इति ।

देवादीनामाभिमुख्येन ष्ठीवनादौ सुमन्तुः– ' देवर्षिगोब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रतिष्ठीवन आक्रोशने जिह्वां दहेद्विरण्यं दद्यात्'इति। –प्रतिष्ठीवनमाभिमुख्येन ष्ठीवनम् ।

अथ मण्डपोद्यानदेवतागारादिभेदने ।

काश्यपः– (१।१५–२१) ' वापीकूपारामसेतुलतातडागवप्रदेवतायतनभेदने प्रायश्चित्तम् । ब्राह्मणेभ्यो निवेद्य चतस्र आज्याहुतीर्जुहुयात् ' इदं विष्णुः' इति प्रथमां ' मा नस्तोक ' इति द्वितीयां, ' विष्णोः कर्माणि' इति तृतीयां 'पादोस्यांत्याम्' इति चतुर्थीम् । यां देवतामुच्छेदयति तस्यै देवतायै ब्राह्मणान् भोजयेत् ' इति । एतच्चाल्पोपघाते । महतोपघातेऽभ्यासे प्राजापत्यादि कल्पनीयम् । देवता चात्र मृन्मयी पूजोज्झिता च ग्राह्या, प्रायश्चित्तस्याल्पत्वात् । अन्यत्र तु दंडगौरवदर्शनेन प्रायश्चित्तगौरवं कल्प्यम् । 'दंडवत्प्रायश्चित्तानि भवंति' इति वचनात् ।

तथाऽत्र दंडगौरवमाह कात्यायनः–

' हरेच्छिंद्याद्धेद्वाऽपि देवानां प्रतिमां यदि ।
तद्दृढं चैव यो भिंद्यात्प्राप्नुयात्पूर्वसाहसम् ॥ '

विष्णुरपि– (५।१६९)– ' अभक्ष्यस्याविक्रेयस्य विक्रयी प्रतिमाभेदकश्च उत्तमसाहसं दंडनीयः ।

---

१ ' युवा सुवासा ' इति तृतीया ' दंष्ट्राभ्यां ' इति चतुर्थी पन्यसुपाख्येन तस्यै च देवतायै पूर्णाहुतिं जुहुयात् ' इति मू. पा. ।

अत्र भग्नोद्धारादिकमप्याहतुः शंखलिखितौ–' प्रतिमारामकूपसंक्रमणध्वजसेतुनिपातभंगेषु तत्समुत्थापनं प्रतिसंस्कारेऽष्टशतं च ' इति ।

मनुः— (९।२८५)

' संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः ।
प्रतिकुर्य्याच्च तत्सर्वं पञ्च दद्याच्छतानि च ॥' इति ।

अत्र च प्रतिमातद्भेदतारतम्येन दंडप्रायश्चित्तयोर्व्यवस्थोन्नेया ।

पत्न्या दारिद्र्यादिना भर्तुरतिक्रमे आपस्तंबः–(ध.सू.१।२८।२०) ' भर्तुरतिक्रमे कृच्छ्रं ' इति ।

–अतिक्रमो दारिद्र्यक्रोधमात्सर्य्यादिनाऽवमाननम् ।

पर्वणि मैथुने विष्णुपुराणे निन्दाश्रवणम्–(३।११।१४–१५)

' चतुर्दश्यष्टमी चैव अमावास्याऽथ पूर्णिमा ।
पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च ॥
स्त्रीतैलमांससंभोगी पर्वस्वेतेषु यो नरः ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥'

मिताक्षरायां स्मृत्यंतरे—

' अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् ।
कृत्वा सचैलं स्नात्वा च वारुणीमिश्र मार्जयेत् ॥' इति ।

श्राद्धदिनमैथुने च ' स्नातकव्रतलोपे च ' (म. ११।२०३) इत्यनेनोपवास एव ।

वमने शातातपः—

' विच्छर्दने द्विजातीनां भिन्नभांडे च भोजने
पंचगव्येन शुद्धिः स्यादिति शातातपोऽब्रवीत् ॥ '

माषादिवमने तु विशेषमाह यमः—

' मयूरमाषमांसानि भुक्त्वा वा वमति द्विजः ।
त्रिरात्रमुपवासोऽस्य प्रायश्चित्तं विधीयते ॥
प्राणायामैस्त्रिभिः स्नात्वा घृतं प्राश्य विशुध्यति । '

तथा यज्ञोपवीतादिनाशे " मेखलादंडाजिनयज्ञोपवीतावपातेषु च मनोव्रततवतीभिश्चतस्र आज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतीयात् । असकृदैक्षभोजनमभ्युदितेऽभिनिर्मुक्ते वांते दिवास्वप्ने नग्नस्त्रीदर्शने नग्नस्वापे

श्मशानमाक्रम्य हयादींश्चारुह्य पूज्यातिक्रमे चैताभिरेव जुहुयात्। अग्न्य-धिमधने स्थावरसरीसृपादीनां वधे 'यद्देवा देवहेडनं' इति कूष्माण्डीभि-राज्यं जुहुयात्। मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्' इति। 'मनो ज्योतिर्जुषताम्' इति मनोलिंगाभिः। 'त्वमग्ने व्रतपा असि' इति व्रतलिंगाभिश्च। यथार्थं उपनयनोक्तेन विधिना। समंत्रकं प्रतीयाद्गृह्णीयात्।

अभ्युदितादिस्वरूपमाह यमः—

'सूर्योदये तु यः शेते स सूर्योदित उच्यते।
अस्तंगते तु यः शेते सूर्ये निर्मुक्त एव सः॥' इति।

अकामतोऽभ्युदिते प्रायश्चित्तमाह यमः—

'अजीर्णेऽभ्युदिते वांते श्मश्रुकर्मणि भोजने।
दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते॥'

अत्रैव कामतो गौतमः (३।५।२१) 'सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुंजानोऽभ्यस्तमितश्च रात्रिं सावित्रीं जपेत्'। अभ्यासे त्वावृत्तिरूह्या।

गर्भाधानादिसंस्कारातिपत्तौ तु आश्वलायनः—

'आरभ्याधानमा चौलात्कालेऽतीते तु कर्मणाम्।
व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमम्॥
एतेष्वेकैकलोपेऽपि पादकृच्छ्रं समाचरेत्।
चूडाया अर्द्धकृच्छ्रः स्यादापदि त्वेवमीरितम्॥
अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत्॥'

कात्यायनोऽपि—

'लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते।
प्रायश्चित्ते कृते पश्चाल्लुप्तं कर्म समाचरेत्॥

---

१ लुप्ताश्वलायनः— (९।१९।२०) 'यदुक्तं च यथाकाले कुर्यात्संस्कार-कर्म च। असामर्थ्यात्कृतं नो चेद्विधिस्तस्य कथं भवेत्?॥ प्रायश्चित्तं विधा-यादावेकैकस्य च कर्मणः। कृत्वादौ कृच्छ्रमेकैकं लुप्तकर्माणि कारयेत्॥ इत्याह।

'त्वं नः' 'स त्वं न' इत्याभ्यां 'इमं मे' त्वेतया ऋचा।
'ये ते शत' 'मयाश्वा'भ्या'मुदुत्तम'मृचाहुतीः॥
हुत्वा पृथक् पृथक् पादमर्द्धं चौले समाचरेत्।
स्त्रीणामप्येवमेव स्याज्जाताद्यामंत्रिका क्रिया॥' इति।

गर्भाधानाकरण एवाश्वलायनः—

'गर्भाधानस्याकरणे तस्यां जातस्तु दुष्यति।
अकृत्वा गां ततो दत्त्वा कुर्यात्पुंसवनं पतिः॥' इति।

क्षुतादौ वृद्धपराशरः—(८।२९६,९८)

'विप्रः क्षुत्कृत्य निष्ठीव्य कृत्वा चानृतभाषणम्।
वचनं पतितैः कृत्वा दक्षिणं श्रवणं स्पृशेत्॥
प्रेक्षणं शशिनोऽर्कस्य ब्रह्मेशविष्णुसंस्मृतिः।'

एतच्च जलाभावे कर्मणि व्याप्तौ वा।

अत एव वृद्धशातातपः—

'क्षुत्वा निष्ठीव्य वासस्तु परिधायाचमेद्बुधः।
कुर्यादाचमनं स्पर्शं गोपृष्ठस्य च दर्शनम्॥
यथाविभवतो ह्येतत्पूर्वाभावे ततः परम्।
अविद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यते॥' इति।

संवत्सरं क्रियातिपाते विष्णुपुराणम्—(३।१८।४०—४१)

'संवत्सरं क्रियाहानिर्यस्य पुंसः प्रजायते।
तस्यावलोकनात्सूर्यो निरीक्ष्यः साधुभिः सदा॥
स्पृष्ट्वा स्नानं सचैलं तु शुद्धिहेतुर्महामते।
पुंसो भवति तस्योक्त्या न शुद्धिः पापकर्मणः॥' इति।

---

१ 'त्वं नो अग्ने' (शु. य. २१।३) 'स त्वं नो' (शु. य. २१।४) 'इमं मे' (शु. य. २१।१) 'ये ते शतं' (कात्या. श्रौ. सू. २१।१।११ आप. श्रौ. सू. १।१३।१) 'अयाश्चाग्नेः' (मैत्रा. १।४।३ काठकसं. ५।४ आश्व. श्रौ. सू. १।११।१३ आप. श्रौ. सू. ३।११।२ हि. के. गृ. सू. १।२६।१३ 'उदुत्तमं' (ऋ. मं. १।२४।१५ शु. य. १२।१२ तै. सं. १।६।११।१३)

अत्र च प्रायश्चित्तविशेषाश्रवणादेकाहातिक्रमे चैकाहमभोजनस्योक्त्वात्तदनुसारेण च षष्ट्यधिकशतत्रयदिनापचारे तावदुपवासकरणाशक्तेस्तत्प्रत्याम्नायत्वेन षडुपवासैरेकैकप्राजापत्यकल्पनया त्रिचत्वारिंशत्प्राजापत्या उपवासद्वयं च योज्यम्।

निमंत्रणं गृहीत्वा त्यागे तु यमः—

'केतनं कारयित्वा तु योऽतिपातयति द्विजः।
ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते॥
एतस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतव्रतः।
यतिचांद्रायणं चीर्त्वा ततः पापात्प्रमुच्यते॥' इति।

निमंत्रितस्यानाहानेऽप्येतदेव। एतच्च कामाभ्यासे।

अन्यत्र भोजने तु हारीतः—(२१।१२)

'अन्यत्र निमंत्रितेनान्यत्र भोजनेऽपि त्रिरात्रम्' इति।

अनृतवचनादौ तु शंखलिखितौ—'आक्रोशनानृतवादे एकरात्रं त्रिरात्रं चोपवास' इति।

कामतोऽभ्यासे तु—'असत्यभाषणं शूद्रसेवनमपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति' (४०।२) इति विष्णूक्तं ज्ञेयम्। वधफलकेऽनृते तु व्यसनप्रायश्चित्तप्रसङ्गेनोपपातकेषु प्रागुक्तम्।

निषिद्धदेशगमने देवलः—(१६)

'सिन्धुसौराष्ट्रसौवीरांस्तथा प्रत्यन्तवासिनः।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति'॥

कर्मनाशाजलस्पर्शादौ त्व एव—

'कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात्।
गण्डकीवाहुतरणात्पुनः संस्कारमर्हति॥'

तीर्थयात्रां विना चैतत्,

'अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रमगधानपि।
तीर्थयात्रां विना गच्छेत्पुनःसंस्कारमर्हति॥'

इति स्मरणात्। तदेशवासिनां तु प्रायश्चित्ततारतम्यं कल्पनीयम्।

व्रणमध्ये कृमिपाते गरुडपुराणे—

'जायन्ते यस्य शिरसि कृमयो विनतात्मज !।
कृच्छ्रं तदाचरेत्प्राज्ञः शुद्धये कश्यपात्मज !॥' इति।

यत्तु च्यवनः—'कृमिदर्शने सान्तपनं वृषभो दक्षिणा' इति; तद्व्रण-पदनेकव्रणेषु कृम्युत्पत्तौ ज्ञेयम्। अत्र क्षत्रियादीनां पादपादं न्यूनम्।

खरयानाद्यारोहणे याज्ञवल्क्यः—(३।२९०)

'प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम्॥'

—खरयुक्तयानं शकटादि। एतच्च—

'उष्ट्रयानं समारुह्य खरयानं च कामतः।
सवासा जलमाप्लुत्य प्राणायामेन शुध्यति॥'(म.११।२०१)

इति मनुबृहस्पतिस्मरणात्कामकारविषयम्। अकामतस्तु स्नान-मात्रम्।

अत्रैव विष्णुः—(५४।२३)'उष्ट्रेण खरेण वा गत्वा नग्नः स्नात्वा च भुक्त्वा च प्राणायामं कुर्यात्' इति।

साक्षात्खरोष्ट्राद्यारोहणे तु यमः—

'खरयानमुष्ट्रयानं वा योऽधिरोहेद्द्विजोत्तमः।
अपो वा प्रविशेन्नग्नस्त्रिरात्रं क्षपणं स्मृतम्॥' इति।

दिवामैथुनादौ तु प्रायश्चित्तमाह शङ्खः—(१७।५४)

'दिवा तु मैथुनं कृत्वा नग्नः स्नात्वा तथाऽम्भसि।
नग्नां परस्त्रियं दृष्ट्वा दिनमेकमभोजनम्॥' इति।

अत्र नग्नस्नानादावेकरात्रित्रिरात्रयोरभ्यासाद्यपेक्षया व्यवस्था द्रष्टव्या।

---

१ शिरोव्यतिरिक्ताङ्गे तु वसिष्ठः—'व्रणद्वारे कृमिर्यस्य सम्भवेत्तु कदाचन। प्राजापत्येन शुद्ध्येद्धिरण्यं गौर्वासो दक्षिणा॥'(१८।१४) इति।

२ 'स्नात्वा तु विप्रो दिग्वासाः' इति पाठान्तरम्।

३ अत्रापवादो भोजनकुतूहले-(प.३) व्यासः—'अनृतावृतुकाले वा दिवा रात्रौ तथापि वा प्रोषितस्तु स्त्रियं गच्छेत्प्रायश्चित्ती भवेन्न च॥' इति।

अनुदकमूत्रपुरीषकरणे यममनू—

'आपद्गतो विना तोयं शारीरं यो निषेवते ।
एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेत् ॥' इति ।

अनापदि द्विगुणम् । एतच्च कामतः ।

अत्रैव सुमन्तुः—'अनुदकमूत्रपुरीषकरणे नखकेशरुधिरप्राशने सद्यःस्नानं घृतकुशहिरण्योदकपानं च' इति । अत्र घृतादिपानस्य प्रायश्चित्तार्थत्वाद्भोजननिवृत्तिः ।

यत्त्वङ्गिराः—

'कृते मूत्रपुरीषे वा यदा नैवोदकं भवेत् ।
स्नात्वा लब्ध्वोदकं पश्चात्सचैलस्तु विशुध्यति ॥' इति,

यच्च शातातपः—(१३) 'अनुदकमूत्रपुरीषकरणे सचैलं स्नानं महाव्याहृतिहोमश्च' इति; तदकामतः ।

अत्रैव मनुः—(११।२०२)

'विनाऽद्भिरप्सु चाप्यन्तः शारीरं सन्निषेव्य तु ।
सचैलो बहिराप्लुत्य गामालभ्य विशुद्धयति ॥' इति ।

यत्तु स एव—

'अटव्यामटमानस्य ब्राह्मणस्य विशेषतः ।
प्रणष्टसलिले देशे कथं शुद्धिर्विधीयते ॥
अपां दृष्ट्वैव विप्रस्तु कुर्य्याच्चैव सचैलकम् ।
गायत्र्यष्टशतं जप्यं स्नानमेतत्समाचरेत् ॥
देशं कालं समासाद्य अवस्थामात्मनस्तथा ।
धर्मशौचेऽवतिष्ठेत न कुर्याद्वेगधारणम् ॥
त्रिरात्रं चाप्युपवसेद्यहं त्रिषवणी भवेत् ।
तथैवाम्भसि मग्नस्तु त्रिःपठेदघमर्षणम् ॥' इति ।

—धर्मशौचं शास्त्रीयं शौचम् । वेगधारणं शास्त्रीयशौचप्रतीक्षया मूत्रपुरीषोत्सर्गविलम्बं न कुर्यादित्यर्थः । त्रिरात्रोपवासस्त्वनापदि कामतः ।

अप्सु कामतो मूत्रपुरीषोत्सर्गयोरभ्यासे शङ्खलिखितौ—'रेतोमूत्रपुरीषाण्युदके कृत्वा त्रिरात्रोपोषित 'इदमापः प्रवहत' इति जपेत्' इति ।

यत्तु सुमन्तुः—'अप्स्वग्नौ वा मेहतस्तप्तकृच्छ्रम्' इति; तत्कामतोऽत्यन्ताभ्यासे ।

स्वपुरीषदर्शनादौ यमपराशरौ– (य. ५।१३)

'प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् ।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा ॥' इति ।

यज्ञोपवीतं विना वान्तिकमूत्रोत्सर्गादिकरणे तु मदनरत्ने स्मृत्यन्तरम्

'विना यज्ञोपवीतेन यद्युच्छिष्टो भवेद्द्विजः ।
प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु वा ॥' इति ।

ऊर्ध्वोच्छिष्टे उपवासः । अधरोच्छिष्टे गायत्र्यष्टशतजप इति व्यवस्था ।

यत्तु तत्रैव—

'पिबतो मेहतश्चैव भुञ्जतोऽनुपवीतिनः ।
प्राणायामत्रिकं षट्कं नक्तं च त्रितयं क्रमात् ॥'

इति; तदकामतः ।

यत्तु वृद्धपराशरः— (८।२९४-९५)

'यज्ञोपवीतेन विना भोजनं कुरुते द्विजः ।
अथ मूत्रपुरीषे वा रेतःसेचनमेव वा ॥
त्रिरात्रोपोषितो विप्रः पादकृच्छ्रं तु भूमिपः ।
अहोरात्रोषितो वैश्यः शुद्धिरेषा पुरातनी ॥'

इति; तत्कामतोऽभ्यासे ।

भुक्तवतोऽनाचान्तस्योत्थानेऽपि तत्रैव– (म. भा. १४।१०६।२०)

'यदोत्तिष्ठत्यनाचान्तो भुक्तवानशनात्ततः ।
सद्यः स्नानं प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत् ॥' इति ।

---

१ विना यज्ञोपवीतेन द्विजातिर्यद्युपस्पृशेत् । प्राजापत्यं प्रकुर्वीत निष्कृतिर्नान्यथा भवेत् ॥ विना यज्ञोपवीतेन भुङ्क्ते तु ब्राह्मणो यदि । स्नानं कृत्वा जपं कुर्वन्नुपवासेन शुद्ध्यति ॥' (ल. हा. २१,२३) मरीचिः— 'ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्रं कुरुतेऽथ वा । गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति ॥' मण्डनः— 'यज्ञोपवीतस्याभावे वस्त्रोपन्यानमाचरेत् । तदभावे तु सूत्रेण त्रिवृता संव्ययीत सः ॥' यज्ञोपवीतनाशे हारीतः— 'मनोव्रतपतिभिश्चतस्र आज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतिपादयेत्' इति । मनोलिङ्गकाभिः, 'त्वमग्ने व्रतपा असि' इत्यादिव्रतलिङ्गकाभिश्चेत्यर्थः ।—प्रा. मु.

पलाशशयनाद्यारोहणे शङ्खः— (१७।५१)

'अध्यास्य शयनं यानमासनं पादुके तथा ।
पलाशस्य द्विजश्रेष्ठस्त्रिरात्रं तु व्रती भवेत् ॥' इति ।

निषिद्धकाष्ठेन दन्तधावने वृद्धपराशरः— (८।३०७)

'पालाशशिंशिपाकाष्ठदन्तधावनकृन्नरः ।
दिवाकीर्तिसमस्तावद्यावद्गां नैव पश्यति ॥' इति ।

एतच्च निषिद्धकाष्ठान्तराणामप्युपलक्षणम् ।

अन्तरा गमनेऽपि तत्रैव—

'द्वौ विप्रौ ब्राह्मणाग्नी च दम्पती द्वौ द्विजोत्तमौ ।
अन्तरेण यदा गच्छेत्कृच्छ्रं सान्तपनं चरेत् ॥
होमकाले तथा दोहे स्वाध्याये दारसंग्रहे ।
अन्तरेण यदा गच्छेद्विजश्चान्द्रायणं चरेत् ॥'

यत्त्वङ्गिराः— (६१)

दम्पत्योर्विप्रयोरग्न्योर्विप्राग्न्योर्गोर्द्विजातिषु ।
अन्तरा यदि गच्छेत्तु द्विजश्चान्द्रायणं चरेत् ॥' इति ।

तत्कामतः । एतदेव च—

'विप्राग्न्योर्विप्रपिण्डानां भवोक्ष्णोर्विष्णुतार्क्ष्ययोः ।
भानुव्योमादिकानां च न कुर्यादन्तरागतिम् ॥'

इति पराशरोक्तेऽपि द्रष्टव्यम् ।

वृद्धपराशरः— (शं. स्मृ. १७।९०)

'पादप्रतापनं कृत्वा कृत्वा वह्निं तथा ह्यधः ।
कुशैः प्रमृज्य पादौ तु दिनमेकं व्रतं चरेत् ॥'

स्नातकव्रताधिकारे क्रतुः— 'एतेषामाचाराणामेकैकस्य व्यभिचारे एकरात्रोपोषणम्' इति ।

ब्रह्मचारिधर्मलोपे बौधायनः— 'अत्रैव शौचाचमनसन्ध्यावन्दन-दर्भभिक्षाग्निकार्यराहित्यशूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखला-दण्डाजिनत्यागदिवास्वापछत्रधारणपादुकाध्यारोहणमालाधारणोद्वर्त्तना-नुलेपनाञ्जन-जलक्रीडा-द्यूतनृत्यगीतवाद्याद्यभिरतिपाखण्डादिसम्भाषण-

पर्य्युषितभोजनादि-ब्रह्मचारिव्रतलोपज-सकलदोषनिर्हारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेत्। महाव्याहृतिहोमं च कुर्यात्। प्रथमं व्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा। ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा। सुवरादित्याय च दिवे च महते च स्वाहा। ॐभुर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा। ॐपाहि नो अग्न एनसे स्वाहा। ॐपाहि नो विश्ववेदसे स्वाहा। ॐ यज्ञं पाहि विभावसो स्वाहा। ॐ सर्वं पाहि शतक्रतो स्वाहा। ॐ पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहसः स्वाहा। सह रय्यानिवर्त्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परिस्वाहा। (तै. सं. १।५।३) पुनर्व्याहृतिभिः हुनेत्' इति।

—हुनेज्जुहुयात्। एतदल्पधर्मलोपे।

बाहुल्ये प्रायश्चित्तविशेषमाह ऋग्विधाने शौनकः— (ल. ऋ. २१९)

'तंवोधिया' (ऋ.सं.४।७।१०)जपेन्मन्त्रलक्षंचैत्येशिवालये।
ब्रह्मचारिणो धर्मस्य न्यूनं चेत्पूर्णमेव तत्॥' इति।

इति ब्रह्मचारिधर्मलोपप्रायश्चित्तम्।

क्षत्रियस्य रणे पृष्ठदर्शने शङ्खः— (१७।५३)

'क्षत्रियस्तु रणे पृष्ठं दत्वा प्राणपरायणः।
संवत्सरं व्रतं कुर्याच्छित्वा वृक्षं फलप्रदम्॥'

एतच्च कामतोऽभ्यासे। अन्यत्र तु त्वर्द्धादि योज्यम्।

गृहीतव्रतभङ्गे वायुपुराणे—

'लोभान्मोहात्प्रमादाद्वा व्रतभङ्गो यदा भवेत्।
उपवासत्रयं कुर्यात्कुर्याद्वा केशमुण्डनम्॥
प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्।'

—वा शब्दः समुच्चये।

मिथ्याशपथे यमः— (६।१६)

'विप्रस्य वधसंयुक्तं कृत्वा तु शपथं मृषा।
ब्रह्महा यावकान्नेन व्रतं चान्द्रायणं चरेत्॥'

एतच्च शपथान्तरस्याप्युपलक्षकम्

'सुकृतं ये प्रयच्छन्ति यावज्जीवकृतं नराः ।
ते पिष्यन्ते शिलापेष्यैर्यथैते पापकारिणः ॥' (१४।७२)

इति मार्कण्डेयपुराणवाक्यात् ।

'यत्रोक्तं यत्र वा नोक्तम्' इत्यौशनसवाक्यात्तत्र प्राजापत्यः कल्पनीयः।

ब्राह्मणस्य क्षत्रियादिवृत्त्या धनार्जने प्रचेताः— 'ब्राह्मणस्यापत्काले पितृमातृबहुभृत्यस्यानन्तरं क्षत्रोपनिवेशः । तत्र संवत्सरमर्थप्राप्तौ चान्द्रायणं चरेत्' इति ।

वैश्यवृत्तिजीवने तु किञ्चिदधिकम्। तत्र वर्षाभ्यन्तरे मासद्विमासादौ चान्द्रायणभागहारः कल्पनीयः। संवत्सरादूर्ध्वं द्वैगुण्यादि च कल्पनीयम्।

शूद्रवृत्त्याऽर्जने मनुः—

'न कथञ्चन कुर्वीत ब्राह्मणः कर्म वार्षलम् ।
वृषलः कर्म वा ह्यस्य पतनीये हि ते तयोः ॥'

—वार्षलं कर्म सेवा ।

एवमुपक्रम्य पुनरुपनयनसहितकृच्छ्राद्यनुवृत्तौ स एव— (११।१९२)

'प्रायश्चित्तं न कुर्वन्ति विकर्मस्थास्तु ये द्विजाः ।
ब्राह्मणा च परित्यक्तास्तेषामप्येतमादिशेत् ॥'

एवं शूद्रस्यापि द्विजकर्मकरणेऽप्येतदेव । तस्यापि तद्विकर्मत्वात्। अर्जितधनत्यागपूर्वकं चैतत्। 'यद्गर्हितेनार्जयति' इति मनूक्तेः(११।१९३)

स्त्रीधनोपजीवने तु—

'चांद्रायणेन चैकेन सर्वपापक्षयो भवेत्'

इत्यापस्तंबोक्तं चान्द्रायणं स्त्रियै तद्धनं दत्त्वा कार्यम् ।

भार्याया मुखमैथुने तूशनाः (२।३१–३२) 'यस्तु पुनर्ब्राह्मणो धर्मपत्नीमुखे मैथुनं सेवेत स दुष्यति इति वैवस्वतः । प्राजापत्येन शुध्यति इति हारीतः' इति ।

गोयुक्तयानस्थस्य मैथुने यमः— (५।३–४)

'यदि गोभिः समायुक्तं यानमारुह्य वै द्विजः ।
मैथुनं सेवते तत्र मनुः स्वायम्भुवोऽब्रवीत् ॥

त्रिरात्रं क्षपणं कृत्वा सचैलं स्नानमाचरेत्।
गोभ्यो यवाढकं दद्याद्धृतं प्राश्य विशुध्यति ॥' इति।

यत्तु स्मरणम्—

'मैथुनं तु समासाद्य पुंसि योषिति वा द्विजः।
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥'

तदकामतः सकृत्करणे ज्ञेयम्।

क्रोधात्स्वभार्यां त्वं मे मात्रा सदृशी अगम्येत्युक्त्वा पुनरुपभोगे प्रायश्चित्तमाह पराशरः— (१२।५७–५९)

'यस्तु क्रुद्धः पुमान् ब्रूयाज्जायायास्तु अगम्यताम्।
पुनश्चिच्छति भार्यां च विप्रमध्ये तु वाचयेत् ॥
आर्तः क्रुद्धस्तमोऽन्धो वा क्षुत्पिपासाभयार्दितः।
दानं पुण्यमकृत्वा वा प्रायश्चित्तं दिनत्रयम ॥
उपस्पृशेत्त्रिषवणं महानद्युपसंगमम्।
चीर्णांते चैव गां दद्याद्ब्राह्मणान् भोजयेदश ॥' इति।

—वाचयेत्स्वस्य प्रायश्चित्तोपदेशं कारयेत्। पुण्यं यागादि। संकल्पितं दानाद्यकृत्वेत्यर्थः।

बस्तिकर्मणि यमः—

'बस्तिकर्मणि रूढैश्च प्रच्छर्दनविरेचनैः।
शिशुकृच्छ्रेण शुद्ध्येत्तु तस्मात्पापान्न संशयः ॥'

प्रच्छर्दनविरेचनयोरभ्यास एव शिशुकृच्छ्रः। अन्यत्र तु स्नानमात्रम्।

तथा च स एव—

'अजीर्णेऽभ्युदिते वांते श्मश्रुकर्मणि मैथुने।
दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते ॥' इति।

देवागारशिलादिना स्वगृहकरणं निंदति यमः—

'इष्टकाकाष्ठाश्मलौहान् देवालयसमन्वितान्।
गृहीत्वाऽऽत्मगृहे ये तु लोभाद्वै योजयंति च ॥
एकाकिनस्तथोद्विग्नाः क्षुत्तृषापरिपीडिताः।
बंधने ते तु तिष्ठंति यावत्पापस्य संक्षयः ॥'

अत्र प्राजापत्यचान्द्रायणादि कल्प्यम्।

वानप्रस्थयत्योर्व्रतभङ्गे 'वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्द्धयेत्। भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जं स्वशास्त्रसंस्कारश्च' इति।

—दीक्षाभेदो यमनियमातिक्रमः। महाकक्षमौषधवनप्रदेशं उदकसेवनादिना वर्द्धयेत्। सोमशब्देनौषधिसामान्यं लक्ष्यते। तद्वृद्धिः परं भिक्षोर्निवर्त्तते, परं तु सर्वं समभित्यर्थः। स्वशास्त्रसंस्कारः प्राणायामाभ्यासः।

हारीतः— 'अनृतपिशुनवचने भिक्षूणां तप्तकृच्छ्रः क्रोधाहङ्कारपिशुनेषु च।'

छागलेयः—

'व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च।
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते॥
अहोरात्रोषितो भूत्वा कृच्छ्रं चान्द्रायणं चरेत्।

कृच्छ्रपदं चान्द्रायणविशेषणम्।

व्रतोपव्रतान्याह बौधायनः—(२।१०।५४–५६)

अथेमानि व्रतानि भवन्ति।

'अहिंसासत्यमस्तैन्यं मैथुनस्य च वर्जनम्। त्याग' इति।

अथ पञ्चैवोपव्रतानि। 'अक्रोधो गुरुशुश्रूषाप्रमादः शौचमाहारशुद्धिश्च' इति।

जले प्रतिबिम्बदर्शनादौ याज्ञवल्क्यः— (३।२७९)

'मयि तेज' इति छायां स्वां दृष्ट्वाऽम्बुनि वै जपेत्।
सावित्रीमशुचौ दृष्टे चापल्ये वाऽनृतेऽपि च॥'

'मयि तेज' (बृ. उ. ६।४।६) इति मन्त्रो वाजसनीये प्रसिद्धः।

—अशुचौ मूत्रपुरीषादौ। चापल्ये वृथाचेष्टायाम्।

प्रतिश्रुत्यानृतोक्तौ हारीतः—

'प्रतिश्रुत्यानृतं ब्रूयान्मिथ्यासत्यमथापि वा।
स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम्॥' इति।

गुरुवस्तुविषयकप्रतिश्रुताकरणपरमेतत्। प्रायश्चित्तस्य गुरुत्वात्

भोजनकालीनमौनत्यागे पराशरः—(१२।३७)

'मौनव्रतं समासाद्य आसीनो न वदेद्द्विजः।
भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत्॥' इति।

अर्द्धं भुक्त्वाऽन्नपात्रेण जलपाने स एव—(१२।३८)

'अर्धभुक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत्।
हतं दैवं च पित्र्यं च आत्मानं चोपघातयेत्॥'

पशुवन्मुखेन जलपाने स एव—(१२।५३)

'विद्यमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः।
तोयं पिबति वक्त्रेण श्वयोनौ जायते ध्रुवम्॥' इति

अत्रोपवासः प्रायश्चित्तम्।

असपिण्डैः सह रोदने पारस्करः—

'मृतस्य बान्धवैः सार्द्धं कृत्वा तु परिदेवनम्।
वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म च॥'

इत्यनेनैकाहः। एतच्च कामतः। अकामतस्तु स्नानमेव।

प्रेतालङ्करणे शङ्खः—

'कृच्छ्रपादोऽसपिण्डस्य प्रेतालङ्करणे कृते।
अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते॥' इति।

कामतो द्विगुणम्।

यत्तु तप्तकृच्छ्रानुवृत्तावङ्गिराः—'आत्मत्यागिनां संस्कृतौ तदश्रुपातकारी च' इति; तदभ्यासे।

'अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च।
स्नात्वा सचैलः स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुद्धयति॥' इति।

अत्रेच्छयेति ग्रहणादेतत्कामतः। अकामतस्तु स्नानमेव।

यत्तु याज्ञवल्क्यः—(३।२६)

'ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित्।
अनुगम्यांभसि स्नात्वा स्पृष्ट्वाऽग्निं घृतभुक् शुचिः॥' इति।

—ब्राह्मणेनासपिण्डेन। द्विजो विप्रादिः। अस्य च घृतप्राशनस्य भोजनकार्ये विधाने प्रमाणाभावान्न भोजननिवृत्तिरिति मिताक्षरायाम्। तन्मानवसमानविषयम्। वस्तुतो घृतप्राशनस्य प्रायश्चित्तार्थत्वाद्भोजनमेव युक्तम्।

अत एव च वसिष्ठेन–(२३।२१-२२) 'मानुषास्थिस्निग्धं स्पृष्ट्वा त्रिरात्रमस्निग्धे त्वहोरात्रम् । शवानुगमने चैवम् ' इत्यनुगमने एकाहस्योक्तत्वात् । क्षत्रियवैश्यानुगमने त्वधिकं कल्प्यम् ।

ब्राह्मणस्य शूद्रानुगमने पराशरः– (३।४६–४७)

'प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं स त्रिरात्रेण शुद्धयति ॥
त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्गगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्धयति ॥ ' इति ।

अत्र घृतप्राशनस्य शुद्ध्यर्थत्वाभिधानान्न भोजननिवृत्तिः । एतच्च कामतः । अकामतस्त्वर्धम् । एवं क्षत्रियस्य वैश्यशूद्रानुगमने वैश्यस्य च शूद्रानुगमने कल्प्यम् ।

'इष्टापूर्त्तशुभमहाकर्मस्वनुपहतानामपि ऋत्विगाचार्यादीनां कृच्छ्रातिकृच्छ्रचान्द्रायणाख्यं सर्वप्रायश्चित्तं तत्स्थाने द्वादशप्राजापत्यत्वात्तदर्द्धं वा वदन्ति ' इति स्मृत्यर्थसारे ।

कन्याया विवाहात्पूर्वं रजोदर्शने प्रायश्चित्तमाह प्रयोगपारिजाते आचार्यः–

'कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मवान् ।
तथा च कारयित्वा तामुद्वहेतानृशंसधीः ॥
पिता ऋतून्स्वपुत्र्यास्तु गणयेदादितः सुधीः ।
दानावधि गृहे यत्नात्पालयेच्च रजोवतीम् ॥
दद्यात्तदनुसङ्ख्या गाः शक्तः कन्यापिता यदि ।
दातव्यैकाऽपि निःस्वेन दाने तस्या यथाविधि ॥
दद्याद्वा ब्राह्मणेष्वेनामतिनिःस्वः सदक्षिणाम् ।
तस्यातीतर्तुसङ्ख्येषु वराय प्रतिपादयेत् ॥
उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः ।
अदृष्टरजसे दद्यात्कन्यायै रत्नभूषणम् ॥
तामुद्वहन्वरश्चापि कूष्माण्डैर्जुहुयाद्धृतम् ॥ ' इति ।

श्राद्धोपवासदिने दन्तधावने विष्णुरहस्ये–

'श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्या शतसम्पूतमम्बु प्राश्य विशुद्धयति ॥ ' इति ।

एवमन्यान्यपि प्रकीर्णप्रायश्चित्तानि द्रष्टव्यानि ।

इति प्रकीर्णप्रायश्चित्तानि ।

अथ पतितत्यागविधिः ।

स च महापातकिन एवेति केचित् । युक्तं तु 'पतितस्य बहिः कुर्य्युः' (या. ३।२९४) इत्यादौ पतितमात्रोपादानात्सङ्कोचे मानाभावादुपपापादिना पतितस्यापि भवतीति प्रतीमः । तथा यदि बन्धुभिः प्रेर्य्यमाणोऽपि प्रायश्चित्तं न करोति तदा कार्यः ।

यथा शङ्खः— 'तस्य तद्गुरोर्बान्धवानां राज्ञश्च समक्षं दोषान् विख्याप्य पुनः पुनराचारं लभस्वेति, स यद्येवमप्यनवस्थितमतिः स्यात्पात्रं विपर्यस्येत् ।'

अत्र कालमाह मनुः— (११।१८२)

'पतितस्योदकं कार्यं सपिण्डैर्बान्धवैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञात्यूर्त्विग्गुरुसन्निधौ ॥'

—निन्दितेऽहनि रिक्तादितिथौ ।

देशमाह योगीश्वरः— (३।२९४)

'पतितस्य बहिः कुर्य्युः सर्वकार्येषु चैव तम् ।
दासीकुंभं बहिर्ग्रामान्निनयेरन् स्ववांधवाः ॥'

नियमनविधिमाह गौतमः (३।२।२—७) 'तस्य विद्यागुरुयोनिसंबद्धाः सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः । पात्रं चास्य विपर्यस्येयुर्दक्षिणामुखः पदादासः कर्मकरो वाऽवकरादमेध्यपात्रमानीय दासीघटात्पूरयित्वा विपर्य्यस्येदमनुदकं करोमीति नामग्राहं तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखाः । विद्यागुरवो योनिसंबद्धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशेयुः ।'

—योनिसंबद्धाः पित्रादयः । उदकदानादीत्यनेनांजलिप्राग्भाविदाहादिनिवृत्तिः । प्रेतकर्माणीति सपिंडीकरणांतानामेव प्राप्त्यर्थम् । दासो गर्भदासः । कर्मकरो वेतनसंपादितः । दासीघटाहास्याहृतघटजलेन । नामग्राहममुमित्यस्य स्थाने पतितनाम गृहीत्वा ।

स्मृत्यर्थसारे तु 'अस्माकं त्वं मृत इत्युक्त्वा निनयेत्' इत्युक्तम् । दास्येव वा निनयेत् ।

यथा मनुः– (११।१८३)

'दासीघटमपां पूर्णं पर्य्यस्येत्प्रेतवत्पदा
अहोरात्रमुपासीरन्नाशौचं बांधवैः सह ॥'

प्रेतवदित्यपसव्यदक्षिणमुखत्वाद्यतिदेशार्थम् ।

ततः स न व्यवहार्यः ।

यथा मनुः– (११।१८४)

'निवर्त्तेरंस्ततस्तस्मात्संभाषणसहासने ।
दायाद्यस्य प्रदानं च यात्रामेव च लौकिकीम् ॥'

स्त्रीत्यागे विशेषमाह योगीश्वरः–(३।२९६)

'पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः ।
वासो गृहांतिके देयमन्नं वासः सरक्षणम् ॥'

–अन्नं जीवनमात्रक्षमम् । वस्त्रं मलिनम् ।

यत्तु वसिष्ठः–(२१।१३)

'क्षतस्त्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुंगितोपगता च या ॥'

इति; तत्पुंवदेवासामन्नवस्त्राद्याच्छादनादित्यागार्थम् । अन्यासां तु पतितानामन्नवस्त्रादि देयमिति विज्ञानेश्वरः ।

–जुंगितः प्रतिलोमजः ।

संभाषणे प्रायश्चित्तं मिताक्षरायाम्––'अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन् सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं च त्रिरात्रम्' इति ।

त्यागोत्तरमनुतापादिना प्रायश्चित्तं कृत्वा समायाते विशेषमाह मनुः— (१२।१८६)

'प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवम् ।
तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥'

गौतमोऽपि –(३।२।१०–१७) 'यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शुद्धे शातकुंभमयं पात्रं पुण्यतमाद्भ्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनमप उपस्पर्शयेयुः । अथास्मै तत्पात्रं दद्युस्तत्प्रतिगृह्य जपेच्छांता द्यौः शांता पृथिवी शांतं शिवमंतरिक्षं यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः

पावमानीभिस्तरत्समन्दीभिः कूष्माण्डैश्चाज्यं जुहुयात् हिरण्यं ब्राह्मणाय दद्याद् वा गां आचार्याय च। यस्य तु प्राणांतिकं प्रायश्चित्तं स मृतः शुद्ध्येत्। एतदेव शांत्युदकं सर्वेषूपपातकेषु।'

तत एनं कृतप्रायश्चित्तं नैव कुत्सयेयुः। तथा सर्वकार्येषु क्रयविक्रयादिषु तेन सह संव्यवहरेयुरिति। उपस्पर्शयेयुरामचनं कारयेयुः। उपपातकेष्वभ्यासेन महापापतौल्येन पातित्यापादकेषु।

अत्र विशेषमाह हारीतः—'स्वशिरसा यवसमादाय गोभ्यो दद्याद्यदि ताः प्रतिगृह्णीयुरथैनं प्रवर्त्तयेयुरितरथा नेत्यभिप्रेतम्।'

—प्रतिग्रहो भक्षणम्। इतरथा भक्षणाभावेन स संव्यवहार्य इत्यर्थः। मिताक्षरायां स्मृत्यर्थसारे च भक्षणाभावे प्रायश्चित्तावृत्तिरुक्ता।

वसिष्ठः—(१५।१७)'तथाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मनाख्यात'इति।

—अभिषिक्तस्य पूर्वोक्तरीत्या स्नातस्य। प्रत्युद्धारः संग्रहः। स च पुत्रजन्मना व्याख्यातः। संग्रहोत्तरं जातकर्मादिना संस्कुर्यादित्यर्थः।

क्वचित्प्रायश्चित्तोत्तरमपि संव्यवहारापवादमाह योगीश्वरः—(३।२९८)

'शरणागतबालस्त्रीहिंसकान्संविशेन्न तु।
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान्॥'

—संविशेत्र्यवहरेत्। इति पतितत्यागविधिः।

अथ रहस्यप्रायश्चित्तम्—रहस्यं कर्त्रतिरिक्तेनाज्ञातम्। अगम्यागमने च द्वयोः कर्त्तृत्वं व्यासक्तमतस्तत्र तदरिक्तेनाज्ञाते रहस्यत्वम्। एतेन पापमात्रे तृतीयेनाज्ञाते रहस्यत्वमिति यदुक्तं प्राच्यैः परास्ताः। अत्र प्रायश्चित्तमपि रहस्यमेव कुर्यात्।

तथा च हारीतः—(३०।१)'रहस्ये रहस्यं प्रकाशे प्रकाशम्' इति। अत्र पर्षदुपस्थानमपि नास्ति।

तथा याज्ञवल्क्यः—(३।३००)

'विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्।
अविख्यातदोषस्तु रहस्ये व्रतमाचरेत्॥'

१ यद्यपि व्यभिचारिण्या स्त्रिया वधेऽल्पं प्रायश्चित्तम्, तथापि तत्प्रतिग्रह वाचनिकोऽयं निषेधः; 'नास्ति वचनस्यातिभारः' इति न्यायादित्याहुः। द्विजस्याब्धौ तु नौयातुः शोधितस्यापि सङ्ग्रहः। सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि॥' इत्यादिकलिनिषिद्धमध्ये प्रागेवोक्तम्।—प्रा. कौ.

तत्र यद्यनभिज्ञः कर्त्ता तदाऽमुकस्मिन् रहस्यपापे किं प्रायश्चित्तमिति व्याजांतरेण पृष्ट्वा कुर्यात् ।

तत्र साधारणप्रायश्चित्तानि मनुः—(११।२२६)

'एतैर्द्विजातयः शोध्या व्रतैरविष्कृतैनसः ।
अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शोधयेत् ॥ '

संवर्त्तः—(२०३)

'दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजातयः ।
पातकेभ्यः प्रमुच्यंते वेदाभ्यासान्न संशयः ॥ '

वसिष्ठः—(२६।१२)

'जपिनां होमिनां चैव ध्यायिनां तीर्थसेविनाम् ।
निवसंति न पापानि ये च स्नाताः शिरोव्रतैः ॥ '

मनुः (११।२४५-४६,४८)

'वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा ।
नाशयंत्याशु पापानि महापातकजान्यपि ॥
यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् ।
तथाज्ञानकृतं पापं कृत्स्नं दहति वेदवित् ॥
सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः ॥ '

अन्वहमित्यत्रापि कालाकांक्षायां मासादित्यन्वेति ।

माधवीये यमः—

'सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं स जपेन्नित्यं महापातकनाशिनीम् ॥
विरजं द्विगुणं जप्त्वा तदहैव विशुध्यति ।
वामदेव्यं त्रिगवर्त्यं तदहैव विशुद्धयति ॥
पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात्
वृषभं शतशो जप्त्वा तदहैव विशुद्धयति ॥

१ शिरोव्रतान्युपनिषद्व्रतानि महानाम्न्यादीनि । माधवस्तु—' आथर्वणिकानां वेदव्रतेषु मुख्यं व्रतं शिरोव्रतम् । (८।१३] इत्याद्याह, तदत्र बहुवचननिर्देशाद-नभिप्रेतम् ।

वेदमेकगुणं कृत्वा तदह्नैव विशुद्ध्यति ।
रुद्रैकादशकं जप्त्वा तदह्नैव विशुद्ध्यति ॥

चतुर्विंशतिमते—

'पावमानीस्तथा कौत्सं पौरुषं सूक्तमेव च ।
जप्त्वा पापैः प्रमुच्येत पवित्रं मधुछन्दसम् ॥

---

१ पावमानीः—'यः पावमानीरध्येति०' (ऋ. सं. ७।२।१८) इत्यादि-ऋच इति कुल्लूकः । 'स्वादिष्ठया' इत्याद्याः पूर्वोक्ता एवेति तु युक्तम् । कौत्सम्—'अप नः शोशुचत् ०' (ऋ. सं. १।७।५) इति अष्टर्चं सूक्तम् । तथा च मनुः—(११।२४९) 'कौत्सं जप्त्वाप इत्येतत्' इति । पौरुषं सूक्तं 'सहस्र-शीर्षाः' (ऋ. सं. ८।४।१७) इत्यादि षोडशर्चम् । पवित्रम्—'पवित्रं ते (ऋ. सं. ७।३।८) इति पञ्चर्चम् । मधुच्छन्दसम् 'अग्निमीळे०' (ऋ. सं. १।१।१) इति नवर्चम् । मण्डलब्राह्मणम्—'आदित्यो वा एष एतन्मण्डलं०' (तै. आ. १०।१४) इति तैत्तिरीयाणाम् । 'यदेतन्मण्डलं०' ( ) इति वाजसनेयिनाम् । अष्टोत्तरशतोपनिषत्सु पञ्चाशत्तमी 'याज्ञवल्क्यो ह वै' इत्यादिका उपनिषद्वा । रुद्रः—'कद्रुद्राय' (ऋ. सं. १।३।२६) इति पञ्चरुद्र-सूक्तानीति स्मृ. चं. । 'नमस्ते रुद्र' (तै. सं. ४।५।१) इत्यादिः प्रश्नस्तैत्ति-रीयाणाम्, तदादिरेव (शु. य. १६।१) वाजसनेयिनां च । शुक्रियः—'ऋचं वाचं प्रपद्ये' (शु. य. ३६।१) इत्यध्यायः । मोक्षकः—'ईशावास्यमिदं०' (शु. य. ४०।१) इत्यध्यायः । वामदेव्यम्—'कया नः० ' (सा. सं. उ. १।१।२) इति तृचे गीतं साम । बृहत्साम—'त्वामिद्धि हवामहे' (सा. सं. उ. २।१।१२) इति । यज्ञायज्ञीयम्—'यज्ञायज्ञा वो अग्नये.' (सा.सं.उ. १।५।२०) इत्यत्र गीतम् । आदित्यम्—'यदद्य सूर उदिते.' (सा. सं. उ. ६।१।२) इत्यत्र गीतमिति केचित् । ज्येष्ठसाम—'मूर्द्धानं दिवो.' (सा. सं. उ. ४।२।३) राजनम्—'इन्द्रं नरो नेमधिता.' (सा. सं. पू. ४।१।३) इति । पारुच्छेपम्—'अग्निं होतारं मन्ये.' (सा. सं. उ. ९।१।१८) इति । अथर्वशिरसम्—अष्टो-त्तरशतोपनिषत्सु त्रयोविंशं 'देवा ह वै स्वर्गं' इत्यादि । पौरुषं सूक्तम्—'सहस्र-बाहुः' (अथ. सं. १९।१।६) इत्यथर्ववेदोक्तमत्राभिप्रेतमिति भाति, पूर्वोत्तर-साहचर्यात् । 'सहस्रशीर्षा' (सा. सं. पू. ६।३।१३) इत्यादिकासु गीतं साम इति उत्सर्गमयूखे । नीलरुद्रान्—'अपश्यं त्वावरोहन्तं' इत्याद्योपनिषत् प्रसिद्धैव' ऐन्द्रम्—'इन्द्राय साम गायत०' (सा. सं. पू. ४।२।१०) इति पू. क. ।—

मंडलब्राह्मणं रुद्रं शुक्रियो मोक्षकस्तथा ।
वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥
(संवर्तस्मृ. २२७-२८)

यज्ञायज्ञीयमादित्यं ज्येष्ठसाम च राजनम् ।
पारुछेपं च सामानि जप्त्वा मुच्येत किल्बिषात् ॥
अथर्वशिरसं चैव पौरुषं सूक्तमेव च ।
नीलरुद्रं तथैवेन्द्रं जप्त्वा पापैः प्रमुच्यते ॥
आथर्वणाश्च ये केचिन्मन्त्राः कामविवर्जिताः ।
ते सर्वे पापहन्तारो याज्ञवल्क्यवचो यथा ॥
ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा ।
सामानि सरहस्यानि अथर्वाङ्गिरसस्तथा ॥
ब्राह्मणानि च कल्पांश्च षडङ्गानि तथैव च ।
आख्यानानि तथान्यानि जप्त्वा पापैः प्रमुच्यते ॥
इतिहासपुराणानि देवतास्तवनानि च ।
जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्तथापरैः ॥ ' इति ।

बौधायनः— (४।१।३-४)

विधिना शास्त्रदृष्टेन प्राणायामान् समाचरेत् ।
यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत् ।
बाहुभ्यां मनसा वाचा श्रोत्रत्वक्घ्राणचक्षुषा ॥ ' इति ।

प्राणायामाः मासपर्यन्तं षोडश । पूर्वोक्तमनु-(११।२४८) वाक्यात् ।

—सामानि सरहस्यानि—ब्राह्मणोपनिषत्सहितानि । ' साम्नां वा सरहस्यानाम् । (म. ११।२६२) इत्यत्र कुल्लूकेन तथा व्याख्यातत्वात् । अथर्वाङ्गिरसः— अथर्वभिरङ्गिरोभिश्च दृष्टा मन्त्रा इति तै.आ. (२।९) भाष्ये । आथर्वणं सूक्तं 'छन्दोगाय बृहद्गाय' इत्यादि, आङ्गिरसं ' अङ्गिरसो जन्मानि ' इत्यादीत्युत्सर्गमयूखे (पृ. १४) । कल्पानां षडङ्गान्तर्गतत्वेऽपि पृथगुक्तिः केवलानामपि पापमोचकत्वबोधनार्था । धर्मस्थानैरिति ' पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ (याज्ञ. १।३) इत्येतेषु उक्ताधिकैर्न्यायादिभिरित्यर्थः ।

२ ' सर्वपापैः प्रमुच्यते । ' (२२६) इति संवर्तपाठः ।

चतुर्विंशतिमते— (११।२४८)

'मृगारेष्टिः पवित्रेष्टिस्त्रिहविः पावमान्यपि ।
इष्टयः पापनाशिन्यो वैश्वानर्य्या समन्विताः ॥'

कौर्मे— (ब्र. सं. २।३४।९९–१०७)

'जपस्तपस्तीर्थसेवा देवब्राह्मणपूजनम् ।
ग्रहणादिषु कालेषु महापातकशोधनम् ॥
पुण्यक्षेत्राभिगमनं सर्वपापप्रणाशनम् ।
देवताभ्यर्चनं पुंसामशेषाघविनाशनम् ॥
अमावास्यां तिथिं प्राप्य यः समाराधयेद्भवम् ।
ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते ॥
कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीम् ।
सम्पूज्य ब्राह्मणमुखे सर्वपापैः प्रमुच्यते ॥
त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम् ।
दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः ॥
एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ।
द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते ॥
उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः ।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
प्रत्येकं तिलसंयुक्तान् दद्यात्सप्तोदकाञ्जलीन् ।
स्नात्वा नद्यां तु पूर्वाह्णे मुच्यते सर्वपातकैः ॥'

तत्रैव— (ब्र. सं. १।२९।३०)

'नान्यत्पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् ।
सर्वपापप्रशमनं प्रायश्चित्तं कलौ युगे ॥'

यमः—

'जपेद्वाऽप्यस्यवामीयं पावमानीरथापि वा ।
कुन्तापवालखिल्यांश्च निवित्प्रैषान् वृषाकपिम् ॥
होतृन् रुद्रान्सकृज्जप्त्वा मुच्यते सर्वपातकैः ।'

---

१ अस्यवामीयं— 'अस्य वामस्य' (ऋ. सं. २।३।१४) इत्यादि-द्विपञ्चाशदृचम् । कुन्तापाः— 'इदं जना उपश्रुत' इत्याद्यध्यायः । वालखिल्यानि— 'अभिप्रवः' (ऋ. सं. ६।४।१४) इत्यादीन्येकादश सूक्तानि । निविदः— 'अग्निर्देवेद्धः' इत्याद्याः । प्रैषाः—'होता यक्षदग्निं' इत्याद्याः । एते कुन्तापाद्याः—

मनुः— (११।२५२)

'एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम् ।
अवेत्यृचं जपेदब्दं यत्किञ्चेदमितीति च ॥'

अवेत्यृक्— 'अव ते हेळो वरुण नमोभिः' (ऋ. सं. १।२।१५।४) इत्यादिका । जपस्त्वर्थान्तराविरुद्धे काले ।

शातातपः— (१।७१)

'मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥'

इदमकामतः सकृत्करणे ।

अभ्यासे तु षट्त्रिंशन्मते—

'महाव्याहृतिभिर्होमैस्तिलैः कार्यो द्विजन्मना ।
उपपातकशुद्ध्यर्थं सहस्रपरिसङ्ख्यया ॥
महापातकसंयुक्तो लक्षहोमेन शुद्ध्यति ।'

हारीतः— 'पातकातिपातकोपपातकमहापातकानामेकतमसन्निपाते वाऽघमर्षणमेव त्रिर्जपेत् ।'

यमः—

'दशप्रणवसंयुक्तैः प्राणायामैश्चतुःशतैः ।
मुच्यते ब्रह्महत्यायाः किं पुनः शेषपातकैः ? ॥'

अत्र महापापातिपापानुपापोपपापेषु क्रमाच्चतुस्त्रिद्व्येकशतं प्राणायामाः । सङ्कीर्णादौ 'प्रकीर्णकेषु च ह्रासः कल्प्यः' (३।३०५) इति मिताक्षरायाम् ।

अत्रिः— (८।१०–११)

'ब्रह्महा गुरुतल्पी वागम्यागामी तथैव च ।
सुवर्णस्तेयश्चौरश्च गोघ्नो विश्वासघातकः ॥
शरणागतघाती च कूटसाक्षी त्वकार्यकृत् ।
एवमादिषु वाऽन्येषु पापेषु निरताः सदा ॥

—ऋक्संहितायाः परिशिष्टत्वेन पठ्यन्ते । वृषाकपिः—'विहि सोतोरसृक्षत' (ऋ.सं.८।४।१) इति त्रयोविंशत्यृचम् । होतृन्—चित्तिः स्रुक् ।' (तै.आ.३।१) इत्यादीन् । 'होतृन् रुद्रान् पितॄन्' इति पठित्वा पितॄन्—'परेयिवांसं०' (ऋ. सं. १०।१४) इत्यादीनिति स्मृ. चं. ।

प्राणायामत्रयं कृत्वा कृत्वा कल्यं[1] समाहितः ।
अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते ॥ '

इति सामान्यतो रहस्यप्रायश्चित्तानि ।

अथ विशेषतः- तत्र योगीश्वरः- (३।३०१)

' त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम् ।
अन्तर्जले विशुद्ध्येत गां च दत्त्वा पयस्विनीम् ॥ '

जपश्चान्तर्जले निमग्नेन त्रिरावर्त्तनीयः ' देवद्विजगुरून् हत्वाऽघमर्षणं त्रिरावर्त्तयेत् ' इति सुमन्तूक्तेः । इदमकामतः सकृद्वधे ।

यत्तु मनुः— (११।२४८)

' सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः ॥ '

इति; तदस्मिन्नेव विषये गोदानाशक्ताविति विज्ञानेश्वरः (३।३०१) । उपवासत्रयाशक्तावित्यपरे ।

यच्च गौतमेन- (३।६।९) मासव्रतमुक्त्वोक्तम् ' एतद्व्रत एव वा ब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषु प्राणायामैः श्रान्तोऽघमर्षणं जपेत् ' इति । तदकामाभ्यासे ।

योगीश्वरः- (३।२४७)

' लोमभ्यः स्वाहेत्यथवा दिवसं मारुताशनः ।
जले जप्त्वाऽभिजुहुयाच्चत्वारिंशद्धुताहुतीः ॥ '

इदमप्यकामतः सकृद्वधविषयम् ।

यत्तु मनुः— (११।२५८)

' अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम् ।
मुच्यते पातकैः सर्वैः परकैः शोधितस्त्रिभिः ॥ '

इति; तत्कामतोऽभ्यासविषयम् , कामतः श्रोत्रियादिवधविषयं वा ।

यच्च बौधायनः— (३।५।२-७) ' ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य स्नातः शुचिः शुचिवासा उदकान्ते स्थण्डिलमुपलिप्य सकृत् क्लिन्नवासाः सकृत्पतेन पाणिनादित्याभिमुखोऽघमर्षणं स्वाध्याय-

---

१ कल्यं ' प्रत्यूषोऽहर्मुखं कल्यम् ' इत्यमरः ' कालाध्वनोरत्यन्तसंयोगे ' (पाणि.२।३।५) इति द्वितीया । वीप्सा त्वभ्यासार्था । यावदुषः कालं प्राणायामत्रयं पुनः पुनरावर्त्त्यैत्यर्थः ।

मधीयीत । प्रातः शतं मध्याह्ने शतमपराह्णे शतमपरिमितं वा । उदितेषु नक्षत्रेषु प्रसृतियावकं प्राश्नीयात् । ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्प्रमुच्यन्ते । द्वादशरात्रान्महापातकेभ्यो ब्रह्महत्यां सुवर्णस्तेयं सुरापानमिति वर्ज्जयित्वा । एकविंशतिरात्रेण तान्यपि तरति ' इति; तत्कामतः सकृद्वधविषयम् ।

यत्तु वृद्धविष्णुः– ' ब्रह्महत्यां कृत्वा ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेन्धनेनाग्निं प्रज्वाल्याघमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्तदेतस्मात्पूतो भवति ' इति; तदनुग्राहकविषयम् ।

यदपि मनुः– (११।२५९)

' त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः ।

मुच्यते पातकैः सर्वैस्त्रिर्जप्त्वा वाऽघमर्षणम् ॥ '

इति; तदतिनिर्गुणविषयम् ।

यच्च हारीतः— ' महापातकातिपातकोपपातकानामेकतमसन्निपाते वाऽघमर्षणमेव त्रिर्जपेत् ' इति; तन्निमित्तिपरम् । सवनस्थस्त्रीक्षत्रियविप्राहिताग्निस्त्र्यात्रेयीगर्भिण्यविज्ञातगर्भवधेऽप्येतान्येव प्रायश्चित्तानि पादोनानि योज्यानि । इति ब्रह्महत्याप्रायश्चित्तम् ।

अथ सुरापाने–

यमः– ' सुरापः कण्ठमात्रमुदकमवतीर्य सुतसोमात् प्रसृतिमादायोङ्कारेणाभिमंत्र्य पिबेत् । ' इदमौषधार्थपाने ।

याज्ञवल्क्यः– (३।३०३)

' त्रिरात्रोपोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचिः । '

पूर्वलिखितैतत्पूर्वार्द्धस्थं चत्वारिंशदित्यनुवर्त्तते । कूष्माण्ड्यो ' यद्देवा देवहेडनम् ' (तै. ब्रा. २।३–६) इत्यादिकाः । इदमकामतः सकृत्पाने ।

एतदशक्तौ मनुः– (११।२४९)

' मासं जपित्वा ' अप नो ' वासिष्ठं च त्र्यृचं प्रति ।

माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुद्ध्यति ॥ '

अप नो–' अप नः शोशुचदघम् ' (ऋ.सं. १।७।५) इत्यष्टर्चम्। वासिष्ठं–' ' प्रति स्तोमेऽभिरुधसं वसिष्ठा ' (ऋ. सं. ५।५।२७) इति तृचम्। माहित्रं ' महि त्रीणामवोऽस्तु ' (ऋ. सं. ८।८।४३) इति तृचम्। शुद्धवत्य ' एतोन्विन्द्रं स्तवाम '(ऋ. सं. ६।६।३१) इत्याद्याः। एतेषां च जपो मासं प्रत्यहं षोडशवारमिति विज्ञानेश्वरः।

कामतः सुरापाने मनुः– (११।२५६)

' मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः।
सुगुर्व्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम्॥ '

देवकृतस्यैनस इत्यष्टौ शाकलहोमीया मन्त्राः। ' नम इदुग्रं नम आविवास ' (ऋ. सं. ४।८।१२।३) इत्यस्या वा ऋचो जपः। प्रत्यहं संवत्सरपर्यंतम्।

तदपि स एव– (११।२५७)

' महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः।
अभ्यस्यन्नब्दं पावमानीर्भिक्षाहारो विशुध्यति '॥

इति; तत्कामतोऽभ्यासविषयम्, अनेकमहापापविषयं वा।

इति सुरापानप्रायश्चित्तम्।

अथ सुवर्णस्तेये—

तत्र याज्ञवल्क्यः– (३।३०२)

' ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थितः॥ '

पूर्वलिखितैतत्पूर्वार्द्धस्थं ' त्रिरात्रोपोषित ' इति ' विशुध्येत् ' इति चाऽत्राप्यनुषज्यते।

अत्रिः—(७।७)

' एकादशगुणान्वाऽपि रुद्रानावर्त्त्य धर्मवित्।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥ '

अनुग्राहकादिषु गुणवतो निर्गुणस्वामिकापहरणे च मनूक्तम्-(११।२५०)

' सकृज्जप्त्वाऽस्यवामीयं शिवसङ्कल्पमेव च।
सुवर्णमपहृत्यापि सकृद्भवति निर्मलः॥ '

–अस्यवामीयं ' अस्य वामस्य पलितस्य होतुः ' इति द्वापञ्चाशदृक्कं च सूक्तम् (ऋ.सं.२।३।१४–२३)। ' यज्जाग्रतो दूरमुदैति दैवम्। (शु. य. ३४।१–६) इति। इति षट् शिवसङ्कल्पमन्त्राः।

१ ' प्रकृतत्वात् मासमेकं प्रत्यहमेकवारं '—(११।२५१) इति कुल्लूकः।

यत्तु माधवीये यमः—'ब्राह्मणः सुवर्णस्तेयं कृत्वा हिरण्यं शालायां प्रक्षिप्याप्सु निष्णातो हिरण्यवर्णाभिश्चतसृभिरात्मानमभ्युक्ष्य त्रीन् प्राणायामान्कृत्वा तदेतस्मात्पापात्पूतो भवति' इति; तदुणवतोऽति-निर्गुणस्वामिकसुवर्णोनपरिमाणहेमहरणप्रयोजकत्वे द्रष्टव्यम्।

इति स्तेयप्रायश्चित्तम्।

अथ गुरुतल्पगमने मनुः— (११।२५१)

'हविष्पान्तीयमभ्यस्य न तमंह इतीति च।
जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पगः॥' इति।

—हविष्पांतीयं—'हविष्पान्तमजरं स्वर्विद' (ऋ.सं.८।४।१०—१३) इति। 'न तमंहो न दुरितम्' (ऋ. सं. ८।७।१३) इति नतमंहः इति—'इति वा इति मे मनः' (ऋ. सं. ८।६।२७) इति। पौरुषं-'सहस्रशीर्षा' (ऋ. सं. ८।४।१७—१९) इति। एतदन्यतमस्य मासं प्रत्यहं षोडश षोडशकृत्वो जप इति मिताक्षरायाम् (३।३०४)। इदमकामतः सकृदमने।

कामतस्तु याज्ञवल्क्यः— (३।३०५)

'सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः।
गौर्देया कर्मणोऽस्यान्ते पृथगेभिः पयस्विनी॥'

जापी इति ताच्छील्यप्रत्ययादावृत्तिः।

अत्र पुरुषसूक्तकरणकं होममुपवासत्रयं चाह वृद्धविष्णुः—'त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यां गुरुतल्पगः शुध्येत्' (५१।६) इति।

आवृत्तौ होमे च सङ्ख्यापेक्षायां पूर्वश्लोकगता 'चत्वारिंशद्धुतीः' इति चत्वारिंशत्सङ्ख्यात्रापि सम्बध्यते — इति विज्ञानेश्वरः (३।३०४)। एभिरिति बहुवचनेन सुरापस्तेनगुरुतल्पगा गृह्यन्ते। तेन तैः स्वस्वप्रायश्चित्तान्ते एका धेनुर्देया। गुरुतल्पसमे तदतिदेशविषये वाऽर्द्धं पादोनं च क्रमेण योज्यम्। महापातकिसंसर्गिणस्तु येन सह संसर्गस्तदीयमेव प्रायश्चित्तम्। प्रकाशप्रायश्चित्तभाजो रहस्यसंसर्गे तु रहस्यमेव व्रतम्, संसर्गाख्यनिमित्तस्य रहस्यत्वात्।

केचित्तु— रहस्यप्रायश्चित्तभाजः प्रकाशसंसर्गे प्रकाशप्रायश्चित्तताम् आहुः, तन्न; संसर्गस्य हि प्रकाशत्वममुकपापवत्संसर्गोऽयमिति परस्परज्ञाने भवति। एवं च परेण ज्ञाते प्रकाशपापवत्संसर्गत्वमेव तस्य भवति, न तु रहस्यपापवत्संसर्गत्वम्। यौनाध्यापनादिसंसर्गस्यानेककर्तृत्वान्न रहस्यत्वमिति, तन्न; तत्रानेककर्तृत्वस्य व्यासक्तत्वात्तद्व्यतिरिक्तेनाज्ञाते भवत्येव रहस्यत्वम्। तथातिपातक्यादिसंसर्गिणस्तदीयमेव व्रतम्।

इति रहस्यमहापापप्रायश्चित्तम्।

अथोपपापादिषु।

याज्ञवल्क्यः— (३।३०६)

'प्राणायामशतं कार्यं सर्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हि॥'

बौधायनोऽपि— (४।१।५–११) 'अपि वाक्चक्षुःश्रोत्रत्वक्घ्राणमनोव्यतिक्रमेषु त्रिभिः प्राणायामैः शुध्यति। शूद्रस्त्रीगमनात्तदन्नभोजने पृथक् पृथक् सप्ताहं सप्त प्राणायामान् धारयेत्। अभक्ष्याभोज्यामेध्यप्राशनेषु तथा [illegible] मधुमांसघृततैलालाक्षालवणरसान्नवर्जेषु यद्यान्यदप्येवं युक्तं स्याद्दशाहं द्वादशप्राणायामान् धारयेत्। अथ [illegible] यद्यान्यदप्येवं युक्तं स्यादर्द्धमासं द्वादशद्वादशप्राणायामान् धारयेत्। अथ पातकपतनीयवर्जं यद्यान्यदप्येवं युक्तं द्वादशार्द्धमासान् द्वादशद्वादशप्राणायामान् धारयेत्। अथ पातकवर्जं यद्यान्यदप्येवं युक्तं द्वादशार्द्धमासं द्वादशद्वादशप्राणायामान् धारयेत्। अथ वीनकेषु संवत्सरं द्वादशद्वादशप्राणायामान् धारयेत्' इति।

अत्र प्राणायामत्रयं प्रकीर्णकेषु, सप्ताहो द्वादशाहश्च गणितेषूपपातकविशेषेषु, अर्द्धमासो जातिभ्रंशकरादिषु, मासो वधाद्युपपापेषु, षण्मासा अतिपापानुपापेषु, संवत्सरो महापापेषु। तत्र सप्ताहे प्राणायामाः ४९, द्वादशाहे १४४, अर्धमासे १८०, मासे ३६०, षण्मा-

सिके २१६० संवत्सरे ४३२०, एतानि च प्राणायामत्रयसप्ताहादि-व्रतानि पूर्वोक्तेषु प्रकीर्णकोपपापादिविषयेषु भवन्तीति मिताक्षरायाम्। (३।३०५)

कामतोऽभक्ष्यभक्षणे सुमन्तुः— 'रेतोविण्मूत्रप्राशनं कृत्वा, लशुन-पलाण्डुगृञ्जनकुम्भीकादीनामन्येषां वाऽभक्ष्याणां भक्षणं कृत्वा, ततः कण्ठमात्रमुदकमवतीर्य शुद्धवतीभिः प्राणायामत्रयं कृत्वा महाव्याहृति-भिरघमर्षमुदकं पीत्वा तदेतस्मात्पूतो भवति' इति।

अकामतो याज्ञवल्क्यः— (३।३०७)

'ॐकाराभिष्टुतं सोमसलिलं पावनं पिबेत्।
कृत्वा तु रेतोविण्मूत्रप्राशनं हि द्विजोत्तमः॥'

दुष्टप्रतिग्रहे मनुः— (११।२५३)

'प्रतिगृह्याप्रतिग्राह्यं भुक्त्वाऽन्नं तु विगर्हितम्।
जपंस्तरत्समन्दीयं(ऋ.सं.७।१।१५)पूयते मानवरूयहात्।'इति।

एतदभ्यासविषयम्।

स एव— (११।२५५)

'अप्रशस्तं तु कृत्वाऽप्सु मासमासीत भैक्षभुक्।'

इदं कामतोऽत्यन्ताभ्यासविषयम्।

अज्ञानकृतप्रकीर्णकवाचिकमानसोपपातकेष्वाह योगीश्वरः-(३।३०८)

'निशायां वा दिवा वाऽपि यदज्ञानकृतं भवेत्।
त्रैकाल्यसन्ध्याकरणात्तत्सर्वं प्रविनश्यति॥'

यमोऽपि—

'यद्दुष्टं कुरुते पापं कर्मणा मनसा गिरा।
आसीनः पश्चिमां सन्ध्यां प्राणायामैर्निहन्ति तत्॥'

शातातपः— (ल. शा. ११५)

'अनृतं मद्यगन्धं च दिवामैथुनमेव च।
पुनाति वृषलान्नं च बहिःसन्ध्या उपासिता॥'

शङ्खः— (१२।१५–१७)

'शतं जप्ता तु सावित्री सर्वपापप्रणाशिनी ।
सहस्रजप्ता च महापातकेभ्यः प्रमोचिनी ॥
दशसाहस्रजापेन सर्वकल्मषनाशिनी' ।
सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः ।
सुरापश्च विशुद्ध्यन्ति लक्ष्यजप्यान्न संशयः ॥' इति ।

— सर्वपापानि प्रकीर्णकानि । महापातकान्युपपातकानि । सर्वकल्मषाण्यतिपातकानि वेति विज्ञानेश्वरः ।

सर्वपापेषु रहस्यप्रायश्चित्तप्रकारमाह प्रायश्चित्तविवेके विश्वामित्रः—

'प्रकाश उक्तं यत्किञ्चिद्विंशद्भागो रहस्यके ।
त्रिंशद्भागः षष्टिभागः कल्पो जात्याद्यपेक्षया ॥'

आदिशब्देन शक्तिगुणकर्माभ्यासानभ्यासादि गृह्यते-इति शूलपाणिः।

अत्र द्वादशाब्दस्य विंशांशप्राजापत्याः १८, त्रिंशांशः १२, षष्ट्यंशः ६ । चतुर्विंशत्यब्दे एतद्विगुणा अंशाः । षडब्दे तदर्द्धम् ।

यत्तु शूलपाणिः–'यत्र प्रकाशे मरणान्तिकं प्रायश्चित्तं, तत्र रहस्येऽपि मरणान्तिकमेव; मरणे ह्रासासंभवात्, इत्याह । तन्न, यद्यपि मरणे ह्रासो न सम्भवति, तथापि तद्वैकल्पिके चतुर्विंशत्यब्दादौ न सम्भवत्येव । तेन चतुर्विंशत्यब्दषष्ट्रित्रिंशद्विंशांशा द्वादशचतुर्विंशतिषट्त्रिंशन्मिताः प्राजापत्याद्यपेक्षया कर्त्तव्याः । मरणान्तिकस्य तु तद्विधिना प्रकाशपापविषयत्वेनोक्तत्वाद्रहस्ये प्रापकप्रमाणाभावात्प्राप्तिरेव दूरापास्तेति सर्वं शिवम् ॥

परिवादनमादितः कृतं गदिता शुद्धिरथो समानतः ।
वधपानपरस्वसङ्ग्रहव्यभिचारे वृषपापिसङ्गतौ ॥ १ ॥

उपपापेष्वथो जातिभ्रंशके सङ्करीकरे ।
अपात्रीकरणे प्रोक्तं मलिनीकरणे तथा ॥ २ ॥

---

१ 'लक्षं जप्ता तु सा देवी महापातकनाशिनी' इत्युत्तरार्धं–मि. ।

प्रकीर्णके ततः कृतं घटापवर्जनं ततः ।
रहस्यपापनिष्कृतिर्विनिर्णेयाः क्रमादिमे ॥ ३ ॥
चर्मण्वतीतरणिजाशुभसङ्गमस्य
सान्निध्यभाजि कृतशालिनि मध्यदेशे ।
ख्याता भरेहनगरी किल तत्र राजा
राजीवलोचनरतो भगवन्तदेवः ॥ ४ ॥

इति श्रीसङ्गरवंशावतंस-महाराजाधिराज-भगवन्तदेवोद्योजितेन मीमांसक-शङ्करभट्टात्मजेन भट्टनीलकण्ठेन कृते भगवन्त-भास्करे प्रायश्चित्तमयूखो दशमः ॥ १० ॥

'भट्टयज्ञेश्वरानन्तधूपकारविनिर्मिता ।
प्रायश्चित्तमयूखस्य टिप्पणी तत्त्वदर्शिनी ॥'

---

११ शुद्धिमयूखः... रु. १—०
१२ शान्तिमयूखः... रु. २—०
पुस्तकप्राप्तिस्थानम्—
'गुजराती' प्रिन्टिंग प्रेस
सासुन बिल्डिंग
एल्फिन्स्टन सर्कल, फोर्ट—मुंबई

संस्कृतग्रन्थाः

श्रीमद्भागवत-प्रथमस्कंध-श्रीसुबोधिनीप्रकाशः (श्री पुरुषोत्तमप्रणीतः) १—०—०

श्रीमद्भागवत-दशमस्कंधसुबोधिन्यां प्रथमा जन्मप्रकरणाध्यायद्वयी (अ. १-२ टिप्पण्यादिसकलपरिकरसहिता) १—४—०

श्रीमद्भागवत-दशमस्कंध-सुबोधिन्यां द्वितीये तामसाख्यप्रकरणे प्रथमं प्रमाणप्रकरणं प्रक्षिप्ताध्यायत्रययुतम् अध्यायाः ५—११; १२—१३—१४ १—०—०

श्री सुबोधिनी । भ्रमरगीतोपेतं श्रीमद्भागवत--**दशम**--पूर्वार्ध--राजस--प्रमेय-प्रकरणम्। अध्यायाः ४०-४६ (श्रीमत्वल्लभाचार्यप्रणीतम्) ३—०—०

संन्यासनिर्णयः (श्रीमद्वल्लभाचार्यप्रणीतः) अष्टविवरणसहितः **गुर्जरानुवाद**सहितश्च १—०—०

अन्तःकरणप्रबोधः (श्रीवल्लभाचार्यप्रणीतः) पंचटीकासहितः ०—८—०

कृष्णाश्रयस्तोत्रम् (श्रीवल्लभाचार्यविरचितम्) षड्भिर्व्याख्याभिः समुल्लसितम् १—८—०

श्रीमद्गोपालपूर्वतापिन्युपनिषद् (श्रीवल्लभाचार्यविरचित-ब्रह्मामृत-भाष्येण पीयूषलहर्या च समुपबृंहिता) १—८—०

तत्त्वदीपनिबंधः (सर्वनिर्णयप्रकरणम्-श्रीवल्लभाचार्यरचितम्) ०—४—०

सर्वतंत्रसिद्धान्तलक्षणसंग्रहः ०-१२-०

तर्कसंग्रहः न्यायबोधिनीपदकृत्याख्यटीकाद्वयसमेतः ०—७—०

तर्कसंग्रहः नीलकण्ठकृतदीपिकाटीकासहितः ०-१२-०

छांदोग्योपनिषद् (प्रथमाध्यायः) ०—८—०

वैद्यकग्रन्थाः

क्षेमकुतूहलम् (क्षेमशर्मविरचितम्) ०-१२-०
राजमार्तण्ड; नाडीपरीक्षा, वैद्यमनोरमा तथा धाराकल्पः १-८-०
वैद्यजीवनम् (लोलिम्बराजविरचितम्) दीपिका-ख्यभाषानुवादसहितम् १-०-०
आयुर्वेदप्रकाशः (श्रीमाधवविरचितः) २-०-०
नागरसर्वस्व अर्थात् सांसारिक सुखका साधन श्रीपद्मविरचित कामशास्त्रका अपूर्व ग्रंथ मूळ सहित हिंदी भाषांतर. २-८-०
पञ्चसायक संस्कृत मूळ और सरळ भाषा टीका सहित. २-०-०
रतिरहस्य संस्कृत मूळ और सरळ भाषा टीका सहित. ३-०-०
रतिवल्लभ अर्थात् कुचोपनिषत् संस्कृत मूळ और भाषा टीका सहित. १-८-०
रतिरत्नप्रदीपिका संस्कृत मूळ और भाषा टीका सहित. १-८-०
सिद्धमन्त्रः केशवविरचितः । बोपदेवविरचितया सिद्धमन्त्र)-प्रकाशाख्यव्याख्यया समुल्लसितः । वातघ्नत्वादिनिर्णयसहितः १-०-०

हिंदी

रामपद्धति—रामपटल—सिद्धांतपटल—मंत्रमुक्तावली—चौवीस गायत्री आदि पांचौ पुस्तकका एक गुटका चारौ संप्रदायी वैष्णवोपयोगी (कर्मकांडीय ग्रंथ) १-०-०
राम पटल चारौ संप्रदायी वैष्णवोपयोगी ०-४-०
अर्जुनगीता भाषा छन्दोबद्ध (आवृत्ति ८) ०-६-०
सारुक्तावली (हरिदयालकृत पद्यात्मक) सूक्तावली अथवा सभाजित्य (आवृत्ति ३१) ०-४-०
विवाहपद्धति (भाषाटीकासहित) ०-१४-०

हनुमान ज्योतिष (भाषाटीका तथा चक्रो सहित. प्रश्न कहनेमें अपूर्व है) प्रश्नग्रंथ (आवृत्ति ३७) ०—९—०

भजन रामायण तुलसीदासकृत ०—१—६

गजल संग्रह (तीन आनेमें अनेक प्रकारके आनंद लेलो. एक २ गजल मानो अमृतकी धारा है) ०—३—०

संगीत प्रह्लादचरित्र ०—४—०

सरस्वतीसन्देश (गिरिधारिलालकृत) ०—४—०

सिद्धान्त—रहस्य—विवृत्तिः (हरिरायप्रणीत ।) व्रज-भाषानुवादसहिता ०—८—०

योगसोपान—पूर्वचतुष्क—यम, नियम, आसन और प्राणायाम संस्कृत श्लोक और हिंदी भाषांतरसहित इसमें ३७ आसनोंके चित्रहैं. १—४—०

लीलावती भाषाटीकासहिता. श्रीमद्गणकचक्रचूडामणि-भास्कराचार्यविरचिता. यथार्थबोधिन्याख्यया सान्वय-सोदाहरणया भाषाटीकया सनाथीकृता. इससे सर्व प्रकारका गणित कर सकते है- २—०—०

रमल नवरत्न और रमल दानियाल. रमल नवरत्न-चन्द्रिका **भाषाटीकसहित** और भाषा **वार्तिक** रमल दानियाल. संपूर्ण बारह भवनके प्रश्नसे भूत, वर्तमान और भविष्य अच्छा प्रकारसे कह सकते है. १—४—०

ताजिकनीलकंठी भाषाटीकासहित तन्त्रगयात्मक. इसमें वर्षफल बनानेका पूरा हाल वर्षान्त दशा-फल, द्वादश भाव और प्रश्नतंत्रमें अनेक प्रकारके प्रश्नके विषय चमत्कारिक है. १—०—०

प्रत्येकका डाक व्यय अलग अलग

मळवानुं ठेकाणुंः—**'गुजराती' प्रिन्टिंग प्रेस,**
सासुन बिल्डिंग एल्फिन्स्टन सर्कल, कोट—मुंबई

THE 'GUJARATI' PRINTING PRESS
Elphinstone Circle, Fort, BOMBAY.

संस्कृतपुस्तकानि ।

	रु.	आ.	पै.
अयोध्याकांडम्(२)पृष्ठानि६४० टीकात्रयोपेतम्	५	०	०
अरण्यकांडम्(३)पृष्ठानि३४० टीकात्रयोपेतम्	२	१२	०
अष्टटीकोपेता श्रीमद्भगवद्गीता। द्वितीयो गुच्छः	१	०	०
अद्वैतमंजरी ब्रह्मसूत्रवृत्तिः...	०	१२	०
आचारमयूखः (२) आह्निकक्रिया ...	०	८	०
उत्तरगीता (व्याख्यासमेता)	०	३	०
उत्सर्गमयूखः (८)	०	४	०
उपदेशसाहस्री (सटीका)...	१	८	०
उद्योगपर्व (महाभारतस्य) अष्टटीकोपेतम्...	८	८	०
उत्तरकाण्डम्(७)पृष्ठानि३९९ टीकात्रयोपेतम्	६	०	०
एकादशटीकोपेता श्रीमद्भगवद्गीता।	१	८	०
अष्टटीकोपेता श्रीमद्भगवद्गीता	१	०	०
कारिकावली–सिद्धांतमुक्तावलीसहिता ...	०	१	०
किष्किंधाकांडम्(४)पृष्ठानि३२० टीकात्रयोपेतम्	२	१२	०
कुमारसंभवम्	अप्राप्यम्		
गंगालहरी पीयूषलहरीव्याख्यासहिता ...	०	७	०
गणेशसहस्रनामावलिः (श्लेष)	०	३	०
गारीशंकरगुटिका	१	८	०
चन्द्रालोकः–रमाख्यव्याख्यासहितः ...	०	१	०
चम्पूभारतम्–भारतचम्पूः। सटीकम् ...	२	०	०
तैत्तिरीयोपनिषद्शांकरभाष्यानंदगिरिटीकोपेता	१	०	०
तर्कसंग्रहः–सिद्धांतचन्द्रोदयव्याख्यासमन्वितः	०	१	०
दशरूपकम्। प्रभाख्यव्याख्यासहितम् ...	१	०	०
दानमयूखः (७)...	२	०	०
देवीसहस्रनामावलिः (श्लेष)	०	३	०
नीतिमयूखः (९)	१	४	०
न्यायदर्शनम्–न्यायभाष्यम्। व्याख्यासहितम्	९	०	०
न्यायबिन्दुः। सटिप्पणः	१	४	०
पञ्चीकरणम्। षट्टीकोपेतम्	१	८	०
पारस्करगृह्यसूत्रम् (पञ्चटीकोपेतम्) ...	६	८	०
पातञ्जलयोगदर्शनम् (सटीकम्)	०	८	०
प्रतिष्ठामयूखः (९)	०	८	०
प्रायश्चितमयूखः (१०)	२	०	०
पुरुषसूक्तं उत्तरनारायणेन सहश्रीसूक्तं लक्ष्मीसूक्तं च	०	३	०
पुरुषोत्तमसहस्रनाम...	०	३	०

पुरुषोत्तमसहस्रनामावलिः ०– ३–०
ब्रह्मसूत्रवृत्तिः (अद्वैतमंजरी) सटीका ... ०–१२–०
बालकाण्डम् (१) पृष्ठ-४२९ टीकात्रयोपेतम् ३– ०–०
बृहत्स्तोत्रमुक्ताहारः भाग.१ स्तो. सं. २५६ १– ०–०
बृहत्स्तोत्रमुक्ताहारः। भागौ १–२.स्तो.सं.४१६ अप्राप्यौ
बृहत्स्तोत्ररत्नहारः। भागः १,, १–२३४ १– ०–०
बृहत्स्तोत्ररत्नहारः। भागः २,,२३५–४७६ १– ०–०
बृहत्स्तोत्ररत्नहारः। भागः १–२.स्तो.सं.४७६ १–१२–०
भगवद्गीता–एकादशटीकोपेता। प्रथमो गुच्छः १८– ०–०
भगवद्गीता–अन्याष्टटीकोपेता। द्वितीयो गुच्छः १०– ०–०
भागवतमंजरी रु. ४–०–० ... ... ३– ०–०
भारतचम्पूः–चम्पूभारतं–सटीकं २– ०–०
भक्तिमार्तण्डः १– ४–०
मयूखाः–
१ संस्कारमयूखः ०–१२–० २ आचारमयूखः ०– ८–०
३ समयमयूखः १– ४–० ४ श्राद्धमयूखः १– ४–०
५ नीतिमयूखः १– ४–० ६ व्यवहारमयूखः १-१२-०
७ दानमयूखः २– ०–० ८ उत्सर्गमयूखः ०– ४–०
९ प्रतिष्ठामयूखः ०– ८–० १० प्रायश्चित्तमयूखः २- ०-०
११ शुद्धिमयूखः १– ०–० १२ शान्तिमयूखः २- ०-०
मतमतान्तरपाठसमेतो ब्रह्मसूत्रपाठः... ... ०– ४–०
मनुस्मृतिः–(कुल्लूकभट्टकृतटीकायुता) ... २– ४–०
महाभागवतम्–देवीपुराणम् । अध्यायाः ८१ २– ०–०
युद्धकाण्डम् (६) पृष्ठसं.३६९ टीकात्रयोपेतम् ८– ०–०
रामगीता मूलमात्रा ०– १–०
रघुवंशं दण्डान्वयसहितं मल्लीनाथकृतटीका-
युतम्–सर्गाः १–५ ... ... ०– ८–०
रघुवंशं संपूर्णं–मल्लीनाथकृतटीकासहितम्
(सर्गाः १–१९) १– ४–०
रघुवंशं दण्डान्वयसहितं मल्लीनाथकृत–
टीकासहितम् । (सर्गाः १–१९) ... १– ८–०
वादार्थसंग्रहः भा.१. ०–६–० वादार्थसंग्रहः भा.२. ०– ६–०
वादार्थसंग्रहः भा.३. ०–८–० वादार्थसंग्रहः भा.४. ०–१२–०
वाक्यावली (संस्कृत–गुजराती) ... ... अप्राप्या

	रु.	आ.	पै.
वाल्मीकिरामायणं टीकात्रयोपेतम् (सम्पूर्णम्)	३१	०	०
१ बालकाण्डम् । टीकात्रयोपेतम् पृ. ४२५	३	०	०
२ अयोध्याकाण्डम् ,, ,, ६४०	१	०	०
३ अरण्यकाण्डम् टीकात्रयोपेतम् ३४०	२	१२	०
४ किष्किन्धाकाण्डम् ,, ,, ३२०	२	१२	०
५ सुंदरकाण्डम् ,, ,, २४६	३	८	०
६ युद्धकाण्डम् ,, ,, ३६६	८	०	०
७ उत्तरकाण्डम् ,, ,, ३५५	६	०	०
विदुरनीतिः । सटिप्पणा	०	४	०
विराटपूर्व (महाभारतस्य) पंचटीकोपेतम्...	४	८	०
विष्णुसहस्रनाम	०	२	०
विष्णुसहस्रनामावलिः (ग्लेझ) सचित्रा ...	०	४	०
वेदान्तरहस्यम्	०	१	०
विशिष्टाद्वैतमतविजयवादः	०	१	०
विशिष्टाद्वैताधिकरणमाला	१	०	०
वेदांतसंज्ञावलिः—सटीका	०	१०	०
वैशेषिकदर्शनम् । सटीकम्	अप्राप्यम्		
व्यवहारमयूखः (६)	१	१२	०
शुद्धिमयूखः (११)	१	०	०
शांतिमयूखः (१२)	२	०	०
शिवसहस्रनामावलिः (ग्लेझ)	०	३	०
शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता	४	०	०
सत्यनारायणपूजाकथा	०	३	०
समयमयूखः (३) कालनिर्णायकः ...	१	४	०
सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः	१	०	०
संस्कारमयूखः (१)	०	१२	०
सुन्दरकाण्डम् (५) पृ.३४६ टीकात्रयोपेतम्	३	८	०
श्राद्धमयूखः (४)	१	४	०

हिन्दी पुस्तकें

चन्द्रकान्ता भाग १ ला रु. ४॥; चन्द्रकान्त भाग २ रा रु. ४॥

चन्द्रकान्त भाग ३ रा	६	०	०
दुर्गेशनंदिनी (बंकिमचंद्रकृत)	१	०	०

मराठी पुस्तकें

चन्द्रकान्त भाग १ ला रु. ४; चन्द्रकान्त भाग २ रा रु. ५

,, ३ रा	५	०	०
हिन्द आणि ब्रिटानिया	२	०	०

'गुजराती' प्रिंटिंग प्रेस
लासुन बिल्डिंग, एल्फिन्स्टन सर्कल, कोट–मुंबई
The Gujarati Printing Press, Fort, Bombay